कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः

कुण्डकादम्बरी-ग्रन्थः

(म० म० गोकुलनाथोपाध्याय विरचितः)

सम्पादकौ

(१) प० श्री धर्मनाथ झा

(२) प० श्री कुमुदनाथ मिश्र

प्रकाशकः—

कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः

दरभङ्गा ।

42
KG
1949

JACL-KRC
001949

1949

केन्द्रीय संस्कृत विद्यापीठ, जयपुर

पुस्तकालय

पुस्तक संख्या.....

वर्गीकरण संख्या.....

केन्द्रीय संस्कृत विद्यापीठ, जयपुर

पुस्तकालय

1949

वर्गीकरण सं०.....

पुस्तक सं०..... दिनाङ्क.....

यह पुस्तक नीचे अङ्कित तिथि या उससे पूर्व लौटा दी जानी चाहिये। यदि पुस्तक निर्धारित तिथि से अधिक समय तक पाठक अपने पास रखेंगे तो 5 पैसे प्रतिदिन के हिसाब से विलम्ब शुल्क देय होगा।

SV-2024

म० म० गोकुलनाथ ग्रन्थावल्याम्

सप्तमं पुष्पम्

महामहोपाध्याय–गोकुलनाथ-

विरचितः

कुण्डकादम्बरी-ग्रन्थः

गङ्गौलीग्रामवास्तव्य प० श्रीधर्मनाथशर्म-

लालगञ्जग्रामवास्तव्य प० श्रीकुमुदनाथमिश्र शर्मभ्यां–सम्पादितः ॥

ज्यौतिष विभागाध्यक्षेण प० श्रीरामचन्द्रशर्मणा

संशोधितः ।

प्रकाशकः—

कामेश्वरसिंहदरभङ्गासंस्कृतविश्वविद्यालयः

दरभङ्गा ।

हरिशयनैकादशी (१९८२ ई०)

1949

12.2 P

सर्वाधिकार सुरक्षित
प्रकाशन वर्ष—१९८२ ई०
प्रथम संस्करण—१०००
मूल्य—२०) (बीस रुपया)

पुस्त
वर्गी

सम्पादक
प० श्री धर्मनाथ झा
प० श्री कुमुदनाथ झा

JACL-KRC
001949

संशोधक—
प० श्री रामचन्द्र झा

प्रकाशक
कामेश्वरसिंह दरभङ्गा संस्कृत विश्वविद्यालय
कामेश्वरनगर, दरभङ्गा

मुद्रक—
श्री सुदर्शन प्रेस, दरभंगा

प्रामुखम् ।

सर्वतन्त्र,स्वतन्त्राणां महामहोपाध्याय-गोकुलनाथोपाध्यायानां कृतिष्वन्यतमेयं "कुण्डकादम्बरी" कस्य न गणितविचार चतुरस्य चेतश्चमत्करोति ।

मनीषिवर्यैः ग्रन्थेऽस्मिन् सुविहितं सूक्ष्मप्राचीसाधनम् समभूमिप्रकारनिरूपणम् , शङ्कुलक्षण-विवेचनम् , राघवमतखण्डन-पुरस्सरमेकहस्तादिक्षेत्रफलनिरूपणम् , एवंविधानां बहूनां विषयाणां गणितपूर्वक मौचित्यपूर्ण प्रतिपादनञ्च जिज्ञासु-मानसं समुल्लासयतितराम् ।

एतद्ग्रन्थस्य सम्पादकाभ्यां कृतभूरिपरिश्रमाभ्यां बिद्वद्वराभ्यां झो पाह्व पण्डित श्रीधर्मनाथ—मिश्रोपाह्व पण्डित श्रीकुमुदनाथशर्मभ्यां धन्यवादप्रदानपुरस्सरं कार्तज्ञं ज्ञापयति विश्वविद्यालयपरिवारः ।

प्रकाशितोऽयं ग्रन्थः—प्रकल्पतां नीरक्षीरविवेकिनां मनीषिणां प्रमोदाय जगन्मङ्गलायचेति कामयते—

विदुषां वशम्वदः

जयमन्तमिश्रः

कुलपतिः

कामेश्वरसिंह दरभङ्गा संस्कृत विश्वविद्यालयः

दरभङ्गा ।

पुस्त

वर्ग

प्राक्कथनम्

सर्वतन्त्रस्वतन्त्राणां वैदेहस्य विद्यानिधेः पीताम्बरस्य सुचरिताणंवचन्द्राणां प्रणीतसर्वतन्त्रप्रबन्धानां महामहोपाध्याय गोकुलनाथोपाध्यायानां परः शतासु कृतिष्वन्यतमेयं "कुण्डकादम्बरी" त्यभिधाना कृतिः प्रचुरगणितोपपत्तिप्रचारा सुचिरा कस्य न गणितविचारचतुरस्य चेतश्चमत्करोतितमाम् ।

आसीत्तस्य काचित्त्रयीव सच्चरणा काणादीव तिर कृतोपमानशब्दा न्याय विद्येवाभ्युपेतान्यथाख्यातिः मीमांसेव गुणसंख्याश्रितभेदा वेदान्तविद्येवापूर्वदृष्टिसृष्टिविदग्धा सांख्यस्थितिरिवगुणात्मकप्रकृतिः योगविद्येवपुरूषानुग्राहकत्वपरा क्षेत्रगणितपरिभाषेव विविक्तवाहुकरणा भक्ताभिलषितविग्रहवतीवनीलसरस्वती गुणगौरवोल्लसद्धाम्नी कादम्वरी नाम्नी दुहिता । साकदाचिज्जाह्नवीजलेनिलीय स्वरूपमिता न्यमज्जयत् पितरौ शोकसरित्पतौ । अतएव तत्सूचकं पद्यं न्यवध्नन् ग्रन्थादौ—

"आवां बाव प्रकृतिकृपणाबाधिभिर्दह्यमानौ
विक्रोशावः करूणवचनं पुत्रि कादम्बरीति ।
कोऽयं लोकः क इव विषयः किं पुरं कोनिवासो
यस्मिनस्मद्विमुखहृदया त्वं निलीय स्थितासि ।"

स्मृतेरिव धृतसंस्कारायाः सततमकलविद्यानुयोगजनितपितृप्रीतेस्तस्याः स्मृतिकीर्त्तिप्रवाहानुवृत्तिमुद्दिश्य प्रकृतप्रबन्धं न्यवध्नन् निखिलविद्यारहस्यवेतृदुहितृविश्लेषाहिताधि मन्युपरीतस्वान्ता अप्रमादा उपाध्यायपादाः । अतएव—

"कुण्डकादम्बरीनामा ग्रन्थोऽयं तव कीर्तये ।
मया गोकुलनाथेन सोपपत्ति निबध्यते ।।" इति

प्रतिजज्ञे ।

धर्मकृत्योपयोगि कुण्डमण्डपादिनिरूपणपरोऽयं निवन्धो नूनमुपकरिष्यति निगमाध्वाध्वनीनानाम् ।

अत्र—सूक्ष्मप्राचीसाधनम्, समभूमिप्रकारनिरूपणम्, शङ्कुलक्षणनिरूपणम्, नवकुण्डीपक्षे विंशतिहस्तपरिमितस्य मण्डपस्य गणितपूर्वकमौचित्य प्रतिपादनम्, राघवभट्टमतखण्डनपूर्वकमेकहस्तादिक्षेत्रफलनिरूपणम्, त्रिकोणफलनिरुपणावसरे श्रीधरविधेः स्थूलत्वप्रतिपादनपुरस्सरं भास्करगणितस्य युक्तियुक्तत्वोपपादनम्, अर्द्धचन्द्रकुण्डप्रकरणे राघवभट्टश्रीधरभास्करादीनां गणितापि समीक्षणपूर्वकं सूक्ष्मफलसाधनम्. त्रिकोणकुण्डोल्लासे निरवकाशेन दुर्बलेनापि सावकाशस्य वलवतो बाधोपपादनम्, एतत्सवंगणितधर्मशास्त्रयोः प्रगाढपाण्डित्यं प्रद्योतयति प्रबन्धकृतः।

महामहोपाध्याय गोकुलनाथोपाध्यायाः खृष्टीं सप्तदशीं परार्द्धे अष्टादशीञ्चपूर्वार्द्धे शताब्दीमाक्रम्य मिथिलायां विरेजिरे इति तदीय मासमीमासा निबन्धतोऽवगम्यते।

जन्मस्थानं चैतदीयं विश्रुतविद्यातपः सिद्ध्यादिगुण ग्रामो मिथिलावयवो मङ्गलवनी (मङ्गरौनी) नामाग्रामः।

अन्ते च करूणावरूपणालयान् विद्वद्वरानत्र्य प्रकाशनाशेष दोषाणां क्षमाम् विनयावनतोऽभ्यर्थ्य विरमामि विस्तरात्।

विदुषां वशंवदः

रामसेवक झा शर्म्मा

स्नातकोत्तर-दर्शन विभागाध्यक्ष

कामेश्वरसिंह दरभङ्गा संस्कृत

विश्वविद्यालय, दरभङ्गा।

विवाह पञ्चमी

२०।११।१९८२ ई०

॥ ओं नमोविघ्नेशाय ॥

कुण्ड कादम्बरी

शान्तं यद्यपि कर्म पाणिचरणघ्राणाक्षिकर्णत्वचा-
मेतस्यान्न मनश्चनतोहि मनसा सार्द्धं निवृत्तं वचः ॥
वत्से वेत्सि तथापि नैषपुरुषः सत्तां निजामुज्झति ।
छन्दांसि श्वसितानि यस्य निभृतं चैतन्यमाचक्षते ॥१॥

आवां वाव प्रकृतिकृपणावाधिभिर्वाध्यमानौ
विक्रोशावः करुणवचनं पुत्रि कादम्बरीति ॥
कोऽयं लोकः क इवविषयः किं पुरः कोनिवासो ।
यस्मिन्नस्मद्विमुखहृदया त्वं निलीयस्थितासि ॥२॥

कुण्डकादम्बरीनामा ग्रन्थोऽयं तव कीर्तये ।
मया गोकुलनाथेन सोपपत्तिर्निबध्यते ॥३॥

अथ भूमानम्

आदित्यपुराणे । 'जालान्तर्गते भानौ यत्सूक्ष्मं दृश्यते रजः ।
प्रथमं तत्प्रमाणानां त्रसरेणुं प्रचक्षते ॥"

भानौ—भानुप्रभायाम्, प्रमाणानाम्–व्यवहार्याणाम्, अतीन्द्रियस्य परमाणु प्रमाणस्य, "त्रसरेणुस्तु विज्ञेयो येऽष्टौस्युः परमाणवः" इत्यनेन युग्मराश्य-

भिधानात्। तथा–

"त्रसरेणवस्तु तेऽष्टौ रथरेणुरुदाहृतः।
रथरेणवस्तु तेऽष्टौ वालाग्रं समुदाहृतम्॥"

अथ सिद्धान्तशेखरे

"जालान्तर्गते भानौ दृश्यादृश्यन्तु यद्रजः,
परमाणुः स उद्दिष्टो वालाग्रं तै रथाष्टभिः॥"

इति त्रसरेणो रेव परमाणुरिति संज्ञा, रथरेणुरेव वालाग्रमिति व्यपदिष्टः। तथा–

"वालाग्राण्यष्टलिक्षातु, यूकालिक्षाष्टकं बुधैः।"

स्मृतेति पूर्वेण विपरिणते नान्वयः

अष्टौ यूका यवं प्राहु रङ्गुलन्तु यवाष्टकम्।
द्वादशाङ्गुल मात्रोवै वितस्तिः परिकीर्तितः॥'

अङ्गुष्टस्य प्रदेशिन्या व्यासः उच्यते॥

तालः स्मृतोमध्यमया गोकर्णश्चाप्यनामया।
कनिष्ठया वितस्तिस्तु द्वादश ङ्गुलमानकः।"

प्रदेशिन्या–तर्जन्या सह व्यासःप्रसारितयोर्विस्तारः, वितस्तेः पुनरभिधानम् द्वादशाङ्गुलतादृढ़ीकरणाय। तथा–

"रत्नैस्त्वङ्गुल पर्वाणि विज्ञेयास्त्वेकविंशतिः।
चत्वारिविंशतिश्चैव हस्तः स्यादङ्गुलानि तु।
किष्कूः स्मृतोद्विरत्निस्तु द्विचत्वारिंशदङ्गुलैः।
वर्णनद्विगुणश्चैव धनुर्दण्डः प्रकीर्तितः।"

तन्त्रान्तरे–

"रत्निस्त्वङ्गुल पर्वाणि विज्ञेयास्त्वेकविंशतिः।
त्रयोविंशत्यङ्गुलाः स्यादरत्निस्तु प्रमाणतः।

रामवाजपेयी तु हस्त एव स्वपोड़शाङ्गेन सार्धाङ्गुलेन हीनः सार्धद्वाविंत्यङ्गुलान्यरत्निरित्याह, "बाहुर्वाअरत्नि" रिति श्रुतिदर्शनात्। तत्र कर्मण्यत्रापि हस्त एवारत्निरिति रूपनारायणः।

श्रुतौबाहुपदश्रवणात्। बाहुत्वस्य हस्तेऽप्यभावादरत्नप्राशस्त्यमात्रे तस्यार्थवादस्य तात्पर्यम्। यजमानः प्रस्तर इतिवदतः श्रौते कर्मण्यपि निर्गतकनिष्ठो मुष्टिस्त्रयोविंशत्यङ्गुल एवारत्निरितिप्रतापरुद्रः। हयशीर्षः—"अरत्निः स कनिष्ठस्तु षोऽशांश वियुक्तरः" इति कथितवानतः सार्धद्वाविंशत्यङ्गुल एवारत्निरिति नवीनाः।

छन्दोगपरिशिष्टे—

"अङ्गुष्ठाङ्गुलिमानन्तु यत्रयत्रोपदिश्यते,
तत्र तत्रबृहत्पर्वग्रन्थिभिर्मिनुयात्सदा।"

बृहत्पर्व—अङ्गुष्ठाग्रम्। ग्रन्थिस्तन्मूलरेखा, बौधायनः—

"मध्याङ्गुलकूर्परयोर्मध्ये प्रामाणिकः करः।"

शारदा तिलके—

"कर्तुं र्दक्षिणहस्तस्य मध्यमाङ्गुलिपर्वणः,
मध्यस्य दैर्घ्यमानेन मात्राङ्गुल मितीरितम्।
यवानामष्टभिः कृत्स्नं मालाङ्गुलमितिस्मृतम्।"

अत्र पर्वपदेन ग्रन्थिद्वयान्तरालमुक्तम् गौणवृत्त्या, मुख्यस्तु ग्रन्थिरेव पर्वपदार्थः। कोशे—पर्वपदस्य सन्धिपर्यायमध्ये पाठात्। अत्र मात्राङ्गुलमेवमानाङ्गुलम्। पृथिगभिधानन्तु तस्याष्टमोभागो यव, इति लाभाय। मात्राङ्गुलमानाङ्गुलयोर्भेदे तु वाकार श्रवणं स्यादिति राघवभट्टः। महाकपिल पञ्चरात्रे—

"वातायनपथंप्राप्य येभान्तिरविरश्मयः,
तेषु सूक्ष्मा विसर्पन्तो रेणवः परमाणव ।"

परमाणोरष्टगुणस्त्रसरेणु रुदाहृतः । तेऽष्टौ केशाह्वयास्तेऽष्टौलिक्षा यूका तदष्टकम्, तदष्टकंयवस्तेऽष्टा वङ्गुलिः समुदाहृता । सातूत्तमाङ्गुलिः सप्त यवा सैव तु मध्यमा । षड्यवासाधमाप्रोक्ता मानाङ्गुलमितीरितम् ।" अत्राष्टभि स्त्रसरेणुभि रारब्धो रथरेणुरन्यत्रोक्तोऽत्राप्यनुषञ्जनीयः ।

वस्तुतस्तु अत्रमते रथरेणुरेव त्रसरेणुरिति व्यवहृतः । एवं यवाष्टकं, यवकं सप्त, यवषङ्कं चेति त्रिविधं मानाङ्गुलम्, तदारम्भकायवास्तु पुराणादिपरिनिष्टित प्रमाणकानां क्षेत्रप्रतिमालिङ्गादानां हस्तादि परिकल्पनया ज्ञातुं शक्यन्ते, नहीदानीं त्रसरेण्वादि प्रक्रमेण घटनया यवनिर्माणे शिल्पिनः प्रभवन्ति । तथा—

"विन्यस्तैस्तिर्यगष्टाभि र्यवैर्मानान्तराङ्गुलम्,
शालिभि र्वा ऋगन्यस्तै स्त्रिभिर्मानान्तरं भवेत् ।"

अत्र यवाः शालस्यश्चसम्भवदधिक परिमाणा ग्राह्याः । अन्यथा यवानां नाना प्रमाणकत्वा दनध्यवसायापत्तेः ।

इदमपि मानान्तराङ्गुलं त्रिविधम्, तदुक्तं सिद्धान्तशेखरे ।

"अष्टभिश्चाङ्गुलं तिर्यग् यवानामुत्तमंस्मृतम् ।
सप्तभि र्मध्यमं षड्भिरेभिः स्यादधमाङ्गुलम् ।"

महाकपिलपञ्चरात्रे—

"आचार्य दक्षिणकरे मध्यमाङ्गुलि मध्यगम्
पर्वणोरन्तरं दीर्घं मात्राङ्गुल मुदाहृतम् ।"

अत्राचार्यपदं यजमानपरम् । "दानवाचनान्वारम्भण वरणव्रत प्रमाणेषु

यजमानं प्रतीयादिति कात्यायन सूत्रान्मानक्रियायामुक्तायामनुक्ते मानकर्तरि—"मानकृद्यजमानः स्याद्विदुषामेषनिश्चय" इति परिभाषणाच्च। अत्राचार्य पदस्या नाचार्ये कर्मणि मात्राङ्गुलस्याकाङ्क्षितत्वेना जहत्स्वार्थलक्षणावश्यकत्वा दनुक्त एव मानकर्ते ति प्रणिधेयम्।

अत्रापि मात्राङ्गुलिमुत्तम मध्यमाधममेदेनत्रिविधम्।

"कर्तुः स्यान्मध्यमाङ्गुल्या मध्यमं पर्व दैर्घ्यतः।
मात्राङ्गुलन्तु तच्छ्रेष्ठं पादोनं मध्यमं स्मृतम्।
पूर्वाधमधमंज्ञेयं लक्ष्माङ्गुल मथोच्यत"

इति सिद्धान्तशेखरात्। तथा—

"विनाङ्गुष्ठेनशेषाभि र्मुष्टिमङ्गुलिभिः कृतम्।
चतुर्धाविभजेदेको भागो मुष्ट्यङ्गुलं स्मृतम्।"

अत्र मुष्टिः संहत चतुरङ्गुल प्रथमपर्वणि परिमातव्यः, तथा—

"यं कञ्चित्पौरुषायामम्विभज्य दशधापुनः,
एकं द्वादशधाभागं कृत्वातेष्वेकमङ्गुलम्।
देहलब्धाङ्गुलंनाम जानीयात्तस्य तत्पुनः।"

पौरुषायामः—ऊर्द्ध बाहो पुरुषस्य दैर्घ्यम्। सच पुरुषः समः स्थितः, प्रपदोच्छ्रितो वा ग्राह्यः, यजमानेनोद्ध र्ववाहुना समस्थितेन प्रपदोच्छ्रितेन वेति कात्यायनदर्शनात्।

एवं मानाङ्गुलम्—मानान्तराङ्गुलम्, मात्राङ्गुलम्, मुष्ट्यङ्गुलं, देहलब्धाङ्गुलश्चेति पञ्चाङ्गुलानि, तैर्हस्तोऽपि पञ्चधा, एभिश्चतुर्विंशतिभि, र्हस्तः स्यादङ्गुलैः क्रमा" दिति कपिलेनैवाभिधानात्। तथा चानध्यवसायेप्राप्ते प्रत्यक्षश्रुतिमूलकतया स्मृन्तत्यराद-वलवतोकल्पसूत्रेणेतरासां स्मृतीनां बाधात्। कल्पोक्तं देहलब्धाङ्गुलं तद्वटितोहस्त श्चालौकिके कर्मण्युपा-

देय इत्यभिप्रायेण। "समस्थिते वा प्रपदोच्छ्रिते वा य ऊर्द्ध्वबाहौ न विपश्चर्मोऽशः। हस्तः स तस्याप्यजिनांशकोऽत्राङ्गुलं यवस्तस्य नवोऽष्टमस्त्वि"ति रामवाजपेयी निरबोचत्। कल्पसूत्रं श्रौतकर्म विषयकम्, तेनश्रौत यज्ञे देहलब्धाङ्गुलमेवोपादेयम्। स्मार्तकर्मण तु छन्दोगपरिशिष्टोक्तबृहत्पर्वग्रन्थिभिरङ्गुष्ठः। बौधायनोक्तश्च मध्यमाङ्गुलि कूर्परान्तरालरूपो हस्तोग्राह्यः। तन्त्रिकेकर्मणि तु मध्यमाङ्गुलि मध्यमपर्व दैर्घ्येणाङ्गुलि स्तेन च हस्तोनिर्मातव्यः। इति प्रतापरुद्रो व्यवतस्थे। महाकपिलपञ्चरात्रे तु व्यवस्था कण्ठत एवोदाहृता।

तथाहि–"तच्छायः प्रतिमायाः स्यान्महामानाङ्गुलाश्रयः।" "महामानाङ्गुलिरिति मात्राङ्गुलिरिहोच्यते।" मात्राङ्गुलिः मध्यमामध्यमपर्वायामः। "प्रासादादींश्चतेनैव कुर्यान्मानान्तरेण वा।" तेनैव–मात्राङ्गुलेनैव मानान्तरेण-तिर्यग्व्यवष्टब्धसाध्याङ्गुलेन,

"वेदिकापीठ शिविका रथादीनांविधिः पुनः।
मानान्तराङ्गुलेनैव भवन्मान्येन केनचित्।
यागोपकरणानाञ्च कुर्यान्मानाङ्गुलेन वै।"

"यागोपकरणानां शिलाचमस दृषदुपलादीनां विधिमितिशेषः। मानाङ्गुलेन–त्रसरेण्वादि क्रमनिष्पन्नेनाङ्गुलेन। "होमाङ्गानि स्रुवादीनि, कुण्डं मुष्ट्यङ्गुलाश्रयम्।"

अत्र सिद्धान्तशेखरे–

"प्रासादादिषु लिङ्गेषु मानाङ्गुल मुदाहृतम्।
मात्राङ्गुलं तु कुण्डादौ गृहोपकरणादिषु।"
लब्धाङ्गुलेन कुर्वीत प्रतिमावयवं बुधः"

इति कुण्डादौ मात्राङ्गुलस्य विनियोगो निर्दिष्टः। लब्धाङ्गुलेन देहलब्धा-

ङ्गुलेनैव प्रतिमाङ्गानिकल्पये "दितिमहाकपिल पञ्चरात्रोक्तेः ।

अत्र देहलब्धाङ्गुलमप्रतिमाया एव न यजमानस्य,

"गृहीत्वा प्रतिमायामं तत्तुनाङ्गुलिसंख्यया ।
विभज्यतेषुभागैकंतदा वै लब्धमङ्गुल"मिति ।

सिद्धान्तशेखर वाक्यात् । एवञ्च मुष्ट्यङ्गुलं मात्राङ्गुलमितिद्वयं कुण्डादौ यदृच्छया विनियोज्यम् । यं कञ्चित्पौरुषायाम मित्यादिनोक्तम् । देहलब्धाङ्गुलन्तु प्रतिपुरुषं भिन्नम् । विनियोगाकाङ्क्षायां कुण्डादा वप्युपतिष्ठतएवेति । मुष्ट्यङ्गुलमात्राङ्गुल पौरुषायाम लब्धाङ्गुलानि त्रीण्यपि विकल्पेन कुण्डादावुपयुज्यन्तेति कुण्डसारिणीकारः ।

यत्तु तन्त्रराजे ।

मध्यमाङ्गुलिमध्यस्तु पर्वणः परिणाहनः ।
तृतीयांशो भवेदत्र तन्त्रे सर्वत्रचाङ्गुलि ॥"

रिति मध्यमामध्यग्रन्थि परिधितृतीयांशोऽङ्गुलिरित्युक्तम् । तदपि-मुष्टयङ्गुलमेव । तै श्चतुर्भिर्मवेन्मुष्टि" रिति तेनैवाभिधानात् । परिमाण योग्यविसम्वादाच्चेतिदिक् ।

हस्तानाञ्चातुर्विध्यं तेषां विनियोगश्चोक्तः सिद्धान्तशेखरे ।

"चतुर्विंशतिमात्राढ्यः किष्कुहस्त इतिस्मृतः ।"
"एकविंशतिमात्रोच्चः प्राजापत्य करोमतः ।"

मात्राङ्गुलिस्तथा । "षड्विंशत्यङ्गुलोहस्तो धनुर्मुष्टिरितिस्मृतः ।

"सप्तविंशति मात्रोत्थो धनुर्ग्रहइतीरितः ।
किष्कुहस्तेनकुर्वीत शयनासन मानकम् ।
वृहाप्रासादलिङ्गानि प्राजापत्येन कारयेत् ।

ग्रामखेटपुरादीनि धनुर्मुष्टिकरेण च ।
धनुर्ग्रहेण कुर्वीत क्षेत्रमानं च योजनम् ।"

खेटः—कर्षकग्रामः ।

सन्तिचान्या अपि सिद्धान्तशेखरोक्ताः संज्ञाः ।

"एव मङ्गुलमाख्यातं द्वयङ्गुलं गोलकं स्मृतम् ।
त्र्यङ्गुलं तु कलाज्ञेया भारः स्याच्चतुरङ्गुलः ।
षारकं चाष्टभिर्भागैः पदं स्याद्द्वादशाङ्गुलम् ।

तालं मुखञ्च तज्ज्ञेय" मिति प्रकृतोपयोगि संज्ञाद्वयं त्रसरेणु रथरेणु वालाग्रं तदनुलिक्षा च, यूकायवोऽङ्गुलंपरमाणोः क्रमशोऽष्टगुणितानीति वाजपेयिनां निबन्धाः ।

अथ प्राची साधनम् । तत्र समेशंकुं निखाय शङ्कुसमितयारज्वा मण्डलं परिलिख्य यत्र लेखयोः शङ्कुग्रच्छायानिपतति तत्र "शङ्कून्निहन्ति सा प्राची" ति शुल्वसूत्रे कात्यायनेन भूमिप्रदेश साम्यस्य प्रथमोद्दिष्टत्वेन तदीयंपरिकर्म प्रथमतः कर्तव्यम् । तदवधारणोपायो-यथा—समस्तौल्यदीर्घयोः सरणयोः कीलेन प्रोतमूलगोर्दण्डयोरग्रनिकटे तथाविधमपरंदण्डं तिर्यक्क्रमेण कीलकाभ्यां योजयित्वा तन्मध्ये चिह्नंकृत्वा दण्डत्रय संयोगात् त्रिकोणाकारमिदं दारुयन्त्रं भूमेरुपरिस्थापयित्वा कीलेनयोजितं दण्डयोर्मूलमुत्क्षिप्य तन्मध्यरन्ध्रेनिवेशित मग्रप्रोतगुरुगुटिकादिकं लम्बसूत्रमधःपातयेत्

यथातत्सूत्रं भूमौ न पतति तथा लम्बपरिमाणं कर्तव्यम् । स लम्ब गुणोयदि तृतीयदण्डमध्यचिह्नेऽवलम्बते तदा समाभूर्नचेद्यगोऽवलम्बते साभूमिः पूरणीया । इतराबा तक्षणीया, यथावलम्बसूत्रं त्रिर्यगदण्ड मध्य-

चिह्नमवलम्बते, तथा विदध्यादिति तदिदमस्माभिः कुण्डमण्डने निबद्धमभूत्। साम्यभूमेः प्रकृतिर्वैषम्यं जनविमर्दकालादेः। तां प्रकृतौस्थापयितु यज्ञियदेशं समीकुर्यात्।

"द्वोदण्डौ शूल्माग्रौसरलौ कीलेनयोजयेन्मूले।
मूलान्तरालविवरेलम्बं सूत्रंनिवेशयेदनयोः।
तल्लम्बसूत्रमवनेः पृष्ठेनयथापतेत्तथासिनुयात्॥"

अयसः शकलं तच्चागुढ़कम्वा गुणमुखे नियुञ्जीत।

"अग्रसमीपे दण्डौ तिर्यग्दण्डान्तरेण युञ्जीत।
भूमेरुपरित्यस्रं क्षेत्रं भवतित्रिभिर्यथादण्डैः।
तिर्यग्दण्डसमान तदुद्गमचिह्नेनिपातयेत्तुलम्बम्।
यदितत्र पतति लक्ष्मणि तदासमाभूर्न चेद्विषमा।
तां लम्बवलनभागे मृदन्तरेणाभिपूरयेदथवा।
तद्भागमुद्धरेदिति समीकृताकर्मयोग्याभूः।"

निविड़प्रदेशेतु प्रकारान्तरेणापि भूसाम्योन्नयनोपायः कुण्डमण्डने दर्शितः।

"कुट्टिमघनादिभूगोलमध्येच्छिद्रं शनैर्द्रवद्वस्तु।
तुल्यं प्रसरतिपरितो यदि तर्हि भवेत्समाभूमिः॥"

यज्ञभूमिः स्वाभाविकभू पृष्ठादुन्नताविधेया, तदवोचं कुण्डमण्डने।

"एवं समीकृते स्थलपृष्ठादर्काङ्गुलोत्सेधे।
हस्तोच्चे वा देशे मण्डपविधयेदिशः साध्यः॥"

सिद्धान्तशेखरे।

"स्थलदर्काङ्गुलोत्सेधं मण्डपस्थल मीरितम्।"

महाकपिलपञ्चरात्रे।

"उच्छ्रायोहस्तमात्रंस्यात्स्वसमश्च सुशोभनम्।"

तत्र समेशङ्कुंनिखायेति कात्यायनसूत्रे, शङ्कुस्वरूपमुक्तम् । कुण्डमण्डने "मूले तर्काङ्गुलपरिणाह मथद्वादशाङ्गुलोत्सेधं । सूच्यग्रमव्रणमृजुं शङ्कुं भूमौस्थिरं न्यसेत्, तर्काङ्गुलपरिणाहं षड़ङ्गुलसूत्रवेष्टनयोग्यस्थौन्यमुत्सेधः ।" उच्चतास्यशङ्कोरधस्ताद्भूनिखनयोग्या सूचीघटनीयेति केचित् ।

तदुक्तं तत्रैव ।

तस्यस्थैर्यायपरे मूलाधस्तात् षड़ङ्गुलां सूक्ष्माम् ।
"सूचीं घटयन्तिभुवोगर्भे निखनन्ति शुल्वविदः"

निखननं चास्य शकुनपरीक्षापूर्वकं कर्त्तव्यम् तदुक्तं संग्रहे ।

"मोक्षकौशेय कार्पासं प्राणिवालजमेव वा ।
चतुर्यवपरीणाहं सूत्रंशङ्को तु वेष्टयेत् ।
वेष्टमानं यदासूत्र शङ्कु मुञ्चतितत्क्षणम् ।
क्षत्रस्यमरणं विद्याच्छिन्नेवैश्यविनाशनम् ।"

शङ्कुवेष्टनसूत्रस्य सद्योविमोकेक्षत्रियाणां, छेदे वैश्यानां नाशइति राष्ट्रस्यैवाशुभं सूचयति । तथा—

खोदिरंविन्यसेच्छङ्कु द्वादशाङ्गुल सम्मितम् ।
निश्चलीकृत्य हन्तव्य गृहीत्वा लौहमुद्गरम् ।
अष्टधा च स्वयं हन्यात् प्रशस्तं क्रमशोलघु ।
हन्यमाने महाशङ्कौ हस्तात्पतति मुद्गरः ।
तदाताड़यितुः शोको जायते दुस्तरोमहान् ।"

अनयोरशुभसूचकयोरुपनिपाते प्रायश्चित मुक्तं तत्रैव,

"तत्रापि नारसिंहेन होमेनाशुभनाशन"मिति ।

शङ्कु सम्मितया रज्वामण्डलं परिलिख्येति कात्यायनः ।

अत्र पादोनशङ्कु मितया रज्वा द्वितीयमपि मण्डलं परिलिख्या शङ्कुसरलतां परीक्षन्ते। तदुपपादितं मया कुण्डमण्डने—

"पादोनशङ्कु तुङ्गिममितया रज्वा प्रकल्पिते वृत्ते।
मध्ये स्थितस्य शङ्कोरवक्रभाव परीक्ष्येत।
वृत्तपरिधिसंलग्नाः पादाधिक शङ्कोर्भङ्गिमोत्सेधाः,
सरलावेणुशलाकाः परितः शङ्कोर्मुखे योज्याः।
अन्यून नतिरिक्ता यदिशङ्कवग्रेण संघटन्ते ताः।
तर्हि सशङ्कुसरलो न तत् पुनस्तत्क्षणादिनाशोध्यः॥"

अत्र शलाका इति बहुवचनं परित इति चाविवक्षितार्थकमेव, एकयापि शलाकयोपपत्तिसिद्धेः। उपपत्तिरप्युक्ता तत्रैव।

"अत्रोपपत्तिरस्मिंस्त्र्यस्रक्षेत्रे भुजश्चतुर्भागः।
शङ्कुत्सेधः कोटिर्वृत्तव्यासार्धभूस्त्र्यंशाः।
भुजवर्गः षोड़श नवकोटेर्वर्गस्तयोर्द्वयोर्योगात्।
लब्धं मूलं भागाः पञ्चशलाकात्मकः कर्णः।
भुजकोटिवर्गयोगान्मूलं कर्णः स इज्यतेयस्मिन्।
त्र्यस्रे चतुरस्रे वा तत्समभुज मुच्यतेक्षेत्रम्।"

अत्र शङ्कूत्सेधाङ्गुलानि द्वादश १२) तस्यभुज इति संज्ञा। व्यासार्ध पादोनशङ्कुस्तदङ्गुलानि(९), तस्य कोटिरिति संज्ञा।

इष्टाद्वाहोर्यः स्यातत्स्पर्शिन्यां दिशीतरोबाहुः
त्र्यस्रे चतुरस्रेवा सा कोटिः कीर्तिता तज्ज्ञै।"

रिति भास्कर पाटी परिभाषणात्। भुज १२, कोटयो ९, स्त्रिभिरपवर्ते जातम ४,३, तयोर्वर्गौ १६,९, सदृशाङ्केनगुणनमेवद्विवर्ग स्तद्योगः २५।

तस्य मूले त्र्यङ्गुला भागाः ५, स एवकर्णः. सचेच्छलाकास्वरूपेण संघटते, तदास्य क्षेत्रस्य शङ्कुस्वरूपभुजसाम्यमुन्नीयते। नहि विषमभुजे गणनागतः कर्णः सम्बदतीतिवाक्यार्थः। "एवं स्थिरतां नीतेशङ्कौ शङ्कवधिक मानया रज्वा। अथवा कर्कटकेन क्षेत्रे वृत्तान्तरं घटयेत्। कर्कटकः—प्रयत्न प्रसारणीयकोटिकः सन्दंशविशेषः शिल्पिनां प्रसिद्धः। शङ्कुस्थिरीकरणवृत्तघटनयोः पौर्वापर्यमविवक्षितम्। किन्तु वृत्तं घटयित्वा तत्केन्द्र प्रत्युप्तकेन्द्रकस्यशङ्कोः स्थापनं युज्यतेप्रयोगसौकर्यात्।

"तत्समेभूतलेकृत्वां वृत्तंभ्रमणरूपतः।
तन्मध्यविन्दौ शंकुंतं स्थापयेद्द्वादशाङ्गुलमिति"

तन्त्रराजे।

कृत्वाभूमि समां तत्र वृत्तं हस्तमितंसमम्।
द्वादशाङ्गुलमानोच्चं शङ्कुं खदिरनिर्मितम्।
अलाभे याज्ञवृत्तं वा तत्र संस्थापयेत्सुधीः।"

इति क्रियासारे च मण्डलकरणानन्तरमेव शङ्कुस्थापनाभिधानाच्च। इति शङ्कवधिकमानया रज्वेति न युज्यते, शङ्कुसम्मितया रज्वा मण्डलं परिलिख्येति कात्यायनविरोधादितिचेन्न। कात्यायनीयशङ्कुसम्मितपदस्य शङ्कुपरिमाणव्यवच्छेदमात्रे तात्पर्यात्।

अन्यथा यदा दक्षिणायने नराधिकैव मध्याह्नेऽपिछाया तदा मण्डले शंकुच्छायाप्रवेशनिर्गमयोरसम्भव एवेत्याशयेन शङ्कवधिकमानत्वाभिधानात्। कुण्डमण्डने—

"तस्मिन्वृत्ते शंकुच्छाया प्रविशतियतस्तिमिस्तत्र।
निस्सरतियत्र तत्रद्वितीयतिमिरेव मान मेषौ।

अनयोस्तिमयोर्मध्ये सम्मितमास्फालयेद्दृढंसूत्रम् ।
सप्राक्प्रत्यग्गुणइतिसिद्धे प्राची प्रतीच्यौद्वे ।"

तिमिरिति झषइतिमत्स्यपुच्छाकाररेखाद्वयसंयोगस्य संज्ञा, सम्मितमिति सम्पातस्थानमतिसूक्ष्ममनतिक्रम्यनिवेशितम् । कुम्भसम्भव :—

"षोड़शाङ्गुलि समुद्भववृत्ते द्वादशाङ्गुलक कीलकमाग्रम् ।
यत्र चुम्बति धृतंस्थल युग्मे तत्र पाशिशतमन्यु दिशौस्तः ।"

षौड़शाङ्गुलिसमुद्भवं तावन्मितव्यासार्धंनिर्मितं घृतविहितम्, इदंभाग्रविशेषणम् ।

तत्रेवं चिन्तनीयम् छायाप्रवेशस्थानात् तन्निर्गमस्थानं प्राचीतिसिद्धयतु, परन्तु निर्गमस्थानात्प्रवेशस्थानं पश्चिमादिगिति न सङ्गच्छते । लङ्कादिनिरक्षदेशादन्यत्र प्राक् प्रत्यक्प्रदेशयोरेकसूत्रानन्तभावात् । प्राची प्रतीच्यौ हि विचित्रसंस्थे इति सिद्धान्तशिरोमणौ निपुणमुपपादितत्वादिति पाशिशतमन्युदिशौ स्त इतिसिद्धे प्राचीप्रतीच्यौद्वे इति चोक्तमवद्धं प्रतिभाति, तथापि पश्चिमदिक्सिद्धये पृथक्परिश्रमो न कर्तव्यः । किन्तु प्राचीसाधकसूत्रपातपश्चाद्भागेन प्रतीची व्यवहरणीयेत्युक्तमस्माभिः कुण्डमण्डने । यद्यपि यस्मादेशाद्योदेशः प्राक् ततो न स प्रत्यक् ।

उज्जयिनीतः प्राच्यां यमकोटिः कोणगा ततोऽवन्ती,
इत्थं निरक्षदेशादन्यत्र विचित्रसंस्थितीदेशौ ।
प्राक् प्रत्यञ्चाविति कथमिहतन्त्रा दैन्द्रवारुणौ सिद्धौ ।

तदपि स्वल्पान्तर मित्युपेक्ष्यते वारुणो पृथक्सिद्धिः स्यादन्तरं तथापिप्राक् समसूत्रेण पश्चिमद्वारम् । अस्यां स्थूलप्राच्यां तन्त्रराजाद्युक्तायां कात्यायनसूत्रितायाञ्च विप्रतिपद्यन्ते ज्योतिर्विदः । आत्तिसंहि कुण्डमण्डने-नन्वर्कस्य प्रतिलवमुत्तर दक्षिणगतिर्गणितसिद्धा ।

"छाया प्रवेशनिर्गमघटीभिरपि सानशक्यतेच्छेत्तुम् ।
छायाप्रवेशनलबे यत्र स्वसूत्रे स्थितः सहस्रांशुः ।
छायानिर्गमसमये तिर्यक्तस्माद्गतस्तिष्ठेत् ।
छायापि तर्हितिर्यक् प्राक् चक्रमतीत्यवर्तेत ।"

इत्थं सूक्ष्मप्राचीसाधनमतिदुःशकं भवेदितिचेत्, छेत्तुम्—अपलपितुम् । पुस्
इत्थमिति । यदि—

"रवि रविरत पश्चिमाभिमुखभ्रममुद्ग्रहगोचरः ।"

यत्तु—गतिः शुद्ध पत्यङ्मार्गेणसञ्चरे त्तथासति छायापि प्राक्सूत्रं नातिक्रामेत् । ननु एवमस्ति, परन्तु ग्रहगणितानुपातसिद्धपात शक्ति-परतन्त्र प्रसर्पणो भगवान् भास्करः प्रतिक्षणमयनपक्षमाक्रममाणः क्रमेण तिरश्चीनामेवगतिमाश्रयते । तथाच प्रवेशावधिक प्राक् सूत्रमतिक्रम्यैव छायाप्रवेशनिर्गमान्तरालघटीभि रयनविलोमभागे निर्गच्छेदिति सूक्ष्मा प्राची कथमुन्नीयेतेति वाक्यार्थः ।

अत्र वदन्ति—"छाया प्रवेशनिर्गमघटीर्गणितसिद्धाः पूर्वापरदिन (छाया) द्युतिनिर्गम भुविभागहता, षष्ट्याविभजेल्लब्धैर्भागैः प्राक्सूत्र-मुत्तरावरतः । सञ्चारयेदयनदिशिभागः पुनरैच्छिकोभुवः कल्प्यः ।" यदा पूर्वा(ह्ने) छायावृत्ते प्रविशतियदा चापराह्ने ततो निःसरति । तदुभयान्त-रालघटिकाज्योतिः शास्त्रानुसारेण गणयित्वास्थापनीयः । तदुत्तरदिने अपराह्ने छायानिर्गमप्रदेशो निरूपणीयः । पूर्वापर दिनच्छायानिर्गम प्रदेशयोरन्तरालस्य स्वेच्छया त्रिचतुर दशद्वादशादिका भागाः कल्पनीयाः । तै र्भागैश्छायाप्रवेशनिर्गमान्तरालघटिकाः पूर्वानीता गुणनीयाः षष्ट्या च भजनीयाः लब्धाभागाः पूर्वदिवस प्राचीस्थानादयनदिशिवर्धनीया, तत्र

चिह्नं दत्त्वा पूर्वदिवसागत प्रतीचीचिह्नमारभ्य वर्धितदेशचिह्ने प्राक् सूत्रं चालयेदित्यविसम्वादिनी प्राचीसिद्धयति ।"

तदुक्तं क्रियासारे —

"दिनान्तरेऽपि देवेशिप्रागवच्चिह्नद्वयं सुधीः ।
कृत्वावृत्तेतुयत्रस्या च्छायायाः परमेश्वरि ।
प्रवेशानिर्गमश्चैव तत्र पूर्वदिने यदा ।
प्रविष्टानिर्गताछाया यदा तन्मध्यनाड़िका ।"
"छायादिनात्तु विज्ञाय छायापगमचिह्नयोः ।
अन्तरं दिनयोरिष्ट्यैश्चतुराद्यैर्विभाजकैः ।
विभज्यतत्रचिह्नानि कृत्वाताभिः सुरेश्वरि ।
नाड़ीभिः कल्पिताभ गा गुणणीया सुरेश्वरि ॥
षष्ठ्याः कृतेऽत्रलब्धांशैः पूर्वेद्युर्यत्कृतंभवेत् ॥
प्राचीसूत्रं पूर्वभागे उत्तरेउत्तरायणे ।
अयने दक्षिणेचैव दक्षिणस्यांदिशिध्रुवम् ॥
चाल्यते चेत्स्फुटासास्यात्प्राची तु परमेश्वरि ।"

वाजपेयिनाप्युक्तम्—

"द्युतिप्रवेशापगमान्तराल, घटीहतंस्वोपगमान्तरालम् ।
प्रक्लृप्तभागं षडसच्छिदाप्तां सेनायनांशे चलितेन्द्रकाष्ठ ॥"

कुण्डमण्डने—अत्रोपपत्तिरेषा यदि षष्ठयादिन घटीभिरेतावान् भागश्छायालङ्घयः स तर्हि कियान द्विघटिकाभिः । इत्यत्र त्रैराशिकविधि-कल्पनमेवमस्य विन्यासः ।

"आद्यन्तयोस्त्रिराशावभिन्नजातीय प्रमाणमिच्छा च ।
फलमन्यजातिमध्ये तदन्त्यगुणमादिना विभजेत् ।"

इति पाटीगणितक्रमसिद्धः प्राचीविभाग इति ।

अत्र प्रमाणम् ६०, दिवसेषु नियताघटिकाः षष्टिः इच्छा तु छायाप्रवेशनिर्गमान्तरालघटिका अनियताः पञ्चदशादिकाः । फलन्तु निर्गमप्रवेशयोरन्तरालभागाः पञ्चादिकाः, न्यासः प्र ६० फ५ इ१५ इच्छाहतंफलं ७५, षष्ठया भक्तेलब्धौ भागाः ५।४ इदंस्थानमयनविपरीतदिशि दृश्यमानंपरिमोयाय नदिशिसञ्चारणोयमिति । परिनिष्ठितमेकाहसाध्यं प्राचीचालनमाह—कुम्भसम्भवः ।

"सिंहात् कुम्भन्त्रिभप्राचीं यूकायुग्मेन चालयेत् ।
एकयायनदिश्युष्णिवृश्चिके कर्कटे मृगे ॥"

सूत्रितमिदं मतं कुम्भसम्भवेन, विवृतन्तु कुण्डमण्डने । अन्ये तु—

"पूर्वसिद्धांस्थलां प्राचीन्नचालयेद्वृषे मिथुने च ।
किन्तु सिंहेकन्यातुलयोश्च याम्यदिशम् ।
कुम्भे मीने मेषेद्वेयुके शशिदिशं नयेत्सूत्रम् ।
उत्तरदिशि मृगवृषयो र्दक्षिणदिशि कीटकर्कटयौः ।
यूकामात्रं प्राचीसूत्रं संचाये मित्याहुः ।"

त्रिकाण्डमण्डने—

"श्रवणस्योदयेप्राची प्राची वा कृत्तिकोदये ।
चित्रास्वात्यन्तरेवापि साधयेद्ध्रुवोडुना ।
एतत्प्राच्या दिशो रूपं युगमात्रोदिते सति ।

युगम्—ऋक्षीनामेकनक्षत्रारम्भकताराणाम् मध्ये प्रथमदृश्यातारा । ऐतिह्यं—चित्रास्वात्योरन्तरालम प्राची न तदादित्योजहाति । एतदन्तरालज्ञानप्रकारस्तूपपादितः कुण्डमण्डने ।

अन्येतु सूक्ष्मवक्त्रं नलिकाद्वितयं निबद्धदृढ़मूलम् दण्डान्तरेण ऋजुना त्र्यस्राकारं प्रकुर्वीत। "लक्ष्णां कौशलवशतो निवारितछिद्रमुद्रणे नलिकोयुगपच्चित्रास्वाती दर्शनयोग्ये यथा भवतः। मध्येऽङ्कयेच्च तिर्यङ्न्यस्तेदण्डे क्षमान्तरे योगात्।" अथ नलिकारन्ध्रयुगन्यस्ते नाक्ष्णास्थिरं निरीक्षेत। दृष्ट्वा चित्रास्वात्यौ त्र्यस्रमुखाद्दण्डमध्यचिह्नाच्च। गुटिकामथवा लम्बं निपातयेद्भुविलिखेन्मत्स्यौ।" तत्र प्राचीसूत्रं न्यसेदितिसाधयन्तिशक्रदिशम्।

तत्रापिसूक्ष्ममन्तरमस्तीतिक्षेत्रगणनविदः। त्रिकाण्डमण्डने—

"चित्रास्वात्यन्तरे प्राची दक्षिणापथवासिनाम्।
प्राचीतु कृत्तिकाज्ञेया उत्तरापथवासिनाम्।"

कुण्डमण्डने—

"ऋजवस्तु कृत्तिकाम्बाश्रवणं वा पुष्यमथवापि।
नलिकाशुषिरान्दृष्ट्वा प्राचीसूत्रं प्रयुञ्जति।"

एवं सिद्धायां प्राच्यां चतुरस्र साधनाय दक्षिणोत्तरदिश्यवस्थाज्ञान मपेक्ष्यते। तत्र शारदातिलके—

"पूर्वापरायतंसूत्रं विन्यसेदुक्तमानतः।
तन्मध्येकिञ्चिदालम्ब्य मत्स्यौ द्वौ परितोलिखेत्।
तयोर्मध्यस्थितं सूत्रं विन्यसेद्दक्षिणोत्तरम्।
द्वाभ्यांद्वाभ्यांतथाग्राभ्यां कोणेषु मकरांल्लिखेत्।
मत्स्यमध्यस्थिताग्राणि तत्रसूत्राणिपातयेत्।
चतुरस्रं भवेत्तत्र चतुः कोष्ठसमन्वितम्।"

कुण्डमण्डने—

"अथाग्निकार्यं कथयामि पूजा गृहस्थकर्याद्दिशिषासवस्य ।
ईशस्य यद्वा दिशिवित्तपस्य ।
विभावसोर्मण्डपमब्धिकोणम् ।
नवहस्तमात्रमयशैलदोर्मितम् ।
यदिवा कृषीककरसम्मितं मतम् ।
रुचिरं चतुर्भिरुपबद्ध मुन्नतं कुशतोरणैः ।"

सितपरशुरामीये —

"चत्वारिंशत्करोभूरिः पञ्चाधिककरोभ्रमः ।
पञ्चाशत्करविस्तारोविपुलो विपुलाशयः ।
पूर्णहस्ताश्चतुर्द्वारा अष्टहस्ता दितस्त्रिशः ।
चतुर्विंशतिहस्तान्ता हीनमध्योत्तमाः क्रमात् ।"

यद्वा—

"द्वादशहस्ताद्या द्विहस्वाद्वृद्धितो नव ।
अष्टाविंशति पर्यन्ताः केश्चिदुक्ता मनीषिभिः ।
विप्राणां मण्डप कार्यो हस्तैर्विंशतिसम्मितैः ।
राज्ञां षोड़शः भिर्हस्तै र्हस्तैर्द्वादशभिर्विशाम् ।
शूद्राणां दशभिर्हस्तै रष्टभिर्हीनवर्णिनाम् ।
सर्वे वा सर्ववर्णानां कार्याः कार्यानुसारतः ।"

भविष्ये कोटिहोमाधिकारे—

"ततस्तु सहितो विप्रैः सूत्रयेन्मण्डपं शुभम् ।
उत्तमे शतहस्तं तु तदर्धेन तु मध्यमम् ।
जघन्यन्तु तदर्धेन शक्तिकालाद्यपेक्षया ।"

मन्त्रमुक्तावल्याम्—

"चतुर्विंशतिहस्तं वा हस्तविंशतिकं तथा।"

कुण्डमण्डने—"चतुरस्रः समकर्णो मण्डप इतिकथ्यतेगृहविशेषः। सदिगा १०, दित्य १२ चतुर्दश १४ षोड़श १६ धृति १८ नरव २० करायतः षोढ़ा। अष्टाविंशतिजिन २४ शतचत्वारिंशत्करादयः सन्ति। अन्येऽपि मण्डपास्ते होमाधिक्येन विनियोज्याः। प्रमाणं चतुरस्र मादेशादन्यदितिकात्यायनपरिभाषणात्। चतुरस्रं चतुर्द्वारम्।" चतुस्तोरणभूषितमितिसिद्धान्तशेखरवचनाच्चात्रवितानशोभितम्। अत्र पञ्चहस्तपञ्चहस्तौ मण्डपौ नित्यहोममात्रोपयोगिनौ, नतु तत्र कुण्डवेदिरचनासम्भवति, नित्यहोमे तु मण्डपमध्ये स्थण्डिलं निर्माय तत्र कतिपयाहुतिदानं सम्भवत्येव, शिवचन्द्रिकायाम्—"त्रिगुण दशकरं वा ३० पञ्चविंशत् २५ करम्वा, श्रुतिगुणशर २० हस्तंचाथवात्यष्टि १६ हस्तम्। त्रियुतदश १३ करं वा दिक १० करं रन्ध्र ९ हस्तं कुरुत मुनि ७ करं वा पञ्च ५ हस्तोन्मितं वा।"

सिद्धान्तशेखरे—

"नद्यब्धिं गिरि सत्तीर्थ पुण्यारण्यसमीपतः।
शिवक्षेत्रे शिवागारसमीपे वा शुभेगृहे।
देशे विशोधितेशुद्धे तत्र कुर्वीत मण्डपम्।
सप्तहस्तं समारभ्य मण्डपं विषमैः करैः।
कुर्यात्सप्तदशप्राप्तै रथमादिप्रभेदतः।"

शुभेगृह इति गृहपरिमितां भूमिमुत्सृज्य गृहसमीपे मण्डपं कुर्यात्।

"धाम्नो धामान्तरंत्यक्त्वा धामाग्रे यज्ञमण्डपः।
मण्डपान्तर मुत्सृज्य कर्तव्यं मण्डपद्वयम्।"

इति विश्वम्भरावास्तुशास्त्रात्। अधमादीति सप्त नवहस्तावधमौ। एकादश त्रयोदशहस्तौमध्यमौ। पञ्चदशसप्तदशहस्तावुत्तमाविति विभागः। देवोद्भवे–त्रिंशच्चतुर्विंशद्विंशत्पर्यन्तमुत्तमत्रितयम्। सप्तदशाथोविहितं त्रयोदशदशेतिमध्यमत्रितयम्। नव सप्त पञ्चच तथाधमत्रितयंमण्डपप्रमाणमिदम्। "चतुरस्रत्वंनियतम्। समकर्ण इति समबाहुत्वस्याप्युपलक्षणम्। होमाधिक्येनेति। तथा च कोटिहोमकग्रहयज्ञादावेवमहतां मण्डपानां यथाविभवमुपयोगः। दीक्षास्मार्त यज्ञपूर्णाभिषेकादौतु दशहस्तादिकाद्विद्विवृद्धयाषोढैव मण्डपाः। ये तु पञ्चसप्तनवहस्ता मण्डपास्तेवेदिशून्या नित्यहोमेविनियोज्याः।

यद्वा ते राजाभिषेक कर्मण्येवोपयुज्यते न होमे। "राज्ञां होमाभिषेकादिप्रयोगार्थन्तु मण्डपम् विदध्यान्नवहस्तेन विस्तारायामसंयुत" मितितन्त्रराजस्वरसात्। होमाभिषेको-यज्ञावभृथाभिषेकः। यानि तु होमप्रकरणीयानिवचनानि "नवहस्तमात्रमथशैलदोर्मितम्, यदिवा कृषीक करसम्मितं मत" मिति त्रिपुरासारसमुच्चये--'भूमिशुद्धिं विधायेत्थं रचयेद्यागमण्डपम्, नवहस्तंपञ्चहस्तं त्रिहस्तम्वा यथामतीति। गोतमीयतन्त्रे–"नवभिः पञ्चभिर्वापिसप्तभिर्वामितान्तरम्।" इति शारदायाश्चदृश्यन्ते। तत्रप्रथमोपात्तस्य चरमोपात्ताभ्यां विकल्पेनयोगो विवक्षितः। तथाहि समुच्चये–"नवहस्तमात्रस्यशैलदोर्योगे षोड़शकृषीककरयोगे चतुर्दशगौतमीये नवहस्तस्य पञ्चहस्तयोगे चतुर्दशत्रिहस्तयोगे द्वादश शारदायां नवानां पञ्चभिर्योगे चतुर्दशसप्तभिर्योगे षोड़शसिद्धन्ति। यदपि—

"अथपुरो विदधीतभुवःस्थली
मधियथाविधि वस्तुवलिं बुधः।
अचलदोर्मितमत्रतुमण्डपं मसृणवेदिक मारचयेत्ततः।

इति क्रमदीपिकावचनम्। तत्रापि अचलानां सप्तानां दोर्युग्म मितिव्याख्यया चतुर्दश लभ्यते। यथाश्रुते तु वेदिकुण्डादिनिर्माण मेव पिञ्चहस्तादिमण्डपे दुर्घटंस्याद्दूरेतु ऋत्विकप्रचरणमिति दशकरादयो वंशतिकरान्ताः षोढ़ैवमण्डपाः होमोपयोगिन इति सम्प्रदायानुसारीपन्थाः।

दशहस्तमण्डपे तु वेदिपश्चिमतोऽष्टाङ्गुलाधिकहस्तत्रये द्वादशाङ्गुलं पदंत्यक्का चतुश्चत्वारिंशदङ्गुलं समेखलं कुण्ड मस्य पश्चाद्धस्तमात्रा भूमिरवशिष्टा, तत्र होतुरुपवेशनम्। द्वारान्तरेणसदस्यादीनां प्रवेशः सम्भवत्येव। मुष्टिमितैकमेखलकुण्डपक्षे त्वेकादशाङ्गुलाधिकेन वाङ्गुलाधिके वा कुण्डपश्चिमदेशे सुतरांमृत्विक्प्रचरणमुपपद्यते। कुण्डमण्डने—"पूर्वेषु षट्सु दशकरमधमं द्वाद्वशकरन्तु मध्यमपि। अन्यतरस्यां प्राहुश्चतुर्दशकरस्तु सर्वथा मध्यः। षोड़शहस्तात्परतः स्युरुत्तमान्यूनहस्तमानोऽपि मण्ड५" इति केचित्। "सोऽपयधमो यत्रैकमेखलं कुण्डम्। तत्रैवाधम मण्डपविनियोगं निर्दिशन्त्यार्याः।" अन्यतरस्यां विकल्पेन तेन द्वाद्वशकरमण्डपे सति सम्भवे मध्यममण्डपधर्मा एव द्वारविस्तार तोरणायामादयः प्रयोक्तव्याः। असम्भवेत्वधमधमप्रयोगोऽपि न क्रतुवैगुण्यमिति व्यवस्थालभ्यते।

नहिगुरुलघुप्रयाससाध्ययोरैच्छिको विकल्पः सम्भवति। गुरुकल्पस्याननुष्ठानलक्षणाप्रामाण्य प्रसङ्गात्। पञ्चरात्रे—

"कनीयान्दशहस्तः स्यान्मध्यमो द्वादशोन्मितः।
तथाषोड़शभिर्हस्तैर्मण्डपः स्यादिहोत्तमः।"

सोमशम्भुः—

"कनीयान्दशहस्तः स्यान्मण्डपोऽर्क करस्तथा।

द्विहस्तोत्तरयावृद्ध्या शेषाः स्युर्मण्डपाः शुभाः ।

संग्रहे—"स्वल्पोद्वादशहस्तोऽयं द्विद्विवृद्धया ततः क्रमात् ।"

महाकपिलपञ्चरात्रे—"हस्तांस्तुद्वादशारभ्य क्रमाद्द्वौद्वौप्रवर्धयेत् ।"

प्रतिष्ठासंग्रहे—"दशद्वादशहस्तोवा द्विद्विवृद्धया ततः क्रमात् ।"

एवं विधवरस्परविप्रतिपिद्ध स्मृतिसिद्ध एव द्वादशहस्तस्य मध्यमाधमत्वयोर्विकल्पः लिङ्गपुराणे—

"विंशद्धस्तप्रमाणेन मण्डपं कूटमेववा ।
अथाष्टादशहस्तेन कलाहस्तेनवापुनः ।"

बहुस्तम्भः सभाकारः समशीर्षसन्निवेशः प्रपा । सैवमध्योन्नतावंशावलम्बित पटद्वयामण्डपः । स एव गिरिशृङ्गाकारो मध्येसमंततस्त्ववलम्बितचतुः पटत्वः । कूट इति निबन्धोरः । कुण्डमण्डने—"सप्तस्वदैर्घ्यविभागान्यासविभागैर्निहत्यवसुभिस्ततः ।" अवलुम्पेदेकाद्याः शिष्यन्तेशून्यपर्यन्ताः । ध्वजधूममृगेन्द्रस्वर्षभखरगजवायसाः क्रमादष्टौ ।" "ध्वजधूमयोः प्रशस्ता तेषां मध्येहुताशपरिचर्या ।" अवलुम्पेत्शेषयेत्, इदं शालादिहोम विषयम् । मण्डपे तु पोड़शहस्तत्वाघुपदेशान्यथानुपपत्त्या न ध्वजादिनियम इत्येके ।

यार्ङ्गिकास्तु यवयूकादिवर्धयित्वाङ्गुलगणनयाध्वजाः स्वयं सम्पादयन्ति । मत्स्यपुराणे—

"षोड़शारत्निमात्रन्तु दशद्वादश वा करम् ।
कुर्वीत मण्डपं तत्र चतुर्भद्राननं बुधः ॥"

अत्रारत्निर्हस्तएवेतिरुपनारायणः । सार्धद्वाविंशत्यङ्गुलिपरिमित इति प्रतापरुद्रः । चत्वारिभद्राणि-शोभनान्याननानि—द्वाराणि यस्येतिविग्रह इति

रूपनारायणः। चत्वारि भद्राणि भद्रैरलिङ्गैर्युक्तान्याननानि द्वाराणि यस्य तत्तथा—

"द्वारैश्चतुर्भिः परिनिर्गतैर्या,
विभूषिता सुन्दर मूर्तिरूपा।
रत्नोद्भवा सा कथिता सभयं।
भद्रंह्यनिन्दं करणीयमस्या।"

इति विश्वकर्मणाभद्रंह्यनिन्दमिति व्याख्यानव्याख्येयपदयोः सामानाधिकरण्येन निर्देशाद्भद्रानिन्दपदयोः पर्यायत्वाध्यवसायात्। अतएव भद्र युक्तान्याननानि द्वाराणियस्येति, हेमाद्रिर्व्यगृह्णादिति प्रतापरुद्रः। अथोक्त प्रकारेण मण्डपभूमिं परिगृह्य तत्र वास्तुपूजां विधाय भूम्यर्घंदद्यात्।

अपञ्चसारे—शुभकर्मणिदीक्षायां मण्डपकरणे गृहादिविधिषु तथा।
"विहितोवास्तुबलिः स्याद्रक्षाविघ्नो शान्तिसम्पदः।"

तत्प्रयोगोनिरूपयिष्यते। भूम्यर्घ्यदानेतु,

"उद्धृतासिवराहेण सशैलवनकानना।
मण्डपं कारयाम्यद्य त्वदूर्द्ध्वं शुभ लक्षणम्।
गृहाणार्घं मयादत्तं प्रसन्नावरदाभवे।"

ति मन्त्र मुदाहरन्ति। मण्डपरचनाप्रकारः कुण्डमण्डने—

"आग्नेयांसान्निर्ऋतिश्रोणीपर्य्यन्तमायतं सूत्रम्।
त्रेधा विभज्यतदिदं मध्यमभागेद्विधाङ्कयेदेवम्।
श्रोण्योः सूत्रं तद्वन्मरुतः श्रोणीतईशपर्यन्तम्।
ईशानांसादग्नेरंसावधि पातयेच्चतुः सूत्रम्॥
चत्वारि च त्रिभागान्यपराणि तथैवमध्यसूत्राणि।

चिह्नद्वयसक्तमुखान्यृजूनि चास्फालयेत्कोष्ठान्तः ।
एवं मण्डपभूमौजायन्ते कोष्ठकानि नव ।
सूत्राणां सम्पातस्थाने षूद्गर्तासकोण मारभ्यस्तम्भान्
षोड़शनिखनेत्तेषु द्वादशगुणात्तन्तुसंसक्ताः ।
करषञ्चकपरिमाणाश्चत्वारो मध्यमाः करोष्टमिताः ।
षोड़शहस्तादधिके सभव्यासे तदर्धमितदीर्घाः ।
सर्वेऽपिसारदारुप्रभवा स्त्र्यङ्गुलयवाधिकव्यासाः
येन दशाङ्गुलपरिधय इमेभवेयुस्तथा कुर्यात् ।
अत्र सूत्रपातनादेवारम्भ आग्नेयदिशिनियतः ।
स्तम्भोच्छ्राये शिलान्यासे सूत्रयोजनकीलने ।
खननावटसंस्कारे प्रारम्भोवह्निगोचरे ।"

इति स्मरणात् ।

समत्रिभागानिमध्यमभागो भयतश्चिह्नद्वययुक्तानि, चत्वारि सूत्राण्याग्नेयकोणमारभ्य प्रादक्षिण्येन कोणात्कोणावधि पातनीयानि । प्राक्पश्चिमदक्षिणोत्तरचिह्नत्वं द्वारसक्ताग्राणि चत्वारिचापराणि कोष्ठनवक सम्पादकानि सूत्राणिन्यस्येत, तत्र सूत्रसम्पातस्थानेषु षोड़शस्तम्भा निखातव्याः । तदुक्तं सारसंग्रहे—

"ततो मण्डपसूत्रन्तु त्रिगुणंपरिकल्पयेत् ।
पूर्वादिषु क्रमात्तस्यमध्यभागस्तु वेदिका ।
इष्टिकाभि र्मृदावापि कार्या दर्पणसन्निभा ।
वेदिकोणेषु विन्यस्याः स्तम्भा वेदस्वरूपिणः ।
तेचोत्तमे तदर्धोच्चामध्यमाधमयोः पुनः ।

अष्टहस्तोन्नतिभृतस्ततोद्वादश शोभनाः ।
ऋजवः पञ्चहस्तास्ते सशिखास्तु समन्ततः ।
चतुष्कोणेषु चत्वारश्चाष्टौते सूत्र कोटिषु ।
समान्तराला: सर्वेते स्थाप्याः षोड़शदैशिकैः ।"

ननु सूत्रसम्पातस्थानेषु स्तम्भानां परिधिस्पर्शमात्र मपेक्षते । मध्यकेन्द्र स्पर्शो वा आद्ये समान्तरालत्वव्याकोपः मध्यमयोराग्नेय नैर्ऋत स्तम्भयोरेकं कोष्ठकमन्तराले प्राक्पश्चिमस्तम्भिकाभ्यांसह तयो स्तन्न्यून-मन्तरालमितिवैषम्यात् । द्वितीयपक्षे तु स्तम्भार्धं मध्यमकोष्ठकोण माक्रा-मतीति वेधाश्चतुष्कोणत्वव्याकोपः । तदभावे — "वेदकोणेषु विन्यस्येत् स्तम्भान्वेदस्वरूपिणः । आग्नेयादि क्रमेणैव विन्यस्येद्द्वादशापिचे"ति सिद्धान्तशेखरवचनविरोधः ।

एवञ्च यत्र तुलापुरुषादौ सप्तहस्तावेदिस्तत्रमध्यमस्तम्भानामेतद्व-चनबलेन वेदिकोणनिखातानां सूत्रसम्पातस्पर्शोऽपि न सम्भाव्यते, तस्य-सम्पातस्य वेदिमध्ये पतितत्वात् । मात्स्ये तड़ागप्रतिष्ठादौ च "चतुर्हस्ता चतुष्कोण चतुर्भद्रा समन्ततः" इत्यादिना विहिता मध्यकोष्ठकन्यूना वेदिः । तत्र मध्यमस्तम्भानां वेदिकोणनिवेशे सम्पातस्पर्शो न सम्भवति, सम्पात मध्यपाते तु वेदिकोणा दूदूरमन्तरालं स्यादितिचेत् ।

अत्रवदन्ति—वेदिकोणेष्वित्यत्र वेदिकोणपदं तु मुख्यार्थकम्, य-वेदिर्नास्ति ग्रहयज्ञादौ तत्र मध्यमस्तम्भनिवेशस्थानालाभप्रसङ्गात् । "न ग्रहमखे कुण्ड मध्येमण्डपमाचरे" दितिस्मृतेः । किन्त्वौत्सर्गिकत्रिभा मितवेदिकोणस्पर्शस्थानत्वेन मध्यमसूत्रसम्पातस्थानोपलक्षकम् ।

"मध्ये स्तम्भचतुष्कं स्यात्तन्मध्येवेदिका मता ।
वेदिकोणेषुविन्यस्येत् स्तम्भान्वेदस्वरूपिणः"।

इति सिद्धान्तशेखरे औत्सर्गिकत्रिभाग वेदिकाया एवोपक्रमात्। एवञ्च सम्पातस्थानमेव स्तम्भारोपणाधिकरणं कोणेष्विति सप्तमी श्रवणात् समान्तरालता, अन्यथानुपपत्तेश्च। तत्र वेद्यभिमुखं स्तम्भावयवमुत्कीर्य तत्र वेदिकोणाः प्रवेशनीयाः। तुलापुरुषेतु—मध्यमस्तम्भानत्येति, तडागोत्सर्गादौ तु नस्पृशत्येव वेदिरितिदिक्।

पञ्चरात्रे—"सारदारुभवां स्तम्भान्दृढ़ान्कुर्याद्यजून्समान्।
मण्डपार्धोच्छ्रितान्वेदसंख्यांश्चूतान्वितांस्तथा।"

क्रियासारे—

"यज्ञियवृक्षोवेणुर्वा क्रमुकस्तम्भकर्मणि।
अन्ये विशुद्धवृक्षा वा भवेयु र्नान्यभूरुहाः।
गृहशल्यः स्वयं शुष्कः कुटिलश्चपुरातनः।
असौम्यभूमिर्जनितः सन्त्याज्यः स्तम्भकर्मणि।"

यज्ञियवृक्षास्तु ब्रह्मवैवर्ते—

"पलाशफल्गुन्यग्रोधप्लक्षाश्वत्थ विकंगताः।
उदुम्बरस्तथा विल्वश्चन्दनोयज्ञियाश्चये।
सरलो देवदारुश्च शालोऽथखदिरस्तथा।
एतेह्यर्घादि पात्राणां योनयः स्युरशेषतः।"

फल्गुः काकोदुम्बरिका, विकंगतस्तुलावृक्षः। "यज्ञियाश्चये" इत्यनेनान्योऽपियज्ञियाः सन्तीत्यभ्युपगतं भवति। "रक्षोघ्नश्च यशस्यश्च काश्मर्या पात्रमुच्यत" इत्यादिना तत्रैवगम्भार्यकोदीनां पात्रयोनित्वाभिधानात्। गृहशल्यप्रासादिगृहंभित्वानिगंतः, अन्यो विशुद्धवृक्षाः "शाकेङ्गुदी चन्दनदेवदारु श्रीपाणिबिल्वप्रियकाश्चनाना" मित्यादि मत्स्यपुराणेन तु तुला

तोरण प्रकृतितयोपन्यस्ताः पादपा ग्राह्याः इति कुण्डसारिणीकारः।

शारदोयाम्—"षोड़शस्तम्भसंयुक्त चत्वारस्तेषु मध्यमाः। अष्ट-हस्त समुच्छ्रायाः संस्थाप्या द्वादशाभित.। पञ्चहस्तप्रमाणास्ते निश्छिद्रा ऋजवः शुभा :" पञ्चरात्रे—"सारदारुभवांस्तम्भान दृढ़ान् कुर्याद्दजून्स-मान्। मण्डपार्धोच्छ्रितान्वेदसंख्यां श्चूडान्वितां स्तथा। वणिकामूर्द्धव-तस्तेषांस्तम्भद्वादशकं पुनः। वाह्येऽप्युक्तप्रमाणेन तत्र तत्र प्रकल्पयेत्।" अयं मण्डपार्धोच्छ्रायः शारदोक्ताष्टहस्तसमुच्छ्रायक षोड़शहस्तावधि मण्डप-स्तम्भातिरिक्तविषयकः पर्यवस्यति।

यत्तु शारदाकथिताष्टहस्तोच्छ्रायस्याधम मध्यममण्डपविषयकत्वा-त्पञ्चरात्रोक्तो मण्डपार्धोच्छ्राय उत्तम मण्डपविषयक इति मतम्, तत्रापि फलतो न विशेषः, मध्यममण्डपस्तम्भेष्वेव चूड़ान्वितत्वं वलिकासम्बन्धश्च कण्ठोक्तः। वाह्यस्तम्भेत्वाक्षेप लब्धाया वलिकाया उपपादकः कल्प्यमान श्चूडेव कर्णोऽपिसिद्धयतीत्यवधेयम्। सारसग्रहे तु "ऋजवः पञ्चहस्तास्ते-सशिखास्तु समन्ततः।" इति वाह्यस्तम्भेष्वपि 'शिखासम्बन्धः कण्ठन एवोक्तः। उक्त प्रमाणेन प्रकल्पयेदित्यनेन यद्यष्टहस्तप्रमाणे मध्यम स्तम्भे पञ्चहस्ता वाह्यस्तम्भास्तदा नवहस्ते कतिहस्ता इत्यनुपातेनाधिकाधिक बहिस्तम्भाः सिद्धयन्तीति सूचितमिति नरसिंह ठक्कुराः।

अत्र तोरणस्तम्भप्रकरणे श्रूयमाणे दशाङ्गुल परिणाहत्वमात्राप्यनु पजयन्ति। तत्र वृत्तस्तम्भस्य दशाङ्गुलपरिधिस्तदा सम्पद्यते यद्यङ्गुलत्र किञ्चिदधिकोऽवयवश्च तन्मध्यव्यासो भवति, एतावत्परिणाहाः स्तम्भास्त-त्तम पटलभारसहा न सम्भवन्तीत्यत उक्तं कुण्डमण्डने—"यद्वा विंशत् ङ्गुलपरिधय एते समग्रषड्व्यासाः। किम्वा दशाङ्गुलमितो व्यासोऽमी

महत्तमे छदिषि। समचतुरस्राः किम्वा वृत्ताकृतयोऽथवा समाष्टास्राः। पञ्चम नवेनभूमौविनिवेश्याः षोड़श तम्भाः। तेषां मध्यगतानां न्यस्येच्चूड़ासु सशुषिरावलिकाः। इतरेषां स्तम्भानां चूड़ास्वथवापिकर्णेषु। इत्थं सिद्धेवलिकान्यासा त्कोष्ठद्वयेषु दृढ़कीलान्। कोणात्कोणे मध्यान्मध्ये छदिषोदधीत विष्कम्भान्। अष्टसु विष्कम्भेषु छदींषि निदधीत कटमयानि ततः। उपरि तु कूटंघटयेदथवा प्रच्छादयेत्कटैः।

शारदायाम्—"तत्पञ्चमांशं निखनेन्मेदिन्यां तन्त्रवित्तमः।" पञ्चरात्रे—"पञ्चमांशं न्यसेद्भूमौ सर्वसाधारणो विधिः।" वास्तुशास्त्रे—"कटैः सद्भिस्तुपंछाद्याः विजयाद्यास्तु मण्डपा।" द्वादशहस्ताद्याश्चतुःषष्ठिहस्तान्ता विजयविभवादि नामानो मण्डपा वास्तुशास्त्रे कथिताः। कुण्डमण्डने—"मध्यमसूत्राण्यभितो द्वाराणामधममण्डपेशाखाः। एककरे द्वयङ्गुल चतुरङ्गुलवृद्धया तु मध्यमोत्तमयोः। द्वारेषु शिलानासादोरुणि कपाटमर्गलेन्द्रध्वजैः। युक्तं घटये त्तदनुच्छाद्यः परितोऽपि मण्डपो नित्या। अकपाट मनाच्छन्नं वलिपूजाविरहितं गृहं नविशेत्।"

अधम मण्डपे मध्यसूत्रोभयतो हस्तमात्रमतिक्रम्य द्वारशाखाद्वयरीक्षणेन द्विहस्तपरिमितं द्वारमुपपद्यते। मध्यमेतूभयतो द्वयङ्गुलवृद्धया चतुरङ्गुलाधिकं हस्तद्वयमुत्तमे चतुरङ्गुलवृद्धयाष्टाङ्गुलाधिकं हस्तद्वयं द्वारतिर्यक् परिमाणम्। तथाहि पञ्चरात्रे—"कनीयसि स्याद्विद्धकरं चतुरङ्गुलवृद्धितः। मध्यमोत्तमयोर्वेदी मण्डपस्य त्रिभागतः।

यत्तु—"दिक्षु द्वाराणि चत्वारि विदध्यात पञ्चमांशतः" इति मन्त्रमुक्तालीवचनम्, तदशहस्तमण्डपे योजनीयम्। सारसंग्रहे तु—"दिक्षु द्वाराणि चत्वारि साष्टाङ्गुलकरद्वयात्। यत्र्यङ्गुल करद्वन्द्वाद्वि-

दधीतकरद्वया"दिति, मध्यममण्डपे—व्यङ्गुलाधिकहस्तद्वयमिता द्वारायामः कथितः। वास्तुशास्त्रे—

"अकपाट मनाच्छन्न मदत्तबलिपूजनम्।
गृहं न प्रविशेद्राजा यदीच्छेच्चिरजीवितम्।"

द्वारतोरणस्या धरणं दारुशिला, तदुपरि दारुनामा इन्द्रबाहु रर्गलप्रवेशार्हो लोहकाक इति परिभाषितः। भित्तिर्मृण्मयी तृणमयी वा।

कुण्डमण्डने—

"द्वारेषु तोरणानि प्राच्या प्राच्यप्रतीच्य सौम्येषु।
अश्वत्थोदुम्बर जटि वटशाखोभिः प्रकल्पयेद्विद्वान्।
देहल्या बहिरेक द्वौ बाहस्तौ भुजः परित्यज्य।
पञ्चमलवैर्निखेयाः परितोऽष्टौ कथित तोरणस्तम्भाः।
ते सप्तरस शरमिता उत्तममध्यम निकृष्टभेदेन।
तच्चूडासु च फलकं स्तम्भार्धमितं विलत्रयोपेतम्।
स्तम्भयुगलान्तरालं साधं सपादद्विहस्तपरिमाणम्।"

मत्स्यपुराणे—

"द्वारेषु कार्याणि च तोरणानि चत्वार्यपि क्षीरिवनस्पतीनाम्।"

शारदायाम्—

"द्वारेषु तोरणानिस्युः क्रमात् क्षीरिमहीरुहाम्।
स्तम्भोच्छ्रायः स्मृतस्तेषां सप्तहस्तात्पृथक् पृथक्।
दशाङ्गुल प्रमाणेन तत्परीणाह ईरितः।"

अत्र न्यग्रोधोदुम्बराश्वत्थप्लवाः क्षीरि महीरुहा इति परिभाषा। अत्र

परिणाहो व्यास एव नतु परिधिः। व्यासस्य दशाङ्गुलत्व न्तु स्तम्भवृत्त परिधे रेकत्रिंशदङ्गुलतया ज्ञातव्यमिति राघवभट्टः। परिणाहः परिधिरेव मण्डपस्तम्भानामपि परिमाणाकाङ्क्षाया मिदमेव वचनमुपतिष्ठत इति बहवः।

वास्तुशास्त्रे —

"अश्वत्थोदुम्बर प्लक्षवटशाखाकृतानि तु,
मण्डपस्य प्रतिदिशं द्वाराण्येतानि कारयेत्।
पञ्चहस्तप्रमाणास्ते विस्तारेण द्विहस्तकाः।
षडङ्गुलाभिवृद्धास्तु सप्तहस्तायथोत्तमे"

तोरणान्येवात्र द्वाराकारतया द्वारपदेनोच्यन्ते। मण्डपद्वारस्तम्भानामुत्तम-मण्डपे सप्तहस्तत्वासम्भवात्। मात्स्ये—द्वारतोरणयोः पृथगुपादानाच्च। तोरणस्तम्भास्तु—यद्यत्तम मण्डपे सप्तहस्ताः कनीयसि पञ्चहस्तास्तदामध्यमे षड्हस्ता इत्यर्थात्सिद्धयति। त्रिकाण्डमण्डने—पञ्चषट् सप्तहस्तानीत्यभि धानाच्च। षडङ्गुलाभिवृद्धास्त्विति कनीयसि मण्डपेद्विहस्तान्तराला, मध्यमे षडङ्गुलाधिकद्विहस्तान्तराला उत्तमे द्वादशाङ्गुलाधिकद्विहस्तान्त-राला स्तोरणस्तम्भाभवन्तीत्यर्थः।

शारदायाम्—

"तिर्यक्फलकमानं स्यात्स्तम्भानामर्धमानतः।
शूलानि कल्पयेन्मध्ये तोरणे हस्तमानतः।"

हस्तमानतः—मण्डप हस्तमानानुसारेणत्रत्त्यम णेन। सिद्धान्तशेखरे—

"न्यग्रोधतोरणं पूर्वे याम्येत्वौदुम्बरं न्यसेत्।
पश्चिमेऽश्वत्थसम्भूत मुत्तरेप्लक्षतोरणम्॥

अलाभादेकमेवैषां सर्वाशासु निवेशयेत् ।
जम्बूखदिरसाराश्च तालवातोरणेस्मृताः ।।"

सोमशम्भुः—

"प्लक्षोदुम्बरकाश्वत्थवटजास्तोरणाः क्रमात् ।
एकमेषामलाभे तु तदभावेशर्मामयः ।
तन्त्रे मण्डपद्वारबाह्ये तेवेदिमानेन दिक्रमात् ।
प्लाक्षमौदुम्बराश्वत्थवटोत्थं तोरणं न्यसेत् ।"

वेदिमानेन–वेद्युच्छ्राय परिमाणभूत हस्तमानेन, देहलीभूवं परित्यज्येति-शेषः । हस्तमुखेनेति क्वचित्पाठः ।

महाकपिल पञ्चरात्रे—

"देवास्तोरणरूपेण संस्थितोयज्ञमण्डपे ।
विघ्नविध्वंसनार्थाय रक्षार्थं त्वध्वरस्य च ।
न्यसेन्न्यग्रोधमैन्द्र्यान्तु याम्यान्त्वौदुम्बरं न्यसेत् ।
वारुण्यां पिप्पलश्चैव कौबेर्यां प्लक्षकंतथा ।
सुशोभन न्तु पूर्वस्या मृग्वेदाद्यमिमन्त्रितम् ।
इषेत्वेति तु मन्त्रेण सुभद्राख्य न्तु दक्षिणे ।
स्वक्कर्माख्य न्तु वारुण्यां सामवेदादिकेन तु ।
सन्तोदेवीतिमन्त्रेण स्वहोत्रमुत्तरे न्यसेत् ।"

सारसंग्रहे—

"मण्डपद्वारबाह्ये तु युग्मं युग्मं दिशां क्रमात् ।
अश्वत्थोदुम्बरप्लक्षवटोत्थं तोरणं न्यसेत् ।

सप्त षट्पञ्चकरं निखनेद्भुविपूर्ववत् ।
विशालता च तस्याथ दशभिस्त्वङ्गुलैर्मता ।
मध्यभागे तोरणयो स्तिर्यक् काष्ठं प्रविन्यसेत् ।
सार्धहस्तद्वन्द्वपाद हस्तयुग्मस्तु मानतः ।।"

पादहस्तयुक् सपादहस्तयुग्मं मानम्, इदञ्च क्रमेण उत्तममध्यमाधम मण्डपविषयकं परिमाणं स्तम्भद्वयत इति मध्यभागेऽन्वेति । फलकपरिमाण न्तु स्तम्भाधमितमेव, अन्यथा शारदाविरोधात् । अन्तरोलतुल्यपरिमाणे फलके स्तम्भचूड़ासु विलप्रवेशासम्भवाच्च ।

नरसिंहठक्कुरास्तु—स्तम्भपृष्ठयो रन्तरालमेव सार्धं द्विहस्तादिकं कल्पनीयम् नतुगर्भयो रेवञ्च तावानेव फलकस्यायामो विलचूड़ाप्रवेशश्चोपपद्यत इत्याहुः । "स्तम्भानामर्धमानत" इतिशारदावचन मधममण्डपस्तम्भार्धमानेन सार्धहस्तद्वयेनोत्तममण्डपे तिर्यक्फलकमानमिति व्याचक्षाणस्य राघवभट्टस्यापीदमेवाभिसंहितमिति प्रतिभाति । विलत्रयोपेतं फलकमुक्तम्, तत्र प्रान्तविलयोश्चूड़ाप्रवेशः प्रयोजनम् ।

मध्यमविलविनियोगस्तूक्तः कुण्डमण्डने—तोरणमूर्धनि फलकायामद्वादशलवेन पूर्वादि फलकान्तविन्यस्येच्छङ्खंचक्रं गदां सरोजातम् । तत्तद्दारुप्रभवं शूलचतुष्कं निखेयमितित्यशराः । शूलं त्रयोदशैकादश नवसप्ताङ्गुलेः क्रमाद्दोर्घम् । उत्तममध्यमचरमेष्वायाम चतुर्लवस्तुविस्तारः । मध्यंशृङ्गं सबलं वक्रे द्वे फलकविलनिवेशस्तु । वेदित्रिषु त्र्यङ्गुलमित इति माल द्यास्तु तोरणभूषाः ।" वास्तु शास्त्रे—

"मस्तके द्वादशांशेनशङ्खचक्रगदाम्बुजम् ।
प्रागादि क्रमयोगेन न्यसेत्तेषां स्वदारुजम् ।"

स्वदारुजमिति तत्तत्स्मृतिद्वैधेन प्राच्यामाश्वत्थो नैयग्रोधो वा प्लाक्षोवा तोरणस्तम्भो निवेशनीयः। अन्यास्वपिदिक्ष्वेवमेव।

तथा च "यद्दारुप्रभवं तोरणं तत्प्रभवमेव चक्रादि तत्र स्थापनीयमित्यर्थः। इदं वैष्णवयागविषयम्। शैवेतु शारदायाम्–"शूलानिकल्पयेन्मंत्री तोरणेहस्तमानतः। अत्र हस्तमात्रेशूले षड़ङ्गुलोविस्तारः। तुरीयांशेन विस्तृतिरिति पिङ्गलोक्तेः। इदञ्चहस्तपरिमाणं विलप्रवेशार्थां मूलचूड़ामपहायेति राघवभट्टः।

परिमाणान्तरं तूक्तं क्रियासारे—

"तोरणं घटयित्वैव मूर्द्ध्वंशूलत्रयंन्यसेत्।
शूलेनवाङ्गुलं दैर्घ्यं तुरीयांशेन विस्तृतिः।
शेषाणां द्व्यङ्गुलवृद्धि र्वेशश्चाङ्गुल वृद्धितः।"

नवाङ्गुल मित्यधममण्डपे। शेषाणां मध्यमोत्तम मण्डपशूलानां द्व्यङ्गुलवृद्धि स्तेनमध्यममण्डपे एकादशाङ्गुलम्, उत्तमे त्रयोदशाङ्गुलमित्या याति। वेश इति अधममण्डपे द्व्यङ्गुलोविलप्रवेशः। मध्यमे त्र्यङ्गुल उत्तमे चतुरङ्गुल इत्यर्थः। पिङ्गलामते–ऋजुवै मध्यमंशृङ्ग किञ्चिद्वक्रंतु पार्श्वयोः। उभयं तत्समाख्यातं द्व्यङ्गुलं रोपयेत्सदा। इदं द्व्यङ्गुलारोपणं मध्यम मण्डपविषयम्। अत्र मूलचूड़ाशूलपरिमाणान्तर्गतैवेति निबन्धारः।

शारदायाम्–"दिक्षु ध्वजान्निधीयाल्लोकपाल (समुद्भवान्) मप्रमान्।
वितान दर्भमालाद्यै रलङ्कुर्वीत मण्डपम्।"

अत्र ध्वजानां पताकानां कलशानां निवेशः। तेषां विनियोगश्चाग्रे विस्तरेण प्रतिपादयिष्यते।

अथ वेदिः—कुण्डमण्डने । वेदी तु मण्डपस्य त्रिभागतौ मध्य-संस्थितैः स्तम्भैः संसक्तचतुःकोणा समाच सुदृढ़ाचकर्त्तव्या । शारदायाम्—

"त्रिविभागमितेक्षेत्रेऽरत्निमात्रसमुच्छ्रिताम् ।
चतुरस्रां ततोवेदीं मण्डलाय प्रकल्पयेत् ।"

क्रियासारे ।

"त्रिभागं मण्डपंकृत्वा मध्यभागे तु वेदिका ।
हस्तमानं तदुत्सेधं चतुरस्रंसमन्तथा ।
पक्वाभिर्वाप्य पक्वाभिरिष्टकाभिर्दृढ़ातथा ।
कर्त्तव्या वेदिकाश्रेष्ठा तदभावे मृदापिवा ।
अवक्रपार्श्वा सुस्निग्धादर्पणोदरसन्निभा ।"

एवञ्चात्र हस्तमात्रस्योत्सेधस्योक्तत्वात्तदेक मूलकतया शारदोक्तमरत्निपद-मपि हस्तपरम् । त्रिविभागताचात्र चतुर्णां मण्डपमध्यमसूत्राणामध्यव-सेया, तेन मण्डपनवमभाग परिमितावेदिः सिद्धयति, नवांशंमण्डपंकृत्वा मध्यांशे वेदिकामते" तिसिद्धान्तशेखरः । एवञ्च चतुर्द्वारयुक्तं ततस्तस्य मध्ये बुधस्तन्त्रिभागैक भागेनवेदिम् । अरत्निप्रमाणोन्नतां दर्पणान्तर्नि-भाभां मनोहारिणीञ्चापि कुर्यादिति त्रिपुराक्षार समुच्चयवचनमपि व्या-ख्यातम् ।

अत्र केचिद्वेद्याश्चतुः कोणतासिद्धये मध्यमकोष्ठमतिक्रम्यैव तत्कोण संलग्नं मध्यमस्तम्भ चतुष्टय निवेशयन्तः । परस्परस्तम्भानां समान्तरा-लत्व व्याकोपमपिसहन्ते । परेतु—मध्यमकोष्ठकोणे स्तम्भकेन्द्रमारोपयन्तः स्तम्भमुत्कार्य तत्रवेदिकोणं प्रवेशयन्ति, इतरेतु स्तम्भाक्रान्तस्य वेदिकोणस्य खण्डितत्वेऽप्यखण्डितमेव क्रतु साङ्गुल्यं मन्यन्ते । सर्वथैवतु मण्डपक्षेत्र-

फल नवम भागमित क्षेत्रफलावेदिः, मतान्तरन्तु खण्डितं कुण्डमण्डने ।

केचितु, मण्डपस्य क्षेत्रफलस्य त्रिभागतोयस्य, । क्षेत्रफलंसा मध्यस्तम्मानत्येतिवेदिरित्याहुः । तन्न तथासति दशकर मण्डपफलकव-शेते तृतीयांशः । त्रिंशत्त्रयस्तथैकस्त्र्यंश स्तन्मूलमृषिभुवस्त्र्यंशाः ईषत्यून स्त्र्यंशः परइति कियदुन षट्कराजाताः । तावान्व्यासोवेद्या यदितर्हितत:-परं पदंत्यक्त्वा रचितेकुण्डे क्वैकाषिमेखलाकुत्र ऋत्युजांस्थानम् । इत्यनु-पपत्तिवशतः प्राक्सूत्रस्य त्रिभागतोवेदिः । वशतइतिहेतुपञ्चमी तन्नेति प्रतिज्ञाव्यषेचते । अत्रैवं न्यासः । मण्डपस्य दशकरस्यक्षेत्रफलंहस्तगतम्, तस्यतृतीयांशो हस्तास्त्रयस्त्रिंशत् एकहस्तस्यैक स्तृतीयांशः ($\frac{३३}{३}$) तस्य मूलंहस्ताः पञ्च ५ मूलावशिष्टं ८ अष्टौतेअंशैस्त्रिभिर्गुणिताः एकेन योगिताः पञ्चविंशतिः त्र्यंशा ($\frac{२५}{३}$) तेद्विगुणैकयुक्तमूलेन ११ भक्ता इतिलब्ध तृती-यांशद्वयम् $\frac{३}{३}$ तेनसहपञ्चानांरूपाणां योगाय समच्छेदविधावन्योन्यहाराभि-हतौ हरांशौराश्योः समच्छेदविधानमेवमिति पाटीसूत्ररीत्याजातम् $\frac{५।३}{१}$ पुनः $\frac{१५}{३}$ ततः $\frac{१७}{३}$ तदेतदुक्तमृषिभुवस्त्र्यंशाः मूलावशेषः $\frac{३}{३}$ छेदेनगुणितः $\frac{६}{३}$ सद्विगुणितैकयुक्त मूलेन एकादशभिर्भक्त इति लब्धं त्रयस्त्रिंशदंशस्यैकस्य-नवांशाः $\frac{६}{३३}$ भाजकलवेन भाज्यछेदानां भाजकछेदेनभाज्यलवानां गुणनस्यैव सछेद भागहारपरिकर्मणि परिनिष्ठतत्वात्तदेतदुक्तम्, किञ्चिन्न्यूनस्त्र्यंशः प-इति इत्थञ्चसिद्धे $\frac{१७।६}{३३}$ इत्थङ्कृद्धयेतयोर्योगाय समच्छेदविधौजातम् $\frac{५६}{३३}$ $\frac{१।२७}{३३}$ तयोर्योगे $\frac{५८}{३३}$ छेदेनांशस्य भजनेलब्धंहस्ताः पञ्च ५ अवशिष्टम् $\frac{३}{३३}$ त्रिभिरपवर्त्त $\frac{१}{११}$ एकस्य त्रयस्त्रिंशदंशस्थैक त्रिंशद्भागालब्धा इत्युक्तं कियदूनषट्कराइति एतावान्भागोयदि वेद्यैवाक्रान्तस्तदावशिष्टस्थाने कुण्ड-घटनर्त्विक्प्रचरणादिकं न सिद्धतीत्यनुपपत्तिवशात्केषश्चिन्मतं नोपपद्यत इति वाक्यार्थः ।

तत्र वेदिव्यासः—"त्रयस्त्रिंशदंशद्वयन्यूनाहस्ताः षडवेदि पश्चिमभागेऽवशिष्टमेकेन त्रयस्त्रिंशेनाधिकं हस्तद्वयम् । तत्र द्वादशाङ्गुलं त्रयोदशाङ्गुलम्वा त्यक्त्वा चतुरङ्गुल षड़ङ्गुलैकतरमेखलकं कुण्डमिति सकलैव वेदिपश्चिमभूमिराक्रान्तेति कुत्रोत्कटासनेनापि ऋत्विगासीत कुत्र प्रचरेदित्यादिरनुपपत्तिरूहनीया । ननु त्रिभागेन चतुर्भागेन वा वेदिरिति बौधायन नाम्नासूत्र मुदाहरन्ति ।

तथा चाधममण्डपे चतुर्भागावेदिः स्यादित्याशङ्क्य निराकृतं कुण्डमण्डने । नन्वधम मण्डपे स्याद्बौधायनवर्णिता चतुर्भागावेदिस्तेन नमेस्याद्दोषः पूर्वोक्त इति चेन्न । एवमपि पञ्चहस्तव्यासावेदिस्तथाप्यनुपपत्तेः । अनुपपत्तिर्ऋत्विक्प्रचरणाद्विस्थानालाभः । तथा—

"अस्तितुलापुरुषादौचहुहस्ता महति मण्डपे वेदिः ।
यावान् व्यासोवेद्या उत्सेधःस्या- त्तृतीयभागोऽस्य ।"

अथवा—"चतुर्थपञ्चमसप्तमनवमेशभाग परिमाणः२।१"। मात्स्ये तुलापुरुषदानप्रकरणे—"सप्तहस्ता भवेद्वेदी मध्येपञ्चकराथवे"ति विंशति हस्तेमण्डपे सप्तहस्ता षोडशहस्ते पञ्चहस्तावेदिर्व्यवस्थयाभिहिता ।

अत्र केचित्—"वेदिकोणेषु विन्यस्येत्स्तम्भान् वेदस्वरूपिण" इत्यभिधानाद्वेदिकोणोत्कर्षे मध्यमस्तम्भानांस्थानोत्कर्षोऽपि कल्पनीय इत्याहुस्तदसत् । तत्र वेदिकोणपदस्य मण्डपमध्यमकोष्ठकोण लाक्षणिकत्वात् । अन्यथा मध्यमवेदिरहित ग्रहमखादौ मध्यमस्तम्भारोपणस्थानालाभप्रसङ्गात् । पञ्चरात्रं—

"चतुर्थांशोच्छ्रितस्तस्यास्त्रिसप्त पञ्चतोऽपि वा ।
नवैकादशभागैस्ताभिष्टकाभिः प्रकल्पयेत् ।"

एतेषां पञ्चानामरत्निपरिमाणे शारदोक्तेन सह शक्त्यपेक्षोविकल्पः। विषमशिष्टाना मैच्छिकविकल्पःसम्भवात्। यत्र च तड़ागोत्सर्गे चतुर्हस्ता वेदिरुक्ता तत्रापि वेद्यपकर्षेण स्तम्भस्थानापकर्षो न कल्पनीयः कथितयुक्तः। सिद्धान्तशेखरे—

"वेदी चतुर्विधा तत्र चतुरस्रा च पद्मिनी।
श्रीधरीसर्वतोभद्रा दीक्षासुस्थापनादिषु।
चतुरस्रा चतुष्कोणाबेदि सर्वफलप्रदा।
तड़ागादि प्रतिष्ठायां पद्मिनी पद्मसन्निभा।
राज्ञांस्यात्सर्वतोभद्रा चतुर्भद्राभिषेचने।
विवाहे श्रीधरीवेदी विंशत्यस्रसमन्विता।
दर्पणोदरसंकाशा निम्नोन्नतविवर्जिता।"

दीक्षाचस्वस्वस्थापनञ्चेतिविग्रहः स्वस्वस्थापनं प्रतिमादौ प्राणप्रतिष्ठा। आदिपदान्महादानादि। तत्र प्रथमो चतुरस्रावेदिः। तल्लक्षणं चतुष्कोणेति, तड़ागादीत्यादिपदात्कूपारामादि गृह्यते। तत्र द्वितीया पद्मिनीनामवेदि स्तल्लक्षणम् पद्मसन्निभेति। मत्स्यपुराणे तु तड़ागप्रतिष्ठामधिकृत्य चतुर्हस्ता चतुष्कोणा चतुर्भद्रासमन्ततः इति चतुरस्रैववेदिरुक्ता, तयासह पद्मिन्यावेद्योविकल्पो वेदितव्यः।

दाक्षिणात्यास्तु—चतुष्कोणा चतुभद्रेत्युभयोपादानादष्टौ कोणा एव मत्स्यपुराणे कथ्यन्ते, तत्र विदिग्दलानि कोणपदेन, दिग्दलानि भद्रपदेनोच्यन्ते। तेनाष्टदलपद्माकारा वेदिलभ्यत इत्याहुः। राज्ञाभिभिषेचने सर्वतोभद्राख्या तृतीय वेदिः, तल्लक्षणम्—चतुर्भद्रेति सर्वतोवद्धसोप नावृत्ताकृतिरित्यर्थः। विवाहे श्रीधरीनाम तुरीयावेदिः तल्लक्षणम्—विंश-

त्यस्मेति। आथर्वणःनोन्तु महाशान्त्यादौ कर्मणिमहादानादौ चातुर्होत्र-कर्मणि चोपयोगिनी वेदिरन्यादृशी विद्यते। तथाहि—

तत्र शौनकसूत्रम् षट्शमीं प्रागायतां चतुः शमीं श्रोण्यांश्रीन्मध्ये अर्धं चतुर्थानग्रतः। अथ द्वादशङ्गुलोशमी समिदाथर्वणैशमीति व्यवहियते। तथा च षट्शमीपरिमितां भूमिमभिव्याप्यपूर्वपश्चिमायता शमीचतुष्टयायत व्यासश्रोणिभागा पूर्वपश्चिमयोः शमीद्वय मुत्तरदक्षिणयो शम्यर्धमपहाय मध्येशमीत्रयपरिमितोत्तरदक्षिण व्यासा, अग्रे च क्रमशः सन्नमनेन सार्धसमित्रयविस्तृता महावेदिर्भवति। तन्मध्ये पश्चिमतः समिधांत्रिनयम्, पूर्वतः शमीमेकां त्यक्त्वा शमीद्वयपरिमाणा चतुरस्रा चोत्तरवेदिर्विधातव्या। साच कुण्डस्वरूपा स्थण्डिलस्वरूपा वा उत्तरवेदितः प्राच्यां शमीमिता उत्तरदक्षिणयोरर्धेऽर्ध शमीमिताऽर्धे शमीमिताभूमिरवशिष्यत् इति।

अथ मण्डपदेशाः वास्तुशास्त्रे।

"मण्डपान्तर मुत्सृज्य कर्तव्यं मण्डपद्वयम्।
तथा धाम्नोधामान्तरं त्यक्त्वा धामाग्रे यज्ञमण्डपः।
कुर्यात्पञ्चगुणं चापि सोपानादृशहस्तकान्।"

गृहसमीपे हर्म्यसमीपे च गृहपरिमितां प्रासादपरिमाण पञ्चगुणाञ्च भुवमुत्सृज्यैव मण्डपोविधातव्यो नतु तन्मध्य इति वाक्यार्थः। सोपानात्—वाप्यादिसोपानात्। तन्त्रे—

"कर्मद्वयं यदाकुर्यो देकः कर्ताथवा पृथक्।
मण्डपान्मण्डपंत्यक्त्वा कर्तव्यं मण्डपद्वयम्।

संश्लिष्टमथवा कुर्याद्गृहे देवाजिरे तथा ।
गोष्ठेवा पर्वतेवापि कथञ्चिदपिकारयेत् ।

हयशीर्षपञ्चरात्रे—

कूपवापी तड़ागानां पश्चिमे यागमण्डपः ।

तन्त्रान्तरे—

तड़ागाग्रेऽथवैशाने उत्तरे यज्ञ मण्डपः ।"

एवं सिद्धे मण्डपेप्रतितोरणमेकैकः प्रतिद्वारपार्श्वं द्वौद्वौ, प्रतिकोणं चैकैकः कलशः स्थाप्यस्तदुक्तम्—"गन्धपुष्पाम्बरोयेतान् कुम्भास्तेषुविनिक्षिः पेत् ।"

"ध्रुवन्धरं वाक्पतिञ्चविघ्नेशं तत्र पूजयेत् ।"

तेषु तोरणेषु तथा—

"मण्डपस्य च कोणस्थ कलशेषुक्रमादमी ।
अमृतोदुर्जयश्चैव सिद्धार्थो मङ्गलस्तथा ।
पूज्याद्वारस्थ कुम्भेषु शक्राद्यास्तन्मनुक्तमैः ।"

अन्यत्रापि—

"मण्डपे कलशौद्वौद्वौद्वारेद्वारेनिवेशयेत् ।"

शारदायाम्—

"दिक्षु ध्वजाभिवघ्नीया ल्लोकपालसमप्रभान् ।
वितानदर्भमाल्याद्यै रलंकुर्वीत मण्डपम् ।"

लोकपालानान्तु—

"इन्द्रः पीतो यमः श्यामो वरुणः स्फटिकप्रभः ।

कुवेरश्च सुवर्णाभोऽग्निश्चापि सुवर्णभः ।
तथैव निर्ऋतिः श्यामो वायु र्धूम्रः प्रशस्यते ।
ईशानश्चमवेद्रक्त एवन्ध्यायेत् क्रमादिमान् ।"

इत्युक्तदिशावर्णा वेदितव्याः । तन्त्रे—

"पञ्चहस्ताध्वजाः कार्या वैपुल्येनद्विहस्तकाः ।
दण्डश्चदशहस्तः स्यादष्टदिक्षु च तान्न्यसेत् ।"

एव च पञ्चहस्त दीर्घाद्विहस्तविस्तृता दशहस्तदण्डावलम्बिताध्वजाः सिद्धाः ।

क्रियासारे तु विशेषः—

"तेषां हस्तद्वयं व्यासो मध्यश्चकरसम्मितः ।
व्यासार्धं शिखरं पुच्छंहस्तत्रितयमानकम् ।
मत्स्याभं शिखरं पुच्छ-शिखरन्तुत्रिकोणकम् ।
तयोर्मध्ये चतुष्कोणं ध्वजानेवं प्रकल्पयेत् ।"

व्यासो–दैर्घ्यं, मध्यो–विस्तारः, अयमर्थः–हस्तत्रय परिमितात्पुच्छोदुपरितनोभागः प्रकृतः तस्यद्वयंदैर्घ्यं, तन्मध्येऽप्युपरितनं हस्तमात्रं मत्स्याकृति ध्वजशिखरमित्युच्यते । तदधरीणं हस्तमात्रं चतुष्कोणमविकृतं स्थापनीयम् । पुच्छाग्रप्रदेशस्तु त्रिकोणतयानिर्मितः पुच्छशिखरमित्युच्यते । पुच्छविस्तारस्तु यथाशोभमुपपादनीयः । एवं पुच्छेनसहपञ्चहस्तदोर्घोभवतीति "मतङ्गवस्तुमहिष सिंहमत्स्यैणवाजिनः ।
वृषभश्च यथान्यायं ध्वजमध्ये क्रमाल्लिखेत् ।"

"अथवा–दिग्गज नष्टावैरावत पुरस्सरान् ।" वस्तुः–छागः । ध्वजा

इव पताकाअपि मण्डपे नियोज्याः। "पताकाध्वजसंयुक्त मलंकुर्वीत मण्डप मिति" सिद्धान्तशेखरात्। सोमशम्भुः—

"सप्तहस्ताः पताकाः स्युर्विंशत्यङ्गुलविस्तृताः।
दशहस्तः पताकानां दण्डाः पञ्चाङ्गवेशिताः।
पताका आयुधाङ्काश्च पुष्पगन्ध समन्विताः।"

आयुधाङ्काः—तत्तल्लोकपालायुधाङ्काः। सारसंग्रहे—

"प्रतिकुण्डं पताकास्तु प्रोक्ताः शास्त्रार्थ कोविदैः।
सप्तहस्ताः पताकाः स्युः सप्तमांशेन संयुताः।
विस्तृता लोकपालानुवर्णेन नवमीतुहिनप्रभाः।"

एवञ्च पताकाविस्तारे विंशत्यङ्गुलहस्तमात्रयोः शक्तयपेक्षोविकल्पः। प्रतिष्ठा काण्डे तु—

पञ्चहस्ताः ध्वजाः कार्या वैपुल्येन द्विहस्तकाः।
पञ्चहस्ताः पताकाः स्युर्दैर्घ्ये हस्तार्धविस्तृता।"

इत्युक्तम्। गारुडे—ध्वजस्तुद्विगुणः प्रोक्तो मध्यमस्तुहिनप्रभः। क्षुद्र-घण्टान्वितस्तस्य वेणुः षोड़शहस्तकः। द्विगुणः—इतरध्वजापेक्षया, तेन दशहस्तः सिद्धयति। मात्स्ये—"लोकेशवर्णाः परितः पताकामध्येध्वजः किङ्किणिकायुतस्यात्।

अत्र मैथिलाः लोकपालपताका एवाष्टौ स्थापयन्ति। मध्यमश्च ध्वजमेकं नतुध्वजान्तरमन्यदेशजास्तु—ब्रह्मानन्तयोरपि पताकान्दशध्वजांश्च स्थापयन्ति। तयोरुभयोः कल्पयोर्मूलंमृग्यम्।

रे कादम्बरि ! जागृहीतिजननीतारस्वरं रोदिति ।
क्रोशन्तः प्रतिबोधयन्ति भवती मेते सुहृद्बान्धवाः ।
कानिद्रा तव पुत्रि यत्र न पुनः सम्भाव्यते जागरः ।
काचेयं रजिनीनयत्रभविता भूयः प्रभातोत्सवः ॥

इति कुण्डकादम्बरी निबन्धे प्रथमोमण्डपोल्लासः
समाप्तः ॥

शाके १६६३ । शिवम् ।

॥ अथ कुण्डानि ॥

तत्र त्रिपुरासारसमुच्चये—

"वेदास्रं योनिमर्धोडुपनिभमनलास्रं सुवृत्तम्
षड्स्रं पद्माकारं गजास्रं हरिहयहरिद्वारभ्यतस्या विदध्यात् ।
मध्येवृत्तञ्च गौरीपति सुरपदिशोः पण्डिताः केचिदाहु
र्योन्यङ्गे पञ्चकोणंदिशिमदनरिपोः सप्तकोणञ्च कुण्डम् ॥"

तस्या-वेद्याः हरिद्वारभ्येत्यत्र द्वितीयालोपश्छान्दसः। वेद्याः प्राचीमारभ्याष्टौ कुण्डानि प्रादक्षिण्येनैशानापवर्गान्निर्मिमीते इत्यर्थः। षडस्राष्टास्रस्थाने पञ्चकोण सप्तकोणयोर्विधानं विकल्पेन, तयोर्लोपे तु सप्तकुण्डीपक्षोऽप्यस्ति, सएवद्वैतनिर्णये वाचस्पतिमिश्रै रभिहितः। शारदायाम्—

"प्राक्प्रोक्ते मण्डपे विद्वान् वेदिकाया बहिस्त्रिधा ।
क्षेत्रं विभज्यमध्यंसे पूर्वादि परिकल्पयेत् ।
अष्टाशासुचकुण्डानि रम्याकाराण्यनुक्रमात् ।
चतुरस्रं योनिमर्द्धं चन्द्रं त्र्यस्रं सुवर्त्तुलम् ।
षड़स्रं पङ्कजाकारम ष्टास्र तानिनामतः ।
आर्यकुण्डमध्येस्याद् गौरीपति महेन्द्रयोः ॥"

वेदिकायाबहिः सर्वतः कोणदिक्सूत्राणित्रेधाविभज्य तन्मध्यभागे प्रादक्षिण्येनपूर्वाद्यष्टास्वाशास्वनुक्रमात्कुण्डानि परिकल्पयेदिति सम्बन्धः। आशासु—ईशानान्तासु पूर्वाद्युक्तावविच्छेदात् क्रमएव विवक्षित इति परिभाषणात् तेन वेद्याः पादमात्र मेखलाकण्ठयोर्यच्च स्थानं परित्यज्य कुण्डखातानि

कार्याणीत्यर्थः सम्पन्नोभवतीति राघवभट्ट व्याख्या भविष्यपुराणे ।

'वेदीपादान्तरंत्यक्त्वा कुण्डानिनवपञ्चवा ।
वेदास्त्र एवेव तानिस्यु र्वर्त्तुलान्यथवाक्वचित् ।"

कुण्डानिसमेखलानि । पादश्चतुर्थांशः त्यक्त्वा वेदि चतुर्भागमिति । सिद्धान्तशेखरसम्वादात् । अत्र शारदा भविष्यपुराणयोरेक मूलकतैव । तथाहि षोड़शहस्तेमण्डपे वेदिव्यासाद्बहिः सूत्रमष्टाङ्गुलाधिकाः पञ्चहस्ताः५।८ तत्तृतीयांशः—एकोहस्तः अष्टादशाङ्गुलानि साग्राः पञ्च यवाश्च तावन्मितां भूमिं परित्यज्य मध्यभागे कुण्डखातमिति शारदावाक्यार्थः । वेदीपादः—अष्टाङ्गुलाधिकोहस्तः १।८ ततः कुण्डमेखलाकण्ठौ एकादशाङ्गुलौ द्वयङ्गुल कण्ठस्यापि शास्त्रार्थत्वात् तत एकोनविंशत्यङ्गुलायतां भुवंत्यक्त्वा कुण्डख्यातमिति भविष्यवाक्यार्थः । तत्र पादोन यवत्रयान्तरालं नक्षत्रिकरम् वेदि सन्निहित तृतीयांशवर्ज्जनमात्रे शारदातात्पर्यात् ।

यत्तु—"कुण्डवेद्यन्तरंचैवसपादकर संमित"मिति नारदीयवचनम्, तदपि द्वादशाङ्गुल मेखलापक्षे सपादस्यकरस्य त्रयोदशाङ्गुल सकण्ठ-मेखलायोजने उनविंशत्यङ्गुलाधिकोहस्तः सम्पद्यत एवेति न शारदा-विरोधः । यदपि वेदिका कुण्डयोर्मध्ये हस्तद्वितयमन्तरमिति क्रियासारवच-नम्, तदष्टादशहस्तमण्डपविषयम्—तत्र हस्तद्वयस्यैव शारदोक्त वेदि बहिः सूत्र तृतीयभागत्वात्—"वेदी पदान्तरत्यक्त्वा मेखलानां स्थितिर्भवेदि"ति पठन्ति—तत्र पदं द्वादशाङ्गुलं वशिष्ठ संहितायां ।

"त्रयोदशाङ्गुलंत्यक्त्वा वेदिकायाश्चतुर्दिशम् ।
कुण्डानि आगमोक्तानि विदध्याद्विधिवद्बुधः ।"

अत्र कुण्डानि समेखलानि नतु कुण्डखातानि । तथा सति वेदिमेखलयोर-

न्तरालेऽङ्गुलद्वयावशेषात्परिक्रमादिकर्मानुपपत्तेः। पद्मादि कुण्डानां मेखलामन्निवेशस्याप्यसम्भवाच्च। अयं द्वादश त्रयोदशाङ्गुलान्तरालकल्पः। पञ्चकुण्डीपक्षे यथाकथञ्चिदुपपद्यते।

नतु नवकुण्डीपक्षे तथाहि षोड़शहस्तमण्डपे त्रयोदशाङ्गुलान्तरालयोर्वेदिमेखलयोः स्वीकारे ईशानकुण्डकोणसूत्रमारभ्य प्राच्यकुण्डमध्यसूत्रस्य पञ्चाङ्गुलाधिक हस्तत्रयमन्तरालं सम्भाव्यते, तन्मध्यं सार्धचतुर्दशाङ्गुलाधिकैकहस्त मात्रेव्यवतिष्ठते। तदेवाचार्यकुण्डस्य मध्यं ततो द्वाविंशतिरङ्गुलान्याचार्यकुण्डदक्षिणं मेखलयाक्रान्तानीति प्राच्यकुण्डमेखलानिर्माणमपिनघटते, अथाचार्यकुण्डंमध्ये स्यादित्यत्र समतामध्यस्य न विवक्षिता किन्त्वीशान सूत्रसंलग्न मेवाचार्यकुण्डमितिवेन्न।

तथाहि प्राच्यकुण्डमध्यमसूत्र पश्चिमभागादीशान सूत्रस्य सप्तसप्ततिरङ्गुलान्यन्तरालम्, तत्र चतुश्चत्वारिंशदङ्गुलान्याचार्यकुण्डेनाक्रान्तानि द्वाविंशति प्राच्य कुण्डोत्तरार्धेनेत्येकादशाङ्गुलान्यवशिष्टानि तत्र चाचार्यस्योपवेशनमपि नोपपद्यते, कुतस्तरामाधानादिकर्म पाठश्च। यद्यपि विंशतिहस्त मण्डपे ईशानसूत्र संलग्नाचार्यकुण्डनिर्माणे ऋग्वेदप्राच्यकुण्डाचार्यकुण्डयोरन्तराले सप्तविंशतिरङ्गुलान्यवशिष्यन्ते, तत्राचार्यस्यासनबन्धं विना यथाकथञ्चिदुपवेशनं सम्भवति तथापि पृष्ठत ऋग्वेदकुण्डाग्निज्वालयाग्रतश्च स्वाहिताग्नि संज्वरेण व्याकुलीभूतस्याचार्यस्य कर्मोपसंहारसामर्थ्यापहारः केनवार्य्येत, तस्मान्नवकुण्डीपक्षे त्रिभागबहिः सूत्रमध्यमभागे कुण्डनिर्माणमेव युज्यते, (तेन विषमचतुर्भुजानां क्षेत्राणां व्युदासः।

समकर्ण चतुर्भुजक्षेत्रन्तु द्विविधम्, तुल्यभुजचतुष्कं दीर्घञ्च, तत्रोभ-

यत्रापि भुजस्यकोट्या गुणने क्षेत्रफलं सिद्धयतीत्यर्थः । तत्र या का प्रान्त रेखाभुज इति तत्संलग्न तदितरदिग्गामिनी कोटिरिति गणितशास्त्रे व्यपदिश्यते, तथाच हस्तमितेक्षेत्रे चतुर्विंशतेरङ्गुलानाञ्च चतुर्विंशत्यागुणने षट् सप्तत्यधिक शतषञ्चकं ५७६ क्षेत्रम) । तत्रहि षोड़शहस्तमण्डपे ईशानकुण्डकोणादग्वेद कुण्डमध्य सूत्रस्यान्तरालं चत्वारो हस्तः, तत्र कोणसूत्रसंलग्नस्याचार्यकुण्डस्य परिभाणेन चतुश्चत्वारिंश दङ्गुलान्याक्रान्तानि ऋग्वेद कुण्डोत्तरार्धेनद्वाविंशतिरिति त्रिंशदङ्गुलान्याचार्योपवेशनक्षमाणि लभ्यन्ते, विंशतिहस्तमण्डपेतु वेदिः षोड़शाङ्गुलाधिकाः षडुहस्ताः ६।१६ तत्पादः १।१६ षोड़शाङ्गुलाधिकोहस्तः सद्विगुणः, अष्टाङ्गुलाधिकास्त्रयोहस्ताः ३।८ । तद्युक्तं वेदिमानम् । हस्तादश १० तदर्धं ५ पञ्चहस्ताः, तदेवप्राच्यसूत्रकोणयो रन्तरालम् । तत्र चतुश्चत्वारिंशदङ्गुलान्याचार्य कुण्डेन द्वाविंशति ऋग्वेदकुण्डोत्तरभागेनाक्रान्तानीति षड़ङ्गुलाधिकं हस्तद्वयमाचार्य स्थानं लभ्यत इति नवकुण्डोकल्पेविंशतिहस्तो मण्डप एवोचित इतिध्येयम् ।

तदाचार्यकुण्डं वृत्तचतुरस्रयोरन्यतरत्कार्यम् ।

"पुरन्दरेशयोर्मध्ये वृत्तंवा चतुरस्रक"

गिति सिद्धान्तशेखरस्मरणात् । कुण्डमण्डने—

"वेदेः प्राच्यांकुण्डं चतुरस्रं तस्यासिद्धिरुक्ता प्राक् ।"

त्रिपुरासार समुच्चये—प्राक्सूत्रं प्रथमंनिधाय विदधीनार्धेन तस्याङ्कित मध्ये मत्स्ययुगं दिशोरमलधीः कीनाशवित्तेशयोः । ताभ्यां ताभ्यां सूत्रमपि प्रसार्य चतुरः कोणांस्ततोलाञ्छयेतत्क्षेत्रं स्याच्चतुरस्रमत्र रचयेदन्यानिकुण्डान्यपि ।" अर्धेनार्धाधिकप्रसारित कर्कटकेन वृत्तार्धद्वयनिष्पत्या ।"

अत्र रचयेदित्यादिना चतुरस्रक्षेत्रस्य सर्वकुण्डप्रकृतित्वमुक्तं भवति। योन्यादिसर्वकुण्डानि चतुस्रा भवन्तिहींति सिद्धान्तशेखर सम्बादात्। तेन प्रकृतिवद्विकृति रिति न्यायेन चतुरस्रधर्मः क्षेत्रफलम्। सवत्र कुण्डेऽतिदिश्यते। चतुरस्रफलानयने पाटीसूत्रं—

"समश्रुतौ तुल्यचतुर्भुजे च।
तथायते तद्भुजकोटिघातः।"

समश्रुतौसमकर्णे, तेन विषमचतुर्भुजानां क्षेत्राणां व्युदासः। समकर्ण चतुर्भुजक्षेत्रन्तु द्विविधम्। तुल्यभुजचतुष्कं दीर्घञ्च। तत्रोभयत्रापि भुजस्यकोटूयागुणने क्षेत्रफलं सिद्धतीत्यर्थः। तत्र या काचिदेक.प्रान्तरेखा भुज इति तत्संलग्नातदितरदिग्गामिनी कोटिरितिगणितशास्त्रे व्यपदिश्यते। तथाच हस्तमितेक्षेत्रे चतुर्विंशतेरङ्गुलानाश्चतुर्विंशत्यागुणने षट्सप्तत्यधिकं शतषश्चकं ५७६, क्षेत्रफलं सिद्धति। तदेव कुण्डान्तरेऽतिदेष्टव्यम्।

कुण्डमण्डने—

"पञ्चाशच्छतदशशतहोमविधौ रत्न्यरत्निहस्तमितम्।
लक्षेऽपिहस्तमात्रं कुण्डंयावन्ति होमलक्षाणि।
तावद्धस्ताबृद्धिः कुण्डेस्यात्पङ्क्तिहस्त पर्यन्ता।"

शारदायाम्—

"मुष्टिमात्रमितं कुण्डंशतार्थे सम्प्रचक्षते।
शतहोमेऽरत्निमात्रं हस्तमात्रं सहस्रके।"

तथा—

"एकहस्तमितेकुण्डे लक्षमेकंविधीयते।

लक्षाणांदशकं यावत्ताबद्धस्तेन वर्धयेत् ।
दशहस्तमितं कुण्डंकोटिहोमे प्रशस्यते ।"

इदं पुष्पादिलघुहस्तद्रव्यहोमविषय मेककर्तृक बहुदिवसनिर्वर्तनीयहोमविषय म्वेति राघवभट्टः ।

अन्यत्रतु व्यवस्थोक्ताशारदायासेव—

"द्विहस्तमयुते लक्षेचतुर्हस्तमुदीरितम् ।
दशलक्षेषडष्टहस्तं कोट्यामष्टकरं स्मृतम् ।"

त्रिपुरासार समुच्चये—

"शतार्थमात्रे खलुमुष्टिमात्रं रत्निप्रमाणं शतहोमकुण्डम् ।
हस्तंसहस्रेऽप्ययुतेद्विहस्तं लक्षेचतुर्हस्तमिदं प्रदिष्टम् ।
दशलक्षेरसहस्रे वसुहस्तं कोटिहोमे स्यात् ।
कोट्यर्धेऽप्यष्टकरं होमेष्वागमविदो ब्रुवते ।"

मुष्टिरेकविंशत्यङ्गुलः । रत्निररत्निरेव । कोटिहोमे दशहस्ताष्टहस्तयोर्विकल्पः । सिद्धान्तशेखरे—

लक्षार्धेत्रिकरं कुण्डं लक्षहोमेचतुष्करम् ।
कुण्डं पञ्चकरंप्रोक्तं दशलक्षाहुतिक्रमात् ।
षड्हस्तं लक्षविंशत्यां कोटयर्धे सप्तहस्तकम् ।"

सारसमुच्चयेतु—

"केचिद्वस्तं लक्षहोमे द्विहस्तलक्षद्वन्द्वे वह्निलक्षेत्रिहस्तम् ।
होमेकुंण्डं वेदलक्षेऽब्धिहस्तं प्राहुर्दोष्णां पञ्चकंपञ्चलक्षे ।

रसलक्षे रसहस्तं सप्तकरं सप्तलक्षके कुर्यात् ।
वसुहस्तं वसुलक्षे नवकनवं नवलक्षे कुण्डम् ।
दशलक्षे दशहस्तं दशकरमेवेह कोटिहोमेतु ॥
दशहस्तान्महिकुण्डं परमस्तिमहीतलेऽमुष्मिन् ॥"

चतुष्कर व्यासं षोड़शहस्तमपिकुण्डम् ? महतिग्रहयज्ञादावस्ति ।"
तथाहि-स्कान्दे—

"कोटिहोमेचतुर्हस्तं चतुरस्रं समन्ततः ।
योनिवक्त्रद्वयोपेतं तदप्याहुस्त्रिमेखलम् ।
चतुर्हस्तचतुरस्त्रमिति षोड़शहस्तक्षेत्रफलं सिद्धति ।

योनीति—योनिस्वरूपं यदवकंत्र तद्वयोपेतम्, तदुपेतदक्षिणपश्चिममेखल मित्यर्थः । अत्र चतुर्हस्तक्षेत्रफलककुण्डमेव लघुद्रव्यकर्मकैककर्तृकं क-कोटिहोमे स्कान्दवचनप्रतिपाद्यम्, अन्यथा—

"दशहस्तान्महि कुण्डंपरमस्तिमहीतलेऽमुष्मिन्नि"

तिवचनाविरोधादित्याहुः । अथद्विहस्तादि कुण्डविरचनोपाये तस्वरूपे च वक्तव्ये कुण्डमण्डनम्—

"हस्तमितेक्षेत्रे भूव्यासः स्युर्दिनोन्मिता अंशाः ।
द्विहस्तावन्मितइह कोटिस्तु तथैव तदुभयोर्वर्गः ।
षट्सप्तेष्वङ्गुलमित इति तद्विगुणं द्विहस्तफलमाहुः ।
द्वापञ्चाशत्समधिक मेकादशशतमिताङ्गुलद्विकरी ।
तन्मूलमङ्गुलानि त्रिंशत्त्र्यधिका तथा च सप्तयवाः ।
अष्टमयवस्य पञ्चत्रिंशते सप्तषड्विभागस्य ।

एवं सार्धप्रायाः सप्तयवास्त्रिंशदङ्गुलं त्र्यधिकम् ।
व्यासोगणकैरिष्टश्चतुरस्रस्यद्विहस्तकुण्डस्य ।"

भूव्यासस्य—भूमिविस्तारस्य । वर्गः—सम द्विघातः । एकहस्तक्षेत्र-फलम्-५७६ तद्विगुणं ११५२, तन्मूल मङ्गुलानि ३३, यवाः ७, शेषः ३५।६७ ते इति म गा इत्यर्थः । तत्र पंचत्रिंशतोऽष्टभिर्गुणने यातमसी-त्यधिकं द्विशतम् २८०, तस्य सप्तषष्ट्या भजने लब्धं चतस्रोयूकाः ४. शेषः १२।६७ तत्र द्वादशानामष्टभिर्गुणने ९६ सप्तषष्ट्याभागे लब्धम् लिक्षा १ शेषोऽप्येकलिक्षेति गृहीतः । स्थूलतयेतिद्वेलिक्षे जाते ।

यदाह—एकसप्तदशांशोनचतुस्त्रिंशद्विद्विहस्तके, इति स्वकारिका-व्याख्यानावसरे रामवभट्टः । तेन ३३ अङ्गुलानि, ७ सप्तयवाः ४ यूका, द्वेलिक्षे इयती द्विहस्तकरणीति लिक्षाद्वयाधिक्यादेव कुण्डमण्डने "सार्ध प्रायाः" इत्युक्तम् । मूल परिकर्म प्रक्रिया तु कुण्डमण्डने—

"इहपाटीविधिरन्त्याद्विषमार्गं त्यजेदिदंमूलम् ।
द्वाभ्यामाहत्यसमं विभजेल्लब्धस्य वर्गमथविषमे ।
जह्यान्लब्धं द्विगुणीकृत्याधस्तान्न्यसेत्पङ्क्तौ ।
पङ्क्त्या भङ्क्त्वा लब्धंस्वेनहतं वर्जयेद्विषमे ।
पङ्क्तौतद्द्विगुणमिति क्रमेण पङ्क्तेर्दलंभवेन्मूलम् ।
मूलावशिष्टमंशैर्निहत्यमूलस्य सेकयापङ्क्त्या ।
भङ्क्त्वालभेतभागानपवर्तं वा द्वयो प्रयुञ्जीत ।
व्यासकृतिश्चतुरस्रे समे फलं स्यात्फलस्ययन्मूलम् ।
सव्यास इति त्रिकरप्रभृतिषु सञ्चारणीयमिदम् ॥"

व्यासो—विस्त रो मध्यसूत्रं कर्णीत्यादयः पर्यायाः ।

तथा—

शुल्वकृतस्त्वेककरे चतुरस्रेकर्णसूत्रमास्फाल्य ।
द्विकरव्यासं तावन्मितमादघ्यात्तदक्षूयारज्जुम् ।
त्रिकरं व्यासं कुर्यादित्याहुर्गणितखेदनिरपेक्षम् ।।"

तत्राक्षूयापदार्थः—"कोटिर्यत्रैकमानमथवाहुः । एकोनेष्टक्षेत्रव्यासस्ताभ्यां प्रकल्पितः कर्णः । यावत्क्षेत्रं परिमितिसत तत् एकन्यूनस्य क्षेत्रस्यकरणी भुजः ।" एककरणी कोटिः । तदग्रद्वयस्पर्शि यत्कर्णसूत्रं सा परिमितिस्तक्षेत्रस्य करणी, यथा त्रिहस्तक्षेत्र करण्यांजिज्ञासितायां द्विहस्तकरणीभुज इति एककरणीकोटिरितिस्थापनीया । तत्कर्ण सूत्रिकरकरणीति ज्ञातव्य मित्यर्थः । तथा च शुल्वसूत्रम्—नरदाक्षूयारज्जुर्दशकरणीति ।

कुण्डमण्डने—त्रिकरव्यासस्त्वेकाधिक चत्वारिंशदङ्गुलश्चयवाः । चत्वारश्चतुरधिका चत्वारिंशच्यशीतिभागस्य । त्रिहस्तक्षेत्रफलमष्टाविंशत्यधिका सप्तदशशती १७२८, तन्मूलमङ्गुलान्येकचत्वारिंसत् ४१, शेषः ४७ ४३ । अंशोऽष्टभिर्गुणितोजातः ३७६, ससेकयापङ्क्तया ८३ भक्तोलब्धं यवाः ४ शेषः ४४ ८३ तत्राप्यंशोऽष्टभिर्गुणितः ३५२ अशीत्याभक्तैलब्धयूकाः ४ शेषः २०।८३ ततोलिप्साद्वय मीषन्न्यूनं लभ्यते ।

राघवभट्टस्तु—एवं द्विसप्तत्याष्टाविंशत्याढ्य शतभागतः । संयुक्तयान्येकचत्वारिंशत्स्यु स्तानित्रिहस्तके इत्याह । अष्टाविंशत्याढ्यशतभागतः द्विसप्तत्याभागैः संयुक्तानि तान्यङ्गुलानीत्यन्वयः । न्यासः अङ्गुलानि ४१ शेषः ७२।१२८ अंशानामष्टभिर्गुणने ५७६ छेदेनभक्ते लब्धं यवा ४ शेषः ६४।१२८ अंशानामष्टभिर्गुणने ५१२।१२६ छेदैर्भक्ते लब्धं ४ चतस्रोयूकेद्वे इत्यायाति सा च गणित प्रक्रिया किंमूलेति न प्रति-

पद्यामहे। कुण्डमण्डने—

"द्विकरी चतुष्करस्य व्यासोऽथ पञ्चहस्तचतुरस्रे।
द्वौहस्तौ पञ्चाङ्गुलतुल्या यवास्तथैकास्मिन्।
पञ्चाधिकशतभागै र्यवेविभक्ते लवास्त्रयस्त्रिंशत्।
चतुष्करक्षेत्रव्यासो हस्तद्वयमितिस्पष्टम्।

पञ्चकरक्षेत्रफल मशीत्यधिक मष्टाविंशतिशतम् २८८० तन्मूलं ५३ मूलावशेषः ७१ सोऽष्टघ्नः ५६८ सैकया मूलपङ्क्तया भक्तः लब्धं यवाः ५ शेषः ३३।१०७ अत्रोप्यंशोऽष्टगुणः २६४ छेदेन १०७ भक्तोलब्धं यूकाद्वयं २ शेषः ५०।१०७ सस्थूलदृष्ट्या किञ्चिदूनं लिक्षाचतुष्टयतया परिणमते। यदाह-"तृतीयांशम्यून चतुः पञ्चाशत्पञ्चहस्तके।" इति स्वकारिका मुदाहृत्य तेन ५३ अङ्गुलानि ५ यवाः २ यूके ४ लिक्षाः इयती पञ्चकरकरिणीति राघवभट्टः।

"षट्कर चतुरस्रस्य द्वौहस्तषड्गुलैर्युतौदशभिः।
षट् च यवा एकयवे सप्तदशाधिकशतोन्मितविभागे।
भागाश्च चतुस्त्रिंशत्तेनार्धान्न्यून एवभवति यवः।"

षट्कर चतुरस्रक्षेत्रफलम् ३४५६ तन्मूलं ५८ मूलावशेषः ६२ अष्टघ्नः ७३६ तत्र सैकमूलपङ्क्तया ११७ भक्ते लब्धं यवा ६ शेषः ३४।११७ अंशेऽष्टगुणे २७२ छेदः ११७ भक्ते लब्धं यूके २ शेषः ३८।११७। सस्थूलदृष्ट्या लिक्षात्रयत्वेन परिकल्पितः। एवमेव चतुरेकोनविंशोना ऊनषष्टिस्तथोत्तरे। इति स्वकारिकाविवरणे राघवभट्टः। चत्वारो ये एकोनविंशांशाः ६ तैरूनेति तदर्थः।६ सप्तकरे चतुरस्रे त्रिषष्टिमितमङ्गुलं

त्रियवी। एकोयवश्चमाधिकशतभागो वेदनवहीनः। सप्तहस्त चतुस्रक्षेत्र फलम् ४०३२ तन्मूलं ६३ मूलावशिष्टं ६३ अष्टघ्नं ५०४ सैकमूल षड्क्तया भक्ते लब्धं यवाः ३ शेषः १२३ १२७ तदं शेऽष्टगुणे ६८४ छेद भक्ते लब्धं यूका ७ शेषः ६५।१२७ स्थूलदृष्ट्या लिक्षापट्कमिति व्यवहियते। राघवभट्टस्तु —

"सप्तहस्तेद्यर्धयुता त्रिषष्टिः करिणीमतेति स्थूलवरं व्यवजहार। ७।"

अष्टकरे षष्ट्यङ्गुलमृष्यङ्गुलसमधिकं यवाः सप्त। अष्टमयवस्यभागाः सप्तेष्वग्नीन्दुभिर्विभक्तस्य अष्टकरचतुरस्रक्षेत्रफलम् ४६०८ तन्मूलं ६७ मूलावशिष्टं ११६ अष्टघ्नं ६५२ सैकमूलषड्क्ति १३५ भक्तं लब्धं यवाः ७ शेषः ७।१३५ तल्लिक्षा चतुष्टयमिति स्थूलदृष्ट्या व्यवहरणीयम्।

अत्र यूका नलभ्यत एव, अतएव ६७ अंगुलानि ७ यवाः यूकाः ४ लिक्षाः इयतीष्ट हस्तकरणीति राघवभट्टो व्यवजहार। ८। नवकरचतुरस्रस्य द्वासप्ततिरङ्गुलानि नतु भागः। निर्विचिकित्समेतत्। ९। दशहस्तस्य तु पञ्चाधिकसप्ततिरङ्गुलानि सप्तयवाः। अष्टमयवस्य विधुशरभूमि भक्तस्वदग्वह्निभागः। दशहस्तक्षेत्रफलम्। ५७६० तन्मूल ७५ मूलावशिष्टं १३५ अष्टघ्न १०८० सैकमूलषड्क्तयाभक्तं लब्धं यवाः सप्त ७ शेषः २३२।१५१ सप्तादयूकात्वेन स्थूलदृष्ट्या कल्पितः। अतएव द्वाभ्यामेकोनत्रिंशाभ्यामूना षट्सप्ततिर्दिशीति स्वकारिकाविवरणे ७५ अङ्गुलानि ७ यवाः १ यूका २ लिक्षे इयतो दशहस्तकरणीति राघवभट्टोऽवधोषयत्। षोड़शहस्त कुण्डसत्त्वे तदधिकृत्याह—

"षोड़शहस्तक्षेत्र–व्यासोहस्ता भवन्ति चत्वारः।"

अमियुक्ताः पठन्ति। "विस्ताराङ्गुलमानमेक करतो यावद्दशस्याञ्जिना,

२४ वेद त्रीणि ३४ कुसागराः शरयवोपेता ४१ ५ भुजङ्गाम्बुधि ४८ निःपादाम्बुधिसायका ५३।६ वियवमङ्केष्व ५८।७ र्धयुग्रामषट् ६३।४ नागाङ्गन्ययवानि ६७।७ दृङ्मुनि ७२ यवेनोनाः षट् पर्वताः ७५।७ एवं क्षेत्रवृद्धयाद्विहस्तादिस्वरूप मुपपादितमथखात वृद्धिप्रयुक्तं कुण्डानां द्विहस्तत्वादिकं खातफलद्वैगुण्यादिकमेवा त्रोपपादनीयम् । नतु क्षेत्र ९ फलद्वैगुण्यादीति वादिनाम् मत मुपन्यस्तं कुण्डमण्डने ।

अन्येतु—"खातघनफलमेककरे श्रुतिदिगष्टशिखिविधावः । तस्य द्विगुणस्य गजश्रुतिरसमुनिलोचनाङ्गुलप्रमितेः । घनमूलमङ्गुलानित्रिंशत् खरव सप्तदृग्विभक्तस्य । एकस्यगजश्रुतिरसभागा यद्वाष्टगगनपृथिवीभिः । अप्रवर्तेच्छिन्नरयोः षड्भागाः पञ्चविंशतिलवस्य । एवं द्विगुणित घनफलमूलं व्यासोद्विहस्तकुण्डस्य । केचित्त्वितिवदन्तीति व्यवहितेनवक्ष्यमाणेन सव्यपेक्षंघनः समत्रिघातः । यथा पञ्चानां पञ्चभिःर्गुणितानां पुनः पञ्चभिर्गुणने सपादशतं पञ्चानां घनः । एव मेककरे चतुर्द्विअष्टत्रिएकाङ्गा १३८२४ चनफलाङ्गुलानिभवन्ति । तानि द्विहस्ते द्विगुणितानि अष्ट चतुःषट् सप्तद्विसंख्यकानि २७६४८ घनाङ्गुलानि तस्य घनमूलं द्विहस्त कुण्डकरणी तच्च अङ्गुलानि, ३० त्रिंशत् मूलावशेषः । सप्तत्रिंशतिशतभागस्यैकस्याष्टचतुः षट् संख्यकाभागाः ६४८।२७०० तयोरष्टोत्तरशताङ्केनापवर्तेतु पञ्चविंशतिभागस्यैकस्य षड्भागालभ्यन्ते तेन ३०।५।२५ एतादृशं द्विहस्तकुण्डकरणीस्वरूपं पर्यवस्यति, नतु पूर्वोक्तम् । ३३।६३।६७ इत्येतादृशस्दरूपमित्यर्थः

"घनमूल परिचयाय तु पाट्यारितिः प्रदर्शितान्यत्र ।
आद्याङ्को घनचिह्नोद्वाव घनत्वेनचिह्नितौ तदनुतद्वत् ।
एकोघनस्तदितरावघनावितिरीतिरत्र घनपङ्क्तौ ।

अन्त्याद्घनतः कश्चिद्घनं यथासम्भवं जह्यात् ।
तन्मूलं घनापङ्क्तौन्यस्य तदीयेन वर्गेण ।
त्रिघ्नेनप्रथमाघनविभागलब्धं न्यसेत्यङ्क्तौ ।
अघनविभागफलकृतिं चरमफलाङ्कैस्त्रिभिश्चसंगुणिताम् ।
तत्प्रथमादघनाङ्कात्त्यजेत्ततः पूर्वघनतस्तु ।
तस्यैव फलस्यघनं विशोधयेदथ ततः प्रथमात् ।
अघनोत्फलराशिकृतिं त्रिहतिविभागात्समर्पयेत्पङ्क्तौ ।
तत्फलवर्गं राशीकृतिरमाङ्केन विनिहतं त्रिघ्नम् ।
त्यक्त्वाप्रथमादघनादघन फलस्यैव घनमथादिघनात् ।
संशोध्य मूलवर्गंत्रिहति विभागादिकं कुर्यात् ।
घनमूलादवशिष्टं भागैर्हत्वापदस्यवर्गेण ।
त्रिगुणेन भजेदथवापवर्त्यसंस्थापयेल्लवच्छेदौ ॥"

अस्यौघनमूलपरिकर्मविधिरुपदेशगुणनिकाभ्यामेव साधयितुं शक्यत इति नेहोदाहरणेनविन्रियते ।

अस्य पद्यस्य सिद्धान्तविरुद्धतया कुण्डान्तर मपहाय दशकरकुण्ड-मधिकृत्यमिहितं तत्रैव ।

"एवं दशकरकुण्डे व्यासाङ्गुलजातमेकपञ्चाशत् ।
त्रिखगजमुनि भागस्य ग्रहगजबाणेषवोभागाः ।
नवभिर्भागच्छेदापवर्त विधिना तु रूपदृक्तर्काः ।
भागाः सप्तरसाष्टविभागस्यैकाङ्गुलस्वरूपस्य ।
त्रिभिरपवर्ते पुनरपि नववसु दस्रछिदोऽस्यभागाः स्युः ।
मुनिगगननयन विमिताः प्रथमंभैरेव वापवर्तेन ।"

अन्येष्वपि कुण्डेषु व्यासः खातस्यघनफलान्न्यूनम् स्वयमूहनीयमिति घन-परिकमविदो वदन्ति विद्वांसः। दशहस्तक्षेत्रघनफलं तावदेकहस्तक्षेत्रघन-फलमेव दशगुणम् १३८२४० क्रमेण घनाघनचिह्नतन्ततोलब्धं घनमूलं ५१ घनमूलावशिष्टं ५५८९ पदवर्गेणत्रिगुणेन ७८०३ भक्तं सच्छेदमवतिष्ठते ५५८९।७८०३ तयोश्छेद भागयोर्नवभिरपवर्त्ते ६२१।८६७ इदृशंरूपं पर्यवस्यति। तस्यापि त्रिभिरपवर्ते २०७।२८९ एवं विधंस्वरूपं पर्यव-स्यति। अथवा प्रथममेवास्य ५५८९/७८०३ स्यरूपस्य भैः सप्तविंशत्या अपवर्त्तः कर्त्तव्य इति प्रथमापवर्त्तादेवैवंविधंस्वरूपमुपपद्यते ५१।२०७/२८९। एवं विधा-दशकरकुण्डकरणी कर्त्तव्या नतु पूर्वोक्त ७५।१३५/१५१ इत्येवं रुपेऽत्यर्थः। अस्मिन्मते दूषणसूत्रं कुण्डमण्डने तन्न मनोरमम्। इह हि प्रधानमनुरूद्-ध्यते सकलकार्यम् क्षेत्रं प्रधानमस्य द्विगुणाद्या वृद्धिरङ्गमेतस्य। खातं कण्ठोयोनिर्मेखलया सार्द्धमिति तु यज्ञविदः। अत्र यथाक्षेत्रस्य प्राधान्यं तथोपरिष्टान्निरुपयिष्याम इति कुण्डकादम्बरी निवन्धे द्वितीयश्चतुरस्र-कुण्डोल्लासः।

अथ योनिकुण्डं त्रिपुरासारसमुच्चये—

क्षेत्रे क्षिप्त्वावहिरिह पुरोभूतभागेंऽशमेकम्।
कोणार्धार्धंमुनि शितमतिर्भ्रामयेत्संप्रगृह्य॥
यावत्कोणं फलमपि तथा सूत्रयुग्मस्यपातम्।
मध्यात्कुर्याद्भवतित्तदिदं मन्मथावास कुण्डम्॥

भूतभागे क्षेत्रे एकमंशं पुरः सूत्रेक्षिप्त्वा वर्धयित्वा कोणार्धार्धं कर्णसूत्रचतुर्थांशंप्रगृह्य तावान्मितं कर्कटकं प्रसार्य यावत्कोणं भ्राभयेदिति सम्बन्धः। अत्र श्रोणिभागे द्वेक्षुद्र चतुरस्रक्षेत्रे तयोरपि द्वे द्वे कर्णसूत्रेतत्सं-

पाते कर्कटकोटिं निखायद्वितीयां कोटिंमहाकर्णं चतुर्थांशमितां प्रसार्य क्षुद्र-कर्णप्रान्तादपरतत्प्रान्तावधि भ्रामयेदेवम् वृत्तार्धद्वयंनिष्पादयेदित्यर्थः ।

तथाच तन्त्रराजे—

"तन्मध्येपश्चमांशेन विकाश्यब्रह्मसूत्रकम् ।
पूर्वतः पश्चिमद्वन्द्वकाष्ठयोर्मध्यदेशतः ।
तत्कोणमानेन तथाभ्रामयेत्पश्चिमाग्रकात् ।
उत्तराग्रावधिंतथा दक्षिणाग्रावधिंप्रिये ।"

तन्मध्यतिर्यक्सूत्रान्त द्वयावष्टम्भतस्तथा । विकाशित ब्रह्मसूत्रावधिसूत्र-द्वयं भवेत् । योनिकुण्डमिदमिति ब्रह्मसूत्रंप्राक्प्रत्यक्सूत्रम् ।

अत्र ऋत्विक सन्निहितः श्रोणिभागः प्रतीची, तेन योन्यादिकुण्डे-षूदङ्मुखेषुदक्षिणोत्तरसूत्रमेव प्राक्प्रत्यक्सूत्रम् । प्राच्येव दक्षिणापश्चिमे-वोत्तरेति परिभाषा । शारदायाम्—

"चतुरस्रीकृतं क्षेत्रं पञ्चधाविभजेत्सुधीः ।
न्यसेत्पुरस्तादेकांशं कोणार्धार्धं प्रमाणतः ।
भ्रामयेत्कोणमानेन तथान्यदपि मन्त्रवित् ।
सूत्रयुग्मं ततोदद्यात्कुण्ड योनिनिभंभवेत् ।"

अत्र कोणः कोणसूत्रं कर्णस्तदर्धं द्वितीयकर्णसम्पातस्थानविभक्तं तदर्धंश्रोणि-गत क्षुद्रकोष्ठद्वये क्षुद्रकर्णान्तरसम्पादस्थानमारभ्य कोणसूत्राग्रावधि तत्प्रमा-णयारज्ज्वा कर्कटकेन वा कोणमानेन कोणाग्रसंलग्नतया भ्रामयेदिति राघवभट्टः । कोणमानेनेति क्षुद्रकोणसूत्रप्रमाणव्यासकं भ्रमणं विवक्षितमिति तुज्यायः ।

कामिके—

"पञ्चमांशं पुरोन्यस्य मध्येवेदांशमानतः ।
भ्रमादश्वत्थपत्राभं कुण्डमाग्नेयमीरितम् ॥"

अत्र वेदांशः कोणसूत्रस्यैव । क्रियासारे—

"क्षेत्रं पञ्चाशकीकृत्व, पूर्वस्यामेकमंशकम् ।
न्यस्यतस्मान्न्यसेत्सूत्रे पार्श्वयोर्मध्यमावधि ।"

सिद्धान्तशेखरे—

"चतुष्कोष्ठं समं कुर्यादंशक्षेत्रस्य पञ्चमम् ।
सोमसूत्रस्यवाह्याग्रे योजयेत्सौम्यभागके ॥"

अत्र सौम्यभागः प्राकृत एव गृहीतः । एवं सर्वत्रार्षपौरुष प्राचीनतन्त्रे ब्रह्मसूत्रे क्षेत्र पञ्चमांशवृद्धिरेवोक्ता । तत्र वृत्तार्धद्वयफलम् २२६।४।३ अधरव्यस्रफलम् । १४४। इति सर्वमतेऽपितुल्यम् । उपरित्र्यस्रफलानयनाय लम्बस्वरूपमभिधीयते प्राक्सूत्रार्धं १२ वद्धर्यांशाः २४।५ तयोर्योगार्थं समच्छेदता कर्तव्या, तत्र कल्प्योहरोरूप महारराशेरिति परिभाषावलात् । हारशून्यस्य द्वादशराशेः रूपमेकंहारः कल्पनीयः । ।१२।१।२४।५ ततश्च—

"अन्योऽन्यहारामिहतौ हरांशौ राश्योः समच्छेदविधानमेव"

मितिसूत्रकथितरीत्या परिकर्मणिकृतेजातं ६०।५।२४।५ छिच्छेदोहरोहार इति पर्यायाः, अंशो लव इति च । तयोः समच्छेदयोर्योगः ८४।५ अस्य लम्बभूम्यर्धेन १२ गुणने जातम् १००८।५ लवस्य २०१।३।५ छेदेन भजनेलब्धं २०।१।३।५ किञ्चिदूनपञ्चयवाधिक मेकोत्तरद्विशताङ्गुलम् तेन २२६।४।३॥१४४॥२०१।५। एतेषामन्योन्ययोगे जातम् ५७२।१।३ एवञ्च

चतुरङ्गुलफलन्यून तया मानहीने दरिद्रतेत्याद्यर्थवादोपस्थितानिष्टप्रसङ्गः। न्यूनाधिकप्रमाणं यजमान विनाशनं कुण्डमितिनिन्दार्थवादावरुद्धे विधिप्रवृत्त्यसम्भवश्चेति।

अत्र केचित्—मानहानौ निन्दार्थवादः शास्त्रीयमानहानि मधिकृत्यैवप्रवर्तते। शास्त्रञ्च द्विविधम्—उपदेशोऽतिदेशश्च। तत्रातिदेश स्तावच्चतुरस्रस्य कुण्डान्तरप्रकृतित्वकथनेन प्रकृतिवद्विकृतिरिति न्यायाच्चतुरस्रधर्मस्य क्षेत्रफलादेः कुण्डान्तरे सम्बन्धकल्पनम्, तच्चाक्षेपेणार्थावगमस्वरूपम्। नत्वनुपक्तेन प्रकृतिप्रकरण श्रूयमाणेनवाक्येनैवविकृतावर्थागमः शङ्कनीयः। तथाहि "कृष्णलेव्रीहीन् प्रोक्षती"ति वाक्येनैव "व्रीहीनवहन्ती" त्यनुपक्तेन वाक्येनावघात सम्बन्धे बोधिते तत्र दृष्टद्वाराभावेऽप्यदृष्टद्वारेणारादुपकारकत्वं प्रोक्षणस्येवावघातस्यापि कल्पनीयं स्यादितिकृष्णलेद्वारबाधादतिदेशागतस्यावघातस्यबाधा नसिद्ध्येत, नह्युपदेशकोऽर्थो लौकिकेन प्रमाणेन बाधितुं शक्यते, अतएव च वैकृतेन विशेषोपदेशेन प्राकृत धर्मातिदेशोबाध्यत इति सिद्धान्तः।

अन्यथा नुपक्तप्राकृतोपदेशेन श्रूयमाण विशेषोपदेशेन च परस्परविप्रतिषेधाच्छ्रुतिद्वैधेनविकल्प एव स्यात्, नत्वेकेनापरस्य बाधः। यत्रचैतद्ब्राह्मणान्येवपञ्चहवींषी त्यादौ ब्राह्मणभागानामतिदेश स्तत्रोप्यर्थाक्षेपादेवविकृतौ प्रकृतधर्मसिद्धिरितिव्यक्तमूहबाधाधिकरणे। तथा च योनिकुण्डादौ तन्त्रराजादिशास्त्र वशेषोपदेशेन प्रकृतिक्षेत्रफलसम्बन्धोबाधित इति तस्याशास्त्रीयत्वान्न तद्धानिर्दोषाय।

अन्यथा "शरमयं बर्हि भवती" त्यादौ विकृतावुपदिष्टे शरैर्बाधिताः प्राकृतादर्भा अपि दोषभावहेयुरिति पञ्चमांश—बुद्धिरेव शास्त्रीया, तद्धानिरा-

विक्रयश्च दोषाय, तेन स्वेच्छया शास्त्रीयं कुण्डं वर्धयन्तः शास्त्रविप्लावका एवेति पूर्णानन्दगिरि प्रभृतयः, तदेवमतमनुवर्तते प्रतापरुद्रः ।

राघवभट्टस्तु—अन्येषु सर्वेषु यथाश्रुतशास्त्रपरिमाणकेषु कुण्डेषु चतुरस्रक्षेत्रफलविसम्वाद दर्शनात् चतुरस्रस्य कुण्डान्तर प्रकृतिताकथनमेव निरर्थकमापद्येत ।

"प्राक्कुण्डे यत्प्रमाणं तदन्येषाक्षेत्रमानक"

मित्यार्षग्रन्थकथितमेव चतुरस्रयोनिकुण्डयो स्तुल्यपरिमाणत्वं भगवतः कात्यायनस्यापि शुल्वसूत्रे क्षेत्रफलसम्वादाय प्रयाशोदृश्यत इति तन्त्रराजादिवाक्यानि क्षेत्रफलसम्वादिकुण्डाकारोपलक्षकाणि । नच यथाश्रुतानीत्युपोद्घातेनासूत्रयत्स्वयम् ।

"चतुर्विंशतिधा मध्यसूत्रंभङ्क्त्वा पुरोन्यसेत् ।
पंचांशाश्चैककस्य त्रीन्विंशांशान् कोणमानतः ।
वृत्तार्धे स्तोममध्ये तिर्यक् सूत्रान्ताच्चततोऽर्पयेत् ।
पुरोवर्धितसूत्रान्तं सूत्रेद्वेस्यातां भगाकृती"ति ।

तदेतद्विवृतं कुण्डमण्डने—

"आग्नेय्यामुदगग्रं वराङ्गं कुण्डंतदस्यविन्यासः ।
चतुरस्रक्षेत्राणां जिनभागानां लवान् पुरः पञ्च ।"

एकस्य च विंशांश त्रितयं परिवर्धयेत्प्रलम्बगुणे । मध्यम तिर्यक्सूत्रप्रान्ताभ्यां लब्धवृद्धिपर्यन्तौ । आस्फाल्यगुणावुपरि त्र्यस्रनिष्पादयेदधो निहिते । स्वल्पभुजे चतुरस्रद्वितयेद्वौद्वौ निवेशयेत्कर्णौ । कर्णद्वयसम्पातस्थलतः कर्णार्धदीर्घयारज्ज्वा । प्राच्योदीच्यगुणान्तद्वय संसक्तं मिथा-

मिलनमूलम्। वृत्तार्धयुगम्विलिखेदथमध्ये मार्जयेदखिलरेखाः। एवं चलदल किसलयमञ्जुलमञ्जलिरिवाम्बरत्नस्य। जायेतकुण्डमस्मिन्नेक-करेतावदुच्चयामिफलम्। उपरित्रिकोणमधरत्रिकोणं वृत्तञ्चेतित्रितयमिह-क्षेत्रम्। तत्रोपरित्रिकोणफल मुदाहरति—

उपरित्रिकोणलम्बः सप्तदशाङ्गुल मथ त्रयोभागाः। विंशतिलवस्य १७।३।२० तियंकक्षसूत्रं भूमि २४ न्तदर्ध मर्कमितम् १२ तस्य फलं शर-खदशोड़ २०५ ङ्गुलानि चत्वार एव पञ्चांशाः ४।५ तत्परिकर्मणि प्रकार माह—लम्बगुणं भूम्यर्धं स्पष्टं त्रिभुजेफलंयतोभवति। तस्मात्सच्छिद्रमंशकं गुणयित्वा शेषतोऽपवर्तत। सच्छेदांकस्य सवर्णीकरणं गुणनप्रकारञ्च विबक्षुराह—

"वृत्तार्धद्वयमस्मिन्विभिन्नगुणनस्थले निजग्रन्थे। पाठ्यामखिल ऋषितागमसारमवेत्य भास्करार्याचार्यैः। तत्र सवर्णनवृत्तार्धं छेदभरूपेषुलवा धनर्णमेकस्यभागा अधिकोनकश्चेत्। रूपं भागिवस्तु छेदेन गुणनीयम्। तत्र लवा लवोने ऋणं लवाधिकेधनं कर्तव्या इत्यर्थः। तेन प्रकृते १७।३।२० इति लम्ब ३४३।२० इत्येव स्वरूपोजातः। विभिन्नगुणने-कर्णसूत्रंवृत्तार्धम्। अंशाहतिश्छेदवधेनभक्ता लब्धं विभिन्नेगुणने फलं स्यात्। न्यासः ३४३।२०, १२।१, अंशाहतिः ४११६, छेदवधः २०।।४११६।२० भागे लब्धं २०५, शेषः १६।२० चतुर्भिरपवर्तः ४।५ आवयुपरिन्यस्तफलं २०५।४।५, अधरन्यस्तफलं तु श्रुतिवेदशुवो १४४ ऽथ-मण्डलार्धं युगम् मिलितम् मण्डलमेकं तद्व्यासः किञ्चिदूनसप्तदश। श्रीधर भास्करपाटी निर्दिष्टमनेकधास्तिवृत्तफलम्। व्यासार्धवर्ग वर्गात्त्रे-त्रफले दशगुणान्मूलम्। इदं श्रीधर त्रिशती सूत्रम्, तत्र व्यासार्धवर्गः ७२ द्वासप्ततिः। व्यासवर्गस्य २८८ चतुर्थांशएवहि व्यासार्धवर्गः।

व्यासार्धवर्गवर्गः ५१८४ सदशगुणः ५१८४० तन्मूलं २२७ मूलावशेषः ३११।४५५ भास्करोक्तम् सूक्ष्मवृत्तफलागमप्रकार माह—'यद्व्यासकृतेरुद्धृ गोऽग्नि ३६२७ हतायास्त्रिखीषुभि ५००० र्भागः। तथाच व्यासकृतेः २८८ उद्धृगोऽग्निहतायाः ११३०६७६ पञ्चसहस्रे भक्तायां लब्धं २२६ शेषः ६७६।५००० स एकः पञ्चमांशो भवति, तेन उपरिस्त्रिकोण फलं १४४ वृत्तफलं २२६।१।५ एतेषां योगे ५७६ योनिकुण्डफलं सिद्धयति। श्रीधरगणितन्तु स्थूल भास्करोक्तमन्यदपिगणितं स्थूलमेव, यदाह कुण्ड-मण्डने—"अथवा परिधिविनिर्हता वृत्तफलंव्यासतुर्यांशः। परिध्यानयने तु द्वौ प्रकारौ तदुक्तं तत्रैव।

"द्वाविंशत्यानिहतो व्यासो मुनिभिर्विभक्त इति परिधिः।
किम्वामागोऽग्निनिहते खबाणसूर्यैर्हृतेफलंव्यासे।"

इद सर्वं मदुपयोगान्नेहोदाह्रियते। तस्मात्—

"आसन्न सप्तविंशत्यधिकं द्विशतं तदत्रवृतफलम्।
पञ्चशती षट्सप्तविरासन्ना तेन योनिकुण्डफलम्।"

वृत्तफलावशेषस्य पञ्चमांशस्य किञ्चिदूनत्वादासन्नेत्युक्तम्। अथसभाग गणितानां मतिदुरूहतया अङ्गुलयवयूकाक्रमेण साधितं बधनीयांशम्। सर्वेषुकुण्डेषु सिद्धवन्निर्दिशति कुण्डमण्डनम्। अत्रैक हस्तयोनौ षड्यवांशा अङ्गुलानि पञ्चयवः एकोयूका चैकालिक्ष : पञ्चेतिसिद्धनिगदोऽयम्। एक-करयोनौ ब्रह्मसूत्रेवर्धनीयांशाः ५।१।१।५। अंगुलयवयूकलिक्षाः। द्विकरा-यां योनौ मुन्यङ्गुलमुभौ यवावुभे यूके ७।२।२। अत्राधरव्यासफलं २८८ तन्मूलमेवहि तत्रलम्बो भूम्यर्धञ्च वृत्तव्यासः २४ तदेव कोटिभुजवर्गयोग-मूलं श्रोत्रिगत चतुरस्रकर्णश्च तस्यवर्गः ५७६ मनवाग्निनिघ्नः२२६१६५२

पञ्चसहस्र ।क्ते तत्रलब्धं ४५२ शेषः १६५२।५०००० । तत्फलतो यव-द्वयम् । उपरित्रिकोण भूम्यर्धस्यवर्धनीयांश व्यवकलितेन लम्बसूत्रेण घातः । २८८। तस्यैववर्धनीयांशेन घातः १२३।६ । तयोर्योगादुपरि-व्यस्तफलम् । ४११।६ एवञ्च २८८ परम् ४५२।२ इतरवत् ४११।६ एषां योगे ११५२ क्षेत्रफलम् ॥२॥ त्रिकरायामष्टाङ्गुलमृषियवयूका त्रया-धिकं वर्ध्यम् ।८।७॥३। अत्र क्षेत्रफल मुक्तदिशा स्वयमूहनीयमिहग्रन्थगौ-रवभयान्नोदाह्रियते ।३। "वेदकरायामङ्गुलदशकं द्वियवी त्रियूकमपिलिखे । १०।२।३।२॥४॥ पञ्चकरायां रुद्राङ्गुलवेदयवैक यूकभूलिखम् ।११।४।१।१ ५॥ षडहस्तायां मर्काङ्गुलवेदयवर्षि यूकयुग्मलिखम् १२।४।७।२॥६॥ सप्तकरायां विश्वाङ्गुलवेद यवर्षियूकमुनिलिखम्, विश्वे-त्रयोदश तेन १३।४।७।७। अत्र बालाग्र पञ्चकमपिवर्धयन्ति ॥७॥ अष्टक-रायां भुवनाङ्गुलवेदयवान्धि यूकयुग्मलिखम् । न्यासः १४।४।४।२ अत्र लिखायुग्मं बालाग्रन्यूनमाहुः ॥८॥ नवहस्तायां

"तिथ्यङ्गुलबहियवान्धि यूकमुनिलिखम् ।"

न्यासः १५।३।४।७॥९॥ दशहस्तायां "राजाङ्गुल नेत्रयव द्वियूकछतलिखम् राजानः षोड़श कृतानि चत्वारि १६।२।२।४॥१०॥ एवं क्षेत्रफलसम्वादि यात्रिकुण्डं रचयन्ता नर्वानाः । तन्मध्ये पञ्चमांशेन विकाश्य ब्रह्मसूत्रक-मिति तन्त्रराजवचने माः षट् षट्प्रमाणीवादिनां मते प्रमितीनां षड्विध-त्वात् । तथा च मांशेन षड़ंशेन सहपञ्चांशान् ब्रह्मसूत्रकं विकाश्य त्रिसम-न्वयवशादत्रैवार्ष वचनानां पर्यवसानं वर्णयन्ति । विंशांशत्रयस्यैकषडं-शेकिञ्चिन्न्यूने पर्यवसानात् । एवं

चतुरस्रीकृतक्षेत्रं पञ्चधाविभजेत्सुधीः ।
न्यसेत्पुरस्ता देकांश"मिति

शारदावाक्ये पञ्चधापञ्चभिश्चतुर्विंशांशैर्विभजेत्-संयोजयेत्। विपूर्वकस्य भजतेर्बलाहक क्षेदविभक्तरागामित्यादौ संयोगार्थकताया अपिदर्शनात्। तस्य बद्धितपंचमांशाधिकस्य मध्यसूत्रस्य पुरस्तादेकांशमेक मासन्नं षष्ठांशं न्यसेदितिसमन्वयः। सम्भवति—

"क्षेत्रे क्षिप्तवावहिरिहपुरोभूतभागेऽशमेक"

मित्यत्र समुच्चयवचने पुरोवर्धिते भूतभागे पञ्चस्वंशेषु एक मंशम्, एक षष्ठांशम् क्षिप्त्वा इति समन्वयात्प्रकृतपर्यवसान मवसेयम्।

यत्तु—"अष्टोनद्विशतांशसूत्रक चतुः कोणे पुरस्ताद्यदात्वष्टत्रिंशत मेधयत्वथलवान् श्रोण्योरिमानर्धशः।" अस्मोत्सूत्रयुगे त्रिकोणमितिच्छ्रोण्योस्तदर्धभ्रमाद्वृत्तार्धं बहिरालिखेदितिभवेत्कुण्डोत्तमं योनिव" दिति मतम्। तद्विवृत्यदूषितं कुण्डमण्डने—

"कुण्डप्रकाशिकायां गणितागमसारकोविदोरामः।
पादोनपञ्चभागानुदग्गुणाग्रे विवर्धयेद्बुद्धेः।
अर्धार्धन्तु श्रोण्योर्निवेशये त्तदनुकल्पयेत्सूत्रम्।
वृत्तार्धं सम्पातस्थानादाश्रोणि तद्वदपरमपि
सम्पादयेदिद मगकुण्डं पिप्पलदलाकृतीत्याह।

सम्पात स्थानात्-श्रोणिसूत्रस्य प्राक्-पश्चिमसूत्राय सम्पातस्थानात् आश्रोणि आश्रोणि-सूत्राग्रम्। इदञ्च श्रोणिसूत्रार्धं विभज्य तन्मध्ये कर्कटकोटिंनिखाय ततः श्रोणिसूत्र चतुर्थांशेनद्वितीय कोटिं प्रसार्य परिलिखनीयम्। तत्रक्षेत्रफलसम्वादो यथा—तत्रत्यस्ये लस्वरचतुरंशाः पञ्चमेदिनीविधवः ११५।४ भूम्यर्धं त्वष्टांशास्तावन्तः ११५।८ ततस्तद्वृत्ति क्षिभूनिगमाः।

एकस्य द्वात्रिंशद्भागस्य च नवलवाः ४१३।६।३२। अथ व्यासः। वृत्त-स्यतिथि शशाङ्काष्टम ११५।८ भागास्तत्समागवर्गस्तु शरदकद्विवह्निधि-वोवेदरसांशा १३२२५।६४ भनन्दवह्निहतात्। ३६२७ तस्मात्पञ्च सहस्रे ५००० भक्ते लब्धं द्वितर्कहरिणाङ्काः। १६२ एकस्य च रूपस्य व्योम-चतुष्टयदगग्निभागस्य। शरमुनिशरकृतगावोभागा इति६४५७५।३२०००० सर्वयोगतोजातम्। आसन्नं षट्सप्तत्यधिकं पञ्चशतमित्थमप्यत्र।

अत्र साग्रं यवत्रयमन्तरालं पततीत्यत उक्त मासन्नमिति। इत्थ-मपात्यत्रापिकारेण क्वचित मस्वरसमाविर्भावयति—

"अविलम्बता भुजानां वैषम्यं वृत्तवैकृतंचेति।
दोषान्दृष्ट्वा विबुधैः पद्योऽयमुपेक्षितोनव्यैः।

इद मुपलक्षणम्। आमयेत्पश्चिमाग्रकात्।

"उत्तराग्रावधि तथा दक्षिणाग्रावधि प्रिये।"

इत्यनेन कादिमते मध्यमसूत्रद्वयाग्रावधि भ्रमणमुक्तम्।

"तन्मध्यतिर्यक् सूत्रान्तद्वयावष्टम्भतस्तथा।
विकाशित ब्रह्मसूत्रावधिसूत्रद्वयंभवे"

दित्यनेनोपरि त्रिकोणस्य पार्श्वकोणौ मध्यमतिर्यक्सूत्रप्रान्तयोः कथितौ। तदुभयत्रिगोधादनार्थो रामोक्तः कन्यः स्वकोलकाल्पनिक इति ध्येयम्। यत्तुकादि मते—

चतुरस्राभितोयात्तु त्यक्ताभूः साग्रतः स्थिता।
लभ्यते सर्वकुण्डेषु तेन सर्वाणि सर्वतः।
तत्समान्येव जायन्ते पण्णवत्यङ्गुलात्मनेत्युक्तम्॥

तद्विदुषं सिद्धान्तशेखरे—

"क्षेत्रस्य चतुरस्रस्य समं सूत्रं चतुर्गुणम् ।
योन्यादि सर्वकुण्डानां पर्यन्तेषुनियोजयेत् ।
चतुरस्रसमं तच्चेच्छुभंयोन्यादि कुण्डकम् ।

इदं नव्योक्तयोनि कुण्डमात्रे सम्बदति नान्यत्रेति राघवभट्टः । तत्रापि-स्वल्पमन्तर मस्त्येवेति वस्तुगतिः । तथा हे—योनिकुण्डे चतुर्भागस्य परिधिः "व्यासेभनन्दाग्निहतेविभक्ते खवाणसूर्यैः परिधिस्तुसूक्ष्म" इति-बाटीदिशानेयः व्यासः १६७।६ भनन्दाग्निः ३९२७ हतः ६६६३६।२।२ खवाणसूर्यै १२५० विभक्तः लब्धम् ५३।२।३ उपरित्रिकोणस्य पार्श्वभुज-योर्मानम् २०।७।३।२।५ तेषां त्रयाणांयोगे ९५।१।१।६ इति सम्पद्यते नतु षण्णवतिः पूर्णा । कुण्डान्तरे व्यभिचारस्तु तत्र तत्रैव व्यक्तीभविष्यति । तस्मात् षण्णवत्यङ्गुलात्मनेति यत्तन्त्रराजवचनम्- तन्न । परिधिसूत्राणां षण्णवत्यङ्गुलतापरम्, किन्तु कष्ठशून्यस्य द्वादशाङ्गुलोच्चमेखलस्य हस्तमित-खातस्य स्वयमेवोक्तस्य कुण्डस्वरूपस्य पुरुषायत षण्णवत्यङ्गुलपरिमाण-परम् । तदुक्तं तन्त्रराजे तत्रैव—

"मध्यमाङ्गुलिमध्यस्थ पर्वणः परिणाहतः ।
तृतीयोंऽशोभवेदत्र तन्त्रे सर्वत्र चाङ्गुलिः ।

अत्र पर्वपदेन ग्रन्थिरेखैवोच्यते, ग्रन्थिद्वयान्तराल परिणाहस्योत्तरोत्तरन्यून-तयानव्य साय प्रसङ्गात् । "सन्धिर्नापर्वपरुषी" इति कोषे सन्धिवाचक-तया पर्वपदानुशासनाच्च सन्धेये पर्वपदप्रयोगोगौण्यः ।

तैश्चतुभिर्भवेन्मुष्टि वितस्तिस्तुत्रिभिर्गुणैः ।
अरत्निस्तु द्वयेनस्याद्धस्तस्तद्द्वयतः शिवे ।

तद्वद्वन्तु भवेद्व्याम तन्मानास्यान्नगोन्नतिः ।
षण्णवत्यङ्गुलासास्यात् तन्मानैः कुण्डकल्पनम् ।"

इदमश्राकृतम् । द्वादशाङ्गुलानि श्रोणिमेखलायाः अरत्निमात्रं श्रोणिभित्तेरुच्चत्वम् । एवमेवांसेऽपि सार्धारत्निमितमुच्चत्वम् । खाताधरभूमेर्व्यासस्तु भवत्यरत्निमिति" इति कुण्डगर्भश्चतुररत्निस्वरूपः । षण्णवत्यङ्गुलायाम् इति भवतिपुरुषोन्नत्यायतं कुण्डमिति स्वतन्त्रतन्त्रेण तन्त्रराजेन कण्ठेनोक्त इति । तदुद्दिष्टायां द्वादशाङ्गुलमेखलायां कण्ठोनास्त्येव, किन्तु नवाङ्गुलादावेवेति कादि मतव्याख्यातारोवदन्ति, तथाविधान्यतात्पर्यक कादिवचन तात्पर्य भ्रममूलकश्च सूत्रस्य चतुरस्रस्य समं सूत्रं चतुर्गुणमिति लौकिक पुरुषवचनमिति तद्विसम्वादेऽपि न कापि क्षतिरितिदिक् ।

इति कुण्डकादम्बरीनिबन्धे श्रोणि कुण्डविवरणं नाम
तृतीय उल्लासः ।

अथार्द्ध चन्द्र कुण्डम्

कादिमते ।

तन्मध्येदशमां शन्तु परित्यज्याथ उर्द्धवतः ।
शेषांशां सप्रमाणेन तन्मध्यादुभ्रमयेत्तथा ।
अर्द्धचन्द्राकृतिर्येन भवेत्कुण्डे तदीरितम् ।

शेषांश परिमिते नांसस्याग्रज्या सूत्रस्य प्रमाणेन तन्मध्यात्, ज्यासूत्रमध्यात ।

त्रिपुरासारसमुच्चये ।

परित्यज्य भागद्वयंपंक्ति भागीकृतेत्रोपविष्टा दधस्ताच्चविद्वान् । परिभ्रामयेत्तेनमानेन सम्यग्भवेदर्द्ध चन्द्राह्वयंकुण्डमेतत् । एकस्यां दिश्येव भागद्वयपरित्यागे नाभिन्यासस्थलं चतुरस्र क्षेत्र मध्यवृत्तार्द्ध क्षेत्र मध्ययोर्वैषम्य.मलभ्यतेत्यतोऽधस्ता दुपरिष्टाच्चैकैभागत्यागउक्तः ।

शारदातिलके ।

चतुरस्रीकृतं क्षेत्रं दशधाविभजेत्सुधीः ।
एकमेकं त्यजेदंशमधऊर्द्धवञ्चतन्त्रवित् ।
ज्यासूत्रंपातयेदग्रे तन्मानादुभ्रामयेत्ततः ।
अर्द्धचन्द्रनिभंकुण्डंरमणीय मिदंभवेत् ।

अत्रक्षेत्रमानम्—२४ तत्र वर्जनीयंदशांश २४।१० द्वयं ४८।१० वर्जनार्थं-न्यासः २४।१।।४८।१० अन्योत्य हारगुणिहतौ हरांशाविति दिशासमच्छेदी-कृते २४।१०।।४८।१० वर्जिते च जातम् १६२।१० तयोर्द्वाभ्यामपवर्त्ते

६६।५ षण्णवतिः पञ्चांशाः करणीस्वरूपं तद्द्विगुणं १६२।५ सम्पूर्णवृत्त-व्यासः तत्रांशछेदयोर्वर्गः। ३६८६४।२५ वर्गेकृतीघनविधौच घनौविधेया-वितिपाटीसूत्रात्, तस्मिन्व्यासवर्गे भनवाग्नि ३६।२७ निघ्ने —
१४४७६४६२८।२५ तत्रछेदंलब्धपरिवर्त्यहरस्य शेषः काय्योंऽथभागहरणे गुणनाविधिश्चेति सूत्रानुसारेण भाज्यलब्धानां भाजकछेदेनैकेन भाज्यछेदा-नां २५ भाजकलवेन ५००० । गुणनेन्यासः १४४७६४६२८।१२५००० लब्धं ११५८ शेषः १४६२८॥१२५००० तयोरर्द्धं ५७६ अङ्गुलानि शेषः—१४६२८॥१२५००० तथाच यत्रार्द्धाधिक मङ्गुलत्रयं क्षेत्रफलमधिकं भवतीत्यभिधाय राघवभट्टः, स्वयमसूत्रयत—

"चतुर्विंशतिधा भक्ते सूत्रव्यासेऽर्द्धचन्द्रके।
विंशांशत्रयमेकस्य भागाएकोन विंशतिः।"

एतन्मानार्द्धं भ्रमणेदलेन्दवग्रे गुणार्पणात्। एवञ्च १६।३।२० एतावती करणी सिद्धयति, अग्रे उदग्रे गुणार्पणात् ज्यासूत्र पातनेन इदंच ज्या-क्रान्त्यधिकंवर्जनीयभागं द्वेधाविभज्यैकमंश मधस्तादेकमंशमुपरिष्टाच्च त्य-क्त्वा तत्रोपरिभागेनिवेशनीया।

एतेनाधरीण भागेज्या ज्यायामेव योनिरुपरित्वधोमुखं वृत्तार्द्ध मित्याकारकंकुण्डं कल्पयन्तः परास्तावेदितव्याः। शेषांशांश प्रमाणेन तन्मध्याद्भ्रमयेदिति तन्त्रराजेनांससूत्र मध्यमावधिना शेषांश परिमितेन सूत्रेण भ्रमणाभिधानेन वृत्तार्द्ध मुखस्योर्द्ध मुखतासिद्धेः। इदं मत मनु सृत्यैवोक्तं कुण्डमण्डने।

"दक्षिणदिशि सौम्याग्र शशाङ्क शकलाममविकलं कुण्डम्।
चतुरस्रव्यासं जिनभागं कृत्वोपरिद्वयं त्रयोः।

अधरेविंशांशत्रयहीनं भागत्रयं विलुप्यशिष्टेन ।
व्यासार्द्धेन परिलिखेद्वृत्तार्द्धं मुद्गगुणाग्रतोज्यांश्च ।
तस्मिन्क्षिप त्यसदृशंबलक्ष पक्षार्द्धं ऋक्षराजस्य ।
संपातयेदुदीतं ललाटमिव यज्ञपुरुषस्य ।
व्यासार्द्धे द्विगुणे स्मिन्वृत्तेव्यासोरमाङ्गमुनिविमिता ।"

विशांशा ७६६।२० तस्यकृती रस शर मुनि सर्कनागबाणमिताः । वेद शतांशा ५८६७५६॥४०० तस्मित्मनन्द शिखिभि ३६२७ र्हतेलवाजाताः। नेत्रेन्दुनाग गगन गोग्लौवेदवियद्वह्निलोचन प्रमिताः २३०४१६०८१२॥ ४०० तेऽमी चतुःशतच्छिद इत्थं भाज्याः शिलीमुखमहस्रैः ५०००। सच्छेदभाग इत्योरच्छेदकल्पये च्छिदात्मकामू । भाजकलवेन भाज्यच्छेदं तस्य छिदा च भाज्यलवान् । हन्याद्वारेण लव विभजेदित्यत्रजायतेछेदः । प्रयुतद्वय २३०४१६०८१२॥२०००००० । मथलब्धं भाजनफलं दस्र-पञ्चभूविधवः ।११५२। रूपाण्येकस्य द्विप्रयुतविभागस्य कतिषये १६०८१२ ॥२००००० भागाः । वृत्तफलार्धं प्रकृतेफलं स्वधाधाम खण्डकुण्डस्य । ५७६ इत्थंफलसम्वादिखण्डेन्दु कुण्डमभिहितम् । कामिके चतुरस्रग्रहैर्भक्ते स्यत्कार्याद्यान्त्यौतदंशकौ । मध्येसप्तांशमानेन कुण्डंखण्डेन्दुवद्भ्रमादिति तद-स्यन्तविषम्वादि यदपि एकोनविंशत्या विंशद्वादशांशाभ्यांलवैः । प्राच्य-न्तादुभ्रमयेदवृत्तदलं प्रत्यग्धनुः स्थितीतिरामवाजपेयिना विंशांशद्वादशका-धिका १६।१२।२० ऊनविंशतिर्हिकरणीत्युक्तम् । तद्व्यासार्धं वर्गवर्गा-त्क्षेत्रफलं दशगुणान्मूलमिति श्रीधरगणित क्रमेणैव सम्वदति नतु भास्क-रीय सूक्ष्मप्रकारेण । अत्र प्राच्यन्तादित्यवद्धं स्वयमेव यमदिशिशशि-दिङ्मुखी निवेश्येति रामेण दक्षिण कुण्डस्योत्तराग्रत्वकथनेन पूर्वापरविरो-धादिति दूषणमभिदधानो राघवमङ्गो वभ्राम ।

"उत्तराशामुखोदेवि यदाचक्रं समुद्धरेत् ।
उत्तराशातदाज्ञेया पूर्वाग्रेति न संशयः ।"

इति श्रीचक्रोद्धार प्रकरणपठ्यमानवचनस्यात्रापि संचारणेन कुण्डाग्रे प्राची-व्यवहारस्य तान्त्रिक सम्प्रदायसिद्धत्वात् । अतएव तन्त्रराजे—

"उत्तराग्रावधितथा दक्षिणाग्रावधि स्थिये ।"

इत्यनेनोत्तराग्रे योनिकुण्डे श्रोणिभागः पश्चिमेति । पूर्वभागस्तु दक्षिणेति, पश्चिमभागः उत्तरेति व्यवहृत इति ध्येयम् ।

"अथहस्ताधिक्यवशाद् व्यासार्धे वर्धनीयगुणनिगदः ।
तत्रयं व्युत्पत्तिवृत्तेयत्फल मभीष्टतोद्विगुणम् ।
हृत्वापञ्चसहस्रे स्तद्विभजेद्वनन्ददमुनोभिः ।
लब्धस्य मूलमर्धं करणीस्यादर्धचन्द्रकुण्डस्य ।
इत्थं विलोमविधिनालब्धानिगदाभि सिद्धवत् करणीः ।
एककर ऊनविंशत्यङ्गुल मेकोयवस्तथायूका ।"

लिक्षाः पञ्च १६।१।१।५॥ द्विकरेमाङ्गुलमथ पञ्चसाग्रिमायूकाः २७।५ त्रिकरेऽधिका त्रिंशद्रूपाणि यवस्त्रियूक षड्लिक्षम् ।३३।१।३।६ वेदकरेष्टात्रिंशद्रूपद्वियवत्रियूकयुग्मलिक्षम् । ३८।२।३।२। पञ्चकरेद्विश्रुत्यङ्गुलरसयववेद यूकमुनिलिक्षम् । ४२।६।४ ७। षड्ढस्ते षड्वेदाङ्गुलसप्तयवद्वियूक ४६।७।२ मुषिहस्ते पञ्चाशदङ्गुलं यवपञ्चकयूकाद्वयाब्धि लिक्षयुतम् । ५०।५।२।४। अष्टकरेवेदसिङ्गुलमेकयवद्वियूकमुनिलिक्षम् ।५४।१।२।७ नवहस्ते, पञ्चाशत्सप्तम्यधिकाङ्गुलानिवेदयवम् ।५७।४। दशहस्ते षष्ठ्यङ्गुलमब्धियवञ्चेति ६०।४ सिद्धवन्निगदः ।

इति कुण्डकादम्बरी निबन्धेऽर्धचन्द्र कुण्डविवरणं नाम
चतुर्थोल्लासः ॥४॥

अथ त्रिकोणकुण्डम्

तत्र तन्त्रराजे—

"तस्यैवषष्ठमंशं तु पार्श्वयोः प्रविकाशयेत् ।
प्रत्येकं पश्चिमेसूत्रे तन्मानेनाथसूत्रयोः ।
विन्यासाद् ब्रह्मसूत्रान्तं तद्द्वयाग्रावलम्बनात् ।"

कुण्डं त्रिकोणमुदितमिति । तस्य प्रकृति भूत चतुरस्रस्य पश्चिमश्रोणि सूत्रे पार्श्वयोः प्रत्येकं षष्ठांशं विकाशयेदितिसमन्वयः । तेनैकहस्तकुण्डे-द्वात्रिंशदङ्गुलं श्रोणिसूत्रंभवति । तावत्परमाणकंसूत्रद्वयं श्रोणिसूत्राग्राव-लम्बेन पुरोवर्त्ति ब्रह्मसूत्रेयोजयेदिति क्रमभुक्तं त्रिकोण कुण्डमुपपद्यते । सारसमुच्चये—

"शर्वरीशार्धभागीकृतक्षेत्रतः पार्श्वयोर्न्यस्यभागद्वय पण्डितः ।
तेन मानेनसूत्रत्रयं विन्यसेत्कुण्डमेतद्भवेत्तत्रनेत्रास्त्रकम् ।"

सर्वरीशार्धं ८, एतन्मतेत्रिंशदङ्गुलानि त्रीणि सूत्राणि भवन्ति, पार्श्वयोः प्रत्येकभागद्वयं, भागद्वयमित्यर्थे तु षड्विंशदङ्गुलानि । शारदायाम्—

"चतुर्धा भेदितेक्षेत्रे न्यसेदुभयपार्श्वयोः ।
एकैकमंशं तन्मानादग्रतोलाञ्छये ततः ।
सूत्रयुग्मं बुधः कुर्यात् त्र्यस्रंकुण्डमुदीरितम् ।
एकैकांशस्य श्रोणिसूत्रपार्श्वयोर्वर्धनात् ।
षट्त्रिंशदङ्गुलमितं तत्सिद्धयति ।

अग्रसूत्रेचैक चतुर्थांशयोजनात्त्रिंशदङ्गुलमितो लम्ब इतिसु लम्बगुणेभूम्यर्धे

१८ जातम्, ५४० क्षेत्रफलमेवं पट्त्रिंशदङ्गुलम् फलं हीयते। तन्त्रराजमतेतु भूयान्फलविसम्वादः। किञ्च शारदामते भुज ३० तद्वर्गः ६०० कोटिः १८ तद्वर्गः ३२४ तयोर्योगः १२२४, तन्मूलं ३३।।१५।६७ इति कर्णभूतयोः पार्श्वभुजयोर्मानेन सह विषमंभूमि भुजमानमिति विषमभुजत्वं त्रिकोणस्यदोषः। द्वात्रिंशदङ्गुलंसूत्रं त्रिधातत्पातयेद्ध्रुवम्। पूर्वाग्र कुण्डमाधायत्रिकोणं तत्र कारयेदिति महाकपिलपञ्चरात्रमतेऽपि भूयानेव फलविसम्वादः। कामुके—

त्रिभागं वृद्धितोमत्स्यैस्त्रिभिन्नै र्गोचरं भवेत्।

नैशाचरं नैर्ऋतकुण्डमत्र, चतुर्वर्गचिन्तामणौ दानखण्डे हेमाद्रिणा त्रिषु स्थानेषु त्रिभागवृद्धिरभिहिता। यथा च श्रोणिसूत्रम् ४० लम्ब ३२ भूम्यर्धस्य २० लम्बेन ३२ गुणनेजातम् ६४० चतुष्यष्ठ्यङ्गुलमधिकम्। परेतु—ब्रह्मसूत्राग्रे तृतीयांशवृद्धिः, श्रोणिसूत्रपार्श्वयोस्तदर्ध वृद्धि रित्येवं कामिकवचनं व्याचक्षते। तन्मतेश्रोणिसूत्रं भूमिः ३२ तदर्धस्य १६ लम्बेन ३२ गुणनेजातम् ५१२ चतुष्यष्ठ्यङ्गुलं न्यूनम्। एवम्—

"चतुरस्रीकृतेक्षेत्रे क्षेत्रमष्टांशकं बहिः।
विन्यसेद्ब्रह्मसूत्राग्रे प्रतीचीसूत्रपार्श्वयोः।
सूत्राणां त्रितयं न्यस्येत्त्र्यस्रे कुण्डमुदीरित"

मिति सिद्धान्तशेखर वचनम्। तत्रापि भूयान् विसम्वाद इति स्मृतिद्वैफलसम्वादि शुल्बसूत्र रीत्या त्रिकोणं युज्यत इत्याशयेनाभिहितं कुण्ड मण्डने—

"नैर्ऋत्यां पूर्वमुखं त्र्यस्रंकुण्डतथातदुद्धारः।
चतुरस्रकर्ण गुणमितमायम्य प्राच्यवारुणसूत्रम्।"

तावन्मानश्रोणीसूत्राग्राभ्यां गुणौसमास्फाल्य। प्राच्यस्यगुणस्यमुखे नियोजयेन्यञ्चम्। प्रकृतिभूतचतुरस्रकर्ण सूत्रपरिमाणम् प्राचीसूत्रंविधाय तावन्मितश्च श्रोणिसूत्रमुपपाद्यश्रोणिसूत्रप्रान्त द्वयावष्टम्भेनवर्धित प्राचं सूत्राग्राभ्यांसूत्रद्वय मास्फालयेदितिवाक्यार्थः। अत्रास वुपपत्तिरुच्यते ऽस्मिंस्तुर्ल्लभाक्षयस्त्रिंशत्। ३३ एकत्रलवे मुनिषट्छिदि ष्यधिकषष्टि ६३।६७ भाग इति लम्बः। ३३॥६३।६७ छेदे ६७ हतेरुपे ३३ लव ६३ घनिनिघ्नति मुनि दगच्छिमितभागाः २२७४ प्रभवन्ति सप्तषष्टिछेदाः २२७४।६७ अथतस्यलम्बसूत्रस्य अर्धद्विगुणे छेदे तदेवभूम्यर्ध २२७४।१३४ मेतदेतेन निहतिलम्बेजातं रसमुनिखर्विंधुवाणाः ५१७१०७६॥८६७८ नागमुनिगोवसुछिद एवम् छिद्धाजितेलवेजातम्। रूपाणिपञ्चसप्तत्यधिकं पञ्चशत ५७५ मेकरूपस्य नागमुनिगोवसु भिदस्तर्काश्वमहीधरवारणभागाः। ८७२६॥८६७८ द्विकरव्यासोयावान्पूर्वं गदितः सएवहिज्यस्रे। अत्रैक करेलम्बोभवती त्यादिस्वयं सकलमूह्यम्। अस्यकल्पस्य प्राच्यैरनङ्गीकारादिद्विहस्तादि कुण्डकरणी मनीदिश्यैव दशकरकुण्डकर्णसूत्रादेः प्रागनिर्देशाच्च। तथाविध दशहस्तत्रिकोण कुण्डकरण मुद्दिशति। दशकरकुण्डे सप्ताधिकशत १०७ मेकस्य शरशशिद्वि २१५ भिदः भागास्तथैकसप्तति रित्येषादिक् प्रदर्शितापूर्वम्। दशकर कुण्डक्षेत्रफलम्। ५७६० द्विगुण ११५२० तस्यमूलम् १०७ शेषः ७१॥२१५ इयं दशकरत्रिकोणकरणीति समुदायार्थः।

अत्र फलाधिक्योक्तिर्भ्रममूला, शुल्वसूत्रमप्य। प्राउगेयावानग्नि स्तावद्विद्विगुणं करोति चतुरस्रम्। तस्य पुरस्तात्करणीये श्रोणयौ श्रोऽग्निरित्येवम्। एते व्यस्ताः शुल्वसूत्र प्रतीकाश्छन्दोऽनुरोधाद्गृहीताः। प्रउगमिति त्रिकोणक्षेत्रस्य याज्ञिक समयसिद्धासंज्ञा, यावानग्निर्यावत्परिमाणं त्रिकोणंचिकीर्षितं तावद्विगुणं चतुरस्रं करोति—कुर्यात्। तस्य

चतुरस्रस्य प्राच्यसूत्रं पुरस्तात्पदार्थः सैवत्रिकोणस्यकरणी लम्बसूत्रं ये कोण्यौ यौ पश्चिमसूत्रस्यप्रान्तौ सोऽग्निस्त्रिकोणक्षेत्रस्य पार्श्वकोणस्तेन तदष्टभ्येन करण्यग्रेसूत्रं पातनीयमिति शुल्वसूत्रखण्डानामर्थः। अत्र क्षेत्रफलमङ्गुलद्वयमधिकं मुनिनाशिष्यबुद्धिक्लेशोमाभूदित्युपेक्षित मित्यभिदधानो राजसूयवाजपेयिनमनुमोदयन्राघवभट्टस्तयोरसौमहान् प्रमादो भ्रमोवाविशेषविद्वत्सामशेषतोमुमोष।

तथादि—पञ्चदशवाजसनेयिशाखान्निर्मिता पस्खलित ब्रह्मविद्यानस्य भगवतः कात्यायनस्य समाधिपरिपाक संस्कृताप्यवधान विप्रकर्षविषयालवादिभिर्दोषैरबाधित प्रसराद्दृष्टसाङ्ग सरहस्य श्रुतिजातार्थादृष्टि एवं विधे क्रतुकर्मोपकरणे व्यभिचरतीति नास्तिकेनापि नास्ति केनापि नाशङ्कितु मपिशक्यते, किमुतैवंविधे धर्मोज्वलीनधुरन्धरैः।

किञ्च द्विहस्त चतुरस्रक्षेत्रस्यपश्चिमसूत्र प्रान्तावारभ्य करण्यग्रे सूत्रद्वयपातनेन सम्पूर्णं त्रिकोणस्वरूपंक्षेत्रार्ध मभिव्याप्नोत्यर्धं त्यजतीतिहस्तमात्रफलकमस्य कस्तिरोदधीत प्रत्यक्षाविषयंहि वस्तु गणितक्रमेणोत्प्रेक्षन्तो परीक्षकाः। प्रत्यक्षसिद्धन्तुवस्तु विरुद्धगणितानि नबाधितुमीशते। नास्तिचात्रगणित विसम्वादः। तथाहि—"भूम्यर्धा सप्ताष्टाशीत्यधिकद्विशत्या २८८ मूलं तद्द्विगुणोलम्बः, लम्बस्यखण्डद्वयं पृथक्कृत्यैकेनखण्डेन भूम्यर्धस्यगुणने लब्धं २८८ द्वितीयेनगुणनेलब्धं २८८ तयोर्योगे ५७६ पूर्वफलमन्यूनानतिरिक्तलभ्यते। बाजपेयीवभृतीनां भ्रमबीवन्तु चतुस्त्रिंशत्पूर्णा द्विहस्त चतुरस्रकरणीति स्थूलदृष्टिरेव, तथा सति हि चतुस्त्रिंशता लम्बेन भूम्यर्धस्य सप्तदशानाङ्गुणने ५७८ द्वयङ्गुलाधिकं लभ्यत एव।

यदि चैवं स्थूलदृष्टि रेवाद्रता तदा द्विहस्त चतुरस्रस्य द्वयङ्गुलाधिका चतुरङ्गुलाधिका वा द्वद्विरित्यपि कुतोनाशङ्कितम्। तस्मादविस-

म्बादि क्षेत्रफलकमेव शुल्वकथितं त्रिकोणं तदाकारेणैव कुण्डकल्पनमुचित-मिति। अत्र प्राच्याः। पार्श्वभुजद्वयन्तु किञ्चिन्न्यूनाष्टत्रिंशदङ्गुलस्व-रूपं ३७॥७१।७५ न तथाप्यार्षत्वादिदं 'विषमभुज मप्युपादीयतामिति-दृश्यम्। शुल्वसूत्रस्येष्टकाचितिविनियुक्त त्रिकोण विधायकत्वेन स्मार्त-कुण्ड प्रकृतित्रिकोणाविषय कत्वात्। कुण्डप्रकरणपठ्यमानेन निरवकाशेन समभुजत्रयविधायकेन तन्त्रराजवचनेन बाधितत्वाच्च।

अथ साक्षादुपलभ्यमान श्रुतिमूलानां कल्पसूत्राणामनुमित श्रुति-मूलाभ्य स्तन्त्रराजादि स्मृतिभ्यो बलवत्तया न स्मृत्यन्तरेण कल्पानां बाध इति चेन्न। निरवकाशेन दुर्बलेनापि बलवतः सावकाशस्य बाधदर्शनात्।

नच सर्वे प्रत्यक्षश्रुति मूलका एव कल्पाः लिङ्गादिकल्पित श्रुति-मूलकताया अपि तत्र दर्शनात्।

"औदुम्बरीं स्पृष्ट्वोद्गायती ति"ति

श्रुतिविरोधेन सर्वा औदुम्बरी वेष्टयितव्येति कल्पसूत्रं लोभमूलक मिति सिद्धान्ताच्च। भाष्यकारेण कल्पसूत्राणां प्रामाण्यं श्रुतिपारतन्त्र्येण व्यव-स्थापितं नतु स्मृत्यन्तरापेक्षया तस्य बलवत्त्वम्, तस्य श्रुतिमूलकत्वेनैव स्मृतीनां प्रामाण्यमिति श्रुतीनामधुना पठ्यमानत्वेनानुमीयमानत्वेनचको-विशेषः। यत्र च स्मृतिः प्रत्यक्षश्रुति विरुद्धा तत्र स्मृतिमूलभूतश्रुते रनु-मानमेव बाध्यते। नन्वनुमिता श्रुति।

प्रकृते तु तन्त्रराजवचनमूलभूतायाः शुल्वसूत्र मूलभूतायाश्च श्रुते रश्रवणान्निरवकाशात्तन्त्रराजस्मृतिः शुल्वसूत्रं बाधेत, दृश्यते च निरवका-शेनाल्पबलेनापि बलवतः सावकाशस्यबाधः। अतएव—

"मा हिंस्यात्सर्वा भूतानी"

त्यभिहितहिंसाविषयतया चरितार्थाश्रुति पित्र्य पश्वालम्भक बोधकस्मृत्या बाध्यत इति, तस्मात्तस्यैव षष्ठमंशं तु पार्श्वयोः प्रविकाशयेत्। प्रत्येकमिति प्रमाणपुरन्दरस्य भगवदभिधानतया श्रुतिसोदरस्य स्वतन्त्रवचने षष्ठमंशमित्यत्र पूरणप्रत्ययस्यैकवचनस्य चार्थो नविवक्षितः। प्रविकाशयेदित्यत्र 'प्र'शब्दोपादानेन विकाशने किञ्चिदाधिक्यरूपः प्रकर्षोलभ्यते।

तथाच श्रोणिसूत्रस्यपार्श्वयोः प्रत्येकं किञ्चिदधिकान् षडंशान् विस्तारयेदित्यर्थः पर्यवस्यति। तेन समभुजता क्षेत्रफलसाम्यञ्चोपपद्यते इत्याहुः। तदुक्तं कुण्डमण्डने—

"प्राच्याः पुनरिह कुण्डेविषमभुजत्वं निरीक्ष्य कथयन्ति,
जिन भागे व्यासेरवि १२ भागानेकस्य"

गोकु १९ भागस्य। नवभागांश्चश्रोण्योरर्धार्धवर्धयेत्तथासिद्धे। श्रोणीसूत्रे तस्यान्तः खातशङ्कवोर्निखक्तपाशयुगा। श्रोणीसूत्रोद्विगुणोभयतः पाशानिरञ्छितामध्ये। रज्जुर्निरञ्छनेनाकृष्य स्थाप्येति जायतेत्र्यस्रम्। ३६॥ ९।१९। एतावदायतं श्रोणिसूत्रं तस्यान्त—योद्वौशङ्कू। श्रोणिसूत्रद्विगुणा प्रान्तयोः पाशवतीमध्ये। निरञ्छननामकाकर्षण सूत्रग्रथिताचैका रज्जुस्तस्याः प्रान्तपाशौ शङ्कौरासज्यनिरञ्छनं धृत्वाकृष्यनिरञ्छनस्थाने तृतीयः शङ्कुर्निखातव्यः। शङ्कोरारभ्यशङ्कुं यावत्त्रीणिसूत्राण्यास्फालयेदिति त्र्यस्रशरीरं सिद्धयति। तदुक्तं राघवभट्टेन—

"चतुर्विंशतिधाभक्ते सूत्रेऽथोभयपार्श्वयोः।
द्वादशांशान्नवैकस्य भागानेकोनविंशते।"

अर्धंशोवर्धयेत्त्र्यभि भवेत् सूत्रत्रयात्समादिति। अत्रोपपत्तिरस्मिंस्त्र्यस्रक्षेत्रे

भुजः क्रमः कोटेः। आबाधान्तस्यार्धं तस्माद्दृश्यक्त लम्बसंसिद्धिः।

"आबाधा साधनाय त्रिकोणफलसाधनाय च।
लीलावतीसूत्रद्वय मनुवदति।"

त्रिभुजेभुजयोर्योगः तदन्तरहतोत्तराकृतो लब्ध्या द्विघ्ना भूरुनयुतादलितावाधे तयोः स्याताम्। तयोर्भुजयोर्यंयोर्योगः प्रागुक्त स्तेन भुजभेदादाबाधाद्वयं बोध्यम्।

प्रकृते तु भूम्यर्धभुक्तगणित क्रमेणाबाधा सिद्धयति। आबाधा-भुजकृत्योरन्तरमूलं प्रजायते लम्बः। लम्बगुणंभूम्यर्धं स्पष्टं त्रिभुजे फलं भवति। इत्येवं लब्धाङ्गुलमेकत्रिंशद्विपादपञ्चयवी। ३१॥४।६, तन्निघ्नं भूम्यर्धं फलम्भवत्येकहस्त सम्वादि। अत्र भूमिः ३६।३।६।२।४ तदर्धं १८।१।७।१।२ लब्धोलम्बः। ३१।४।६। अत्र लम्बखण्डानां त्रयाणां मङ्गुलयव यूकानां गुणतीय भूम्यर्द्धखण्डानामङ्गुल यवयूकालिक्षावालाग्राणाञ्चन्यासेन गोमूत्रिकागुणनं विधेयम् अत्रोत्कृष्टपकृष्ट गुणमपकर्षमाप्यत

३१	४	६
१८	१८	१८
१	१	१
७ १	७ १	७ १
२	२	२

इति तुल्यजातीयताज्ञानायस्थाने स्थाने विच्छिद्य निवेशः। तत्र च प्रत्येकं गुणयित्वातजातीयेन तज्जातीयं योजयित्वानि कृष्टान्याभिमर्क्तृत्कृष्टजातीये-मागलब्धंफलं प्रवेशनीयमिति जातम्—५७६।१।२।६।३।७।४। इति क्षेत्र-

फल सम्वादः। लम्बानयनं विनापि त्रिभुज फल ज्ञानं संभवति तद्यथा सर्वदोर्युतिदलं चतुःस्थितं बाहुभिर्विरहितं च तद्धृतेः। मूलमस्फुटफलचतुर्भुजे स्पष्ट मेतदुदितंत्रिबाहुके। अत्र बाहुः।३६।३।६।२।४ तेषांत्रयाणां युतिः १०८।६।१८ ६।१२ तदर्द्धं ५४।५।५।३ ६। इदं चतुर्षु स्थानेषुस्थाप्यं तत्र येबाहवस्त्रिष्वपासनीयाः। चतुर्थमखण्डमेवस्थापनीयं तेन १८ १।७ ।१।२ इति त्रिधास्थाप्य श्चतुर्थन्तु ५४।५।५।३।६ इत्येव तस्यार्द्धाधिके पूर्णग्रहणमिति न्यायात्संक्षिप्यन्यासः। १८ २ इतित्रिः ५४।६ इतिसकृत् तेषां चतुर्णांघातः ३३२३७६।२।४ तन्मूलं ५७६ शेषः।

$\frac{५४३।२ ४}{११५३}$ एव स्फुटफलं चतुर्भुजे त्रिबाहुके च क्षेत्रे स्पष्टं फलं भवतीति गणितकारिका वाक्यार्थः। अस्फूट फलं चतुर्भुजे इति पाठेतु चतुर्भुजे इदं फल मस्फुटमनियतंविषमलम्बक चतुर्भुजे व्यभिचारात्। त्रिबाहुकेतु स्पष्ट मव्यभिचरित मित्यर्थः। अथसिद्धश्रेणिगुणोपवर्णनं ब्रूमएकहस्तादौ। सार्द्धप्रायान्द्वादशकरमात्र वद्धयेत्तेनस्युः। षट्त्रिंशदङ्गुलानि श्रुतियव ३६।४ सहितानि सूत्रपरिमाणे। द्विकरे विधुबाणाङ्गुलमिषुयव ५१५ समधिकमतःपरंत्रिकरे। षष्ठिस्त्र्यधिकैकयवाधिका ६३।१ श्रुतिकरे त्रिसप्ततिर्विलग्ना। विलग्नाकिञ्चिदूना ७२ ४।४ इतियावत्। पञ्चकरे विधुवसवः पञ्चयवा तदधिका ८१।५ अथ षड्ढस्तेएकोनानवतिर्यव युग्माभ्यधिका ८९।२ऽथसप्तमिते। चतुरधिकानवतिर्यवचतुष्क ९४।४ मथवसुकरे त्र्यधिकं। शतमे एकोयवश्च १०३।१। नवकरकुण्डेतु शतं नवाधिकं त्रियवी १०९।३ पंक्तिकरे पञ्चदशाधिकशतमधिको यवाविति ११५।२ ध्येयम्। एतानि सूत्रपरिमाणानि स्थूलानि व्यावहारिक तयोक्तानि सूक्ष्माणि तु स्ववुद्ध्याप्रणिधेयानि॥

रामस्तु—विषमबाहुचतुरस्रं निजगाद तस्य पद्यमिदम्। क्षेत्रस्य-

मध्यमगुणे दिनभागभक्ते श्रोण्योः पृथक्शरणवान् परिवर्ध्यधीमान । अग्रे-विनाष्टमनवेनदशाथसूत्रै स्त्र्यस्रित्रिभिर्भवति कुण्डमिह प्रयुक्तैः । अत्रैक-हस्तेभूः अङ्गुलानि ३४ तदर्धम् १७ लम्ब ३३॥७।८ सछेदरूपेषु लवाधन-र्णमिति सवर्णितः । २७१।८ भूम्यर्ध लम्बयोर्घातः ४६०॥७।९ छेदेन लवेभजे ५७६॥१।८ एकाष्टमांशहीनंहस्तक्षेत्रफलं लब्धम् । तथाप्यत्रभुजे वैषम्यदोषः । तस्य दोषत्वाभावे चतुर्विंशतिलम्बक मष्ट चत्वारिंशद्भूमिकं वा द्वात्रिंशद्भूमिकं षट्त्रिंशल्लम्बकम्वा षट्त्रिंशद्भूमिकम्वा त्रिंशल्लम्बक-म्वा त्रिकोणकुण्ड मित्यत्रानध्यवसायप्रसङ्गात् । बहुभिः प्रकारैः क्षेत्रफल-सम्वाद सम्भवात् । तन्त्रराजाद्युक्त समभुजताविरोधात् अनार्षत्वाच्च । तस्माद्विषम भुजश्चेत्त्रिकोणं तदा कात्यायनोक्तमेव नचेत्समभुजमुपपन्नक्षेत्र-फलं च सार्ध षट्त्रिंशदंशायत त्रिबाहुकं बहुमन्यामहे त्रिकोणकुण्ड स्व-रूपमिति ।

इति कुण्डकादम्बरी निबन्धे त्रिकोण कुण्ड विवरणं
नामपञ्चमोल्लासः ।

॥ अथ वृत्तकुण्डम् ॥

कादिमते—

"तन्मध्याष्टादशांशेन प्राक्सूत्राग्रं विकाशयेत् ।
तिर्यक्सूत्राद्बहिस्तेन मानेन भ्रामयेत्तथा ।
मध्यचिह्नावलम्बेचमवेत्तद्वृत्तकुण्डकम् ।

तन्मध्याष्टादशांशेन चतुरस्रक्षेत्रमध्यम सूत्रस्याष्टादशेन भागेन तिर्यक्सूत्रात-न्नक्षसूत्राग्रग्रथितमध्या देशद्वयावधेः सूत्रात् । प्रकृत चतुरस्रोपरिस्थिता दंशसूत्रादिति यावत् । मध्यमचिह्नं प्रागुदकसूत्रसम्पातः । तत आरभ्यवर्भित भ्राजविधिना मानेन भ्रामयेदिति वाक्यार्थः ।

त्रिपुराम्बार समुच्चये—

"दिग्गजम्यधिकपङ्क्तितः क्षेत्रतोनिशितधीर्वहिर्न्यसेत् ।
भागमेकक मनेन सर्वतोभ्रामयेद्भवतिवृत्तमुत्तमम् ।
पङ्क्तिर्दशदिग्गजा—अष्टौ तेनाष्टादश ।

शारदायाम्—

"अष्टादशांश क्षेत्रे च न्यसेदेकं बहिर्बुधः ।
भ्रामयेत्तेन मानेन वृत्तं कुण्डमुदीरितम् ।

अर्धवद्धनीय एकोऽष्टादशांशः १।१८ स ऊयत इद्धि द्धि गुण २।१८ स्तस्य द्वाभ्यामपवर्ते १।९ तस्य चतुर्विंशतौ क्षेत्रभागे योगार्थं न्यासः। २४।१।।२४।९ तौक्षमच्छेदौ २१६।९।।२४।९ तयोर्योग २४०।९ त्रिभिरपव-

र्तें ८०।३ अशीतिः तृतीयांशावृत्तव्यासः तद्वर्गः ६४००।९ भनखाग्निनिघ्नः २५१३२८००।९ तस्य पञ्च सहस्रेण छेदस्य ९ गुणनेलब्धो भाजकः ४५००० तेनांशस्य २५१३२८०० भागेलब्धम् ५५८ शेषः २८०॥ ४५००० तेनाष्टादशाङ्गुलानि किञ्चिदूनानि क्षेत्रेफल हीयन्ते। यत्तु—

"षोड़शधाकृत मध्यमसूत्र व्यासपुरः परिधितभागे।
एककएव ततोऽन्तरचिह्नान्मण्डल कुण्डमिदम।

भ्रमणात्स्यादितिगमेण सार्धाङ्गुलावृद्धि रभिहिता, तत्र सूक्ष्मगणनया २७ सप्तविंशत्यङ्गुलव्यासेवृत्ते ५७२ द्वासप्तत्यधिकं पञ्चशतं क्षेत्रफलमिति चतुरङ्गुलोहासः। एवं यदि चतुरस्रेसुसंसिद्धे तद्वाह्ये भागमष्टमम्। क्षेत्रस्यविन्यसेद्दिक्षु मध्यात्तन्मानसूत्रतः। मण्डलभ्रमणेनैववृत्तं कुण्डमितीरितम्। इति सिद्धान्तशेखरस्योभयतोऽष्टमांशयो र्वृद्धौ तात्पयम्, तदोवृत्तस्यत्रिंशदङ्गुलोव्यास इति भूयः फलाधिक्यम्। अथैकस्यैवाष्टमांशस्यार्धश उभयतोनिवेशस्तद्वचनार्थस्तदा सप्तविंशत्यङ्गुलानि वृत्तव्यास इति राममतवच्चतुरङ्गुलफलहासः। कामिके—

"कर्णार्धाष्टांशजन्न्यासाद्वृत्तं कुण्डमिहोदित"

मित्यत्र कर्णार्धम् १७ तस्याष्टांश २।१ तस्यत्यागेनावशिष्टः कर्णार्धभागः १४।७ सवृत्तकुण्डस्य व्यासार्धमित्यर्थश्चेत्तदा २९।६ व्यासः। पादोनात्रिंशदिति भूयः फलाधिक्यम्। अथ कर्णार्धाष्टांशस्य पौरस्त्यसूत्रे सम्यङ्न्यासादिति तद्वचनार्थस्तदापि २८।२ सपादाष्टाविंशतिर्व्यास इति फलाधिक्यमेव। एवञ्च मूलवचनानां फलविसम्वादे राघवभट्टः स्वयमसूत्रयत्।

वृत्तकुण्डे मध्यसूत्रं चतुर्विंशतिधाभजेत्।
एकांशपञ्चविंशांश सहितं सार्धमंशकम्।

बहिर्न्यस्यभ्रमोन्मध्याद्वृत्तं कुण्डमुदीरितमिति ।
वृत्तकुण्डे कर्तव्य चतुरस्रस्यमध्यमसूत्रं चतुर्विंशतिधाभजेत् ।

तत्र सार्ध एकांशएकपंचविंशतितमांश सहिता भ्रमणार्थं बहिर्वर्धनीय इत्यर्थस्तेनवृत्तव्यासः । २७॥२।२५ सवर्णितः ६७७।२५ तत्र व्यास्यवर्गे-भनवाग्निनिघ्न इत्यादिना लब्धं क्षेत्रफलं सूक्ष्मम्, ५७६।४ इतितस्यैव विवरणवाक्यं कुण्डमण्डने—

"वारुण्याप्रागग्रं वृत्तंस्यादस्य पश्चिमेयोनिः ।
प्रागग्रतायाः फलं पश्चिमेयोनिरिति ।

तत्र सामान्यतो वृत्तव्यास परिज्ञानाय करणसूत्रमिष्टक्षेत्रफले शरसहस्रनिघ्नं-५०० भनन्दभनजयैः लब्धस्य मूलमस्मिन वृत्तक्षेत्रे प्रकीर्तितोव्यासः तत्रैक हस्ते इष्ट क्षेत्रफलं ५७६ तत् शरसहस्रनिघ्नं २८८०००० तस्मादभनन्दानलै ३६२७ र्भक्तालब्धस्यो ७३१।०।५ स्य मूलम् २७।०।५ तेन सप्तविंशति-रङ्गुलानि पञ्चसाग्रायूका सिद्धन्ति । तत्र व्यवहारिकतया स्थूलं व्यासार्ध-मुल्लिखति—

"सार्धत्रयोदशाङ्गुलमिते यूकात्रयोट्वेन ।
व्यासार्धेनभ्रमणादेककरं कुण्डमुपपाद्यम् ।

अत्र विलोमविधिनासिद्धे व्यासे व्यभिचारो न सम्भाव्यत इति न तत्फल-प्राप्ति परिकर्मोदाहियते ।" एककरे हिमकरदलकण्डे या पुरा कीर्तिता करणी । सा द्विकरे व्यासार्धं १६॥३।२० व्यासस्तु ३८॥६।२० इत्य-प्यर्थसिद्धमव्यचारि चेति सिद्धमेतत् । त्रिकरस्यतु सार्धं विंशतिस्त्र्यधि-का । २३।४ एककर वृत्त कुण्डव्यासो २७।०।५।२ वेदकरमध्यसूत्रार्धं पञ्चकरव्यासार्धम् त्रिंशत्त्रियवी च सार्धयूका च । ३०।३।१।४ षट्कर

कुण्डेभवति त्रिंशदधिकासपाद एकयवः। ३३।१।२। सप्तकरे पञ्चाढ्या त्रिंशत्सार्धांश्च षड्यवाः सलवाः। ३५।६।४।५।१। अष्टकरेऽष्टत्रिंशत्सार्ध-प्रायौयवौ च। ३८।२।३। नवहस्ते चत्वारिंशत्सायकयवसहिताः ४०।५ दशकरे तुदग्वेदाः पञ्चयवाढ्या ४२।५ एवं व्यासार्धैः कल्पयेदखिलकुण्डम्। अत्र केचन व्यासार्धभागा व्यावहारिका इति स्थूला अपि गृहीताः। कात्यायनोऽपि—

शुल्बचतुरस्राम् मण्डलान् समाधातुम्।
मध्यादंशे कर्णं निपात्य तन्मध्यमार्द्धमानेन।
विच्छिद्यवदतिरिक्तन्ततस्तृतीयांशमादाय।
परिकल्प्यव्यासार्धं परिलिख्यात्समसमाधिरित्याह।

साध्यात्—दिक्सूत्रद्वय सम्पातस्थानात्, अंशे—अग्रिमकोणे, कर्णम्—कोण-सूत्रम्, निपात्यतंकर्णम्। मध्यमार्धमानेन—मध्यम सूत्रार्ध प्रमाणेन। विच्छिद्य यदतिरिक्त मवशिष्टम्—तत्तृतीयांशविच्छिन्ने कर्णसूत्रे ब्रह्मसूत्रे वा योजयित्वा तेन प्रमाणेन मण्डलं परिलिखेवसौ मण्डल समसमाधिः, प्रकृत भूत चतुरस्रतुल्य फलकोभवतीत्यर्थः। तथाच प्रकृतेहस्तक्षेत्रे कर्णार्ध-प्रमाण एकसप्तदशांशन्युनाः सप्तदश १७।१।१७ तत्सवर्णितं २८८।१७ तत्र कर्णमाने ब्रह्मसूत्रार्धप्रमाणस्य विच्छेदे शेषः ८४।१७ तस्य तृतीयांशः ८४।५१ छेदभक्ते अंशेलब्धम् १।३३।५१, १।५।१।३।२ इति यावत्। तेन द्विगुणेन ३।२।२।६।४ युक्तं मध्यसूत्रम् २४ जातम् २७।२।२।६।४ सचेदव्यासस्तदा क्षेत्रफले कतिपयान्यङ्गुलानि वर्धन्त इति रामबाजपेयी। तत्राह—अत्रफलाधिक्यमिति भ्रममूलो बाजपेयिनो जल्पः।

"एककरे चतुरस्रे नहि सप्तदशाङ्गुलानि कर्णार्धम्।
भुजकोटिवर्गयोगमूलं कर्णः।

तथाच प्रकृते भुजहस्त १ कोटिहस्त १ तयोर्वर्गयोगः २ तन्मूलम् १ मूलावशेषः १।३ तेन तृतीयांशाधिकोहस्तो द्वात्रिंशदङ्गुलानि कर्णः, तदर्धं षोड़श, यदि च कोटिभुजयोद्वैधोविभामस्तदा भुजः वितस्ती २ कोटिः २ तयोर्वर्गयोगः ८ तन्मूलम् २ मूलावशिष्टं ४।५ तेनत्रयस्त्रिंशदङ्गुलानि साधीनिकिञ्चिदून सप्तयूकाश्च कर्णं ३३।४ ६।७ स्तदर्धं १६।६।३।३।४ यदि च त्रेधाविभामस्तदा भुजकोटिवर्ग ९।९ योगः १८ तन्मूलं ४ शेषः २।९ तेन त्रयस्त्रिंशदङ्गुलानियवाः षट्किञ्चिदूनंयूकाद्वयम् ३३।६।१।७ इति व्यासः। तेन करणीगत मूलाना मियत्तायाः परिमातु मशक्यतया क्षेत्रस्य द्विभागताकल्पनेन कर्णं व्यासार्धं १६।६।३।३।४ तत्र ब्रह्मसूत्रार्धतक्षणावशिष्टं ४ ६।३।३।४ तत्तृतीयांशः १।४।२।१।३।४ तेन द्विगुणेन युक्तं ब्रह्मसूत्रं वृत्तव्यासः २७।०।४।२।७ तदनुसारेण क्षेत्रफलसम्वादो भवत्येवेति कात्यायनमुने रार्षदृष्टौव्यभिचारशङ्कानास्तिक्यमेव द्रढ़यति, नतुविशेषदर्शितां सप्तदशाङ्गुलेन स्थूलेन कर्णार्धेन गगनमालस्य निबन्धनमेव।

इति कुण्डकादम्बरी निबन्धे वृत्त कुण्ड विवरणं
नामषष्ठोल्लासः।

॥ अथ षड्स्रकुण्डम् ॥

तत्र तन्त्रराजे—

तन्मध्यद्वादशांशेन विकाश्यब्रह्मसूत्रकम् ।
तन्मध्यमानेन तथा कृत्वावृत्तमतिस्फुटम् ॥
तन्मध्येवृत्तमभ्यस्यकुर्यादर्धेन लाञ्छनम् ।
तत्र षट् सूत्रपातेन भवेत्कुण्डं षडस्रकम् ॥

तन्मध्यस्य प्रकृति चतुरस्रब्रह्मसूत्रस्य द्वादशांशेन ब्रह्मसूत्रं विकाश्य तेन व्यासार्धेनमण्डलं परिलिख्य तन्मण्डलमध्ये वृत्तमध्यमसूत्रस्यार्धान्तरालानि लाञ्छनानिलिखित्वा तेषु षट् सूत्राणि पातयेदितिक्रमः । तन्मध्यषोड़शांशेन विकाश्य ब्रह्मसूत्रकमितिपाठः केनचिल्लिखितः, प्रथम पाठेऽष्टाविंशतिरङ्गुलानि तस्य वृत्तव्यासः, द्वितीयपाठे तु सप्तविंशतिरङ्गुलानि । त्रिपुरासारसमुच्चये—

"भूपांशेच्छाद्वयमिहबहिः पार्श्वयोर्न्यस्यमध्यात्क्षेत्राभ्यासेस्वविमल मतिस्तेन मानेनकृत्वा । पार्श्वद्वन्द्वे समयुगयुगं सूत्रषट्कस्यपातं कुर्यात्कुण्डं भवतितदिदं तर्ककोणं मनोज्ञम् । भूपांशे १६ क्षेत्रै एकैकेभागं दक्षिणोत्तर सूत्रस्याग्रयोर्वर्धयित्वा तत्रचिह्नद्वयंदत्वा मध्याद्वर्धितभागावधिना प्रमाणेन वर्धिताग्राधरोर्द्ध्वभागयोर्द्वयं द्वयंचिह्नंकृत्वा सर्वाणि च चिह्नानि मध्यात्तुल्यान्तराणानि यथास्युस्तथाप्रमाय चिह्नाच्चिह्नेषट्सूत्राणि पातये दिति निरपेक्षैवेयंरचना । शारदातिलके —

"अष्टधाविभजेत्क्षेत्रं मध्यसूत्रस्यपार्श्वयोः ।
भागं न्येसेदेकमेकं मानेनानेनमध्यतः

कुर्यात्पार्श्वयुगेमत्स्यचतुष्कं तन्त्रवित्तमः ।"
सूत्रषट्कं ततोदद्यात् षड़स्रं कुण्डमुत्तमम् ।

एकमेकं खण्डशः कृत्वा एकं भागमर्धशः पार्श्वयोर्मध्यसूत्रस्य दक्षिणोत्तर सूत्रस्य वर्धयेदित्यभिसम्बन्धात्पूर्ववचनैः सहैकार्थकत्वमस्येति केचित् । राघवभट्टस्तु—

"एकमष्टमभागं तिर्यङ्मध्यसूत्रस्योत्तरत एकञ्च तदक्षिणतो-न्यसेदित्यर्थैकतया त्रिंशदङ्गुलं तत्सूत्रमिति व्याचष्टे । पार्श्वयुगेतिवर्धित सूत्रस्य वामदक्षिण पार्श्वेषु मत्स्यचतुष्कं कुर्यादित्यर्थः । मत्स्योत्पादन प्रकारस्तु—क्षेत्रमध्यादुत्तरचिह्नावधि प्रसारितस्यैकां कोटिं क्षेत्रमध्येनिखाय पूर्वैशानयोरन्तराले वृत्तार्ध निर्माय मध्यखाताङ्कोटिमुत्खाय तदुत्तरचिह्ने नि-खाय द्वितीययाकोट्या पूर्वकल्पितवृत्तार्धंव्यतिभेदिवृत्तार्धान्तरं लिखेदिति पूर्वोत्तरदिगन्तरालमत्स्यनिष्पत्तिः । एतमेव क्षेत्रमध्याद्दक्षिणादिक्कृत चि-ह्नाच्च पूर्वाग्नेय दिशोरन्तराले नर्ऋत पश्चिमान्तराले च मत्स्यं निष्पाद-येत् । तथैव क्षेत्रमध्यादुत्तरचिह्नाच्च पश्चिमव्यायव्यदिगन्तराले मत्स्यमुत्पादये-दिति चिह्नषट्केसिद्धे तत्र चिह्नाच्चिह्ने षट्सूत्राणि पातयेदिति षड़स्रसिद्धिः ।

अत्र षड़स्रक्षेत्रारम्भकं त्रिमुखचतुर्भुजद्वयम् । तत्र भूमि ३० मुखं पञ्चदश १५ लम्बः १३ लम्बेन निघ्नं कुमुखैक्य ४५ खण्ड २२।४ मिति-कृतेजातम् २९२।४ एवं द्वितीयचतुरस्रफलमपीति, तयोर्योगे ५८५ जात-मिति नवाङ्गुलानि फलवृद्धिर्दोषः, तत्परिहाराय राघवभट्टः स्वयंनिरबोचत् ।

"षड़स्रेमध्यसूत्रन्तु चतुर्विंशतिधा भवेत् ।
तच्चैकनवांशोनत्र्यंशैः सम्भज्यमध्यतः ।
आमयेत्तेन सम्वृत्तं तद्व्यासार्धेन लाञ्छयेत् ।
षट्सु स्थानेषु षट्सूत्रपातनात् तत् षड़स्रकमिति ।

तदेतदनुवदति कुण्डमण्डनम्—

वायव्यदिशिषड़स्रं कुण्डे प्रागग्रमस्यविन्यासः ।
चतुरस्रस्य व्यसेजिनभागे सौम्यसूत्रार्धम् ।
त्रिभिरंशैर्नवमलवव्यवकलितैर्वर्धयेत्ततस्तेन ।
व्यासार्धेनपरिलिखेन्मण्डल मिहषट्चिह्नानि ।
तुल्यान्तराणि विलिखेत्प्रतीच्यसूत्राग्रमेकमपहाय ।
चिह्नाचिह्ने जीवाः षडाप्यासार्ध मानगुणमात्राः ।
आस्फाल्य वृत्तपरिधिं लुम्पेदित्यत्र सेयमुपपत्तिः ।
तत्रोपपत्तौ प्रक्रान्तायां व्यासार्धगुणमात्रीज्येत्यत्रबीजमाह ।"

मण्डलषडस्रकरणेज्यामानं भास्करीयपाटीस्थम् । व्यासं षडयुतगुणितंविभजेद्विद्वगुणेन गुणकेन लब्धज्यामानमितिक्रमेण सूत्रार्धमत्रज्या, अर्थानुरोदाऽयम् पाठ्यान्तु खखखा ६०००० भ्ररसैरित्युपक्रम्य वृत्तव्यासे समाहते । खखखाभ्रार्क १२०००० सम्भक्ते लभ्यन्तेक्रमशो भुजा इत्युक्तम् । अथफलसम्बादोऽत्रक्षेत्रेविषमौ चतुर्भुजौ भागौ । भूमिस्तत्रैककरे त्रिंशन्नवमांशयुगलपरिहीना । ३०।२।६।।२६।७।६ गोद्वय २६ ङ्गुलमङ्गं ६ यवं किञ्चिन्न्यूनंद्वि २ युक्तमितियावत् । मुखमस्यव्यासार्धं भुवनाङ्गुल मुनियवैक्यूकमितम् । १४।७।१ आबाधासप्ताङ्गुल यत्रयाम्योधियूक कृतलिप्तम् । ७।३।४।४। बाहुर्मुखमितएव स्वाबाधाबाहुवर्गविवरपदम्, लम्बोद्वादशमानाङ्गुलानि १२ किञ्चित्सशेषसप्तयवोः । लम्बहतेभूमुखयोर्योगार्धे ४४।५।३। वसुगजाश्विरूपाणि । २८८ आसन्नानि द्विगुणं तज्जातंतर्कसप्तबाणमितम् । ५७६ । राघवभट्टस्तु—

"आयतचतुरस्रं त्रिकोणद्वयञ्चेतित्रयाणां क्षेत्राणामिह सन्निवेशाशेषां फलानां योजनेन षड़स्रफलं सम्बादयाम्बभूव । अथवृत्ते वृत्तस्य-

व्यासान् द्विकारादि तर्कंकोणेषु। द्विकरे द्वयधिकाचत्वारिंशत्सयवा ४२।१ त्रिहस्त षट्कोणे एकाधिकपञ्चाशद्यूकालिक्षा यवाश्चत्वारः। ५१।४। ४।४। वेदकरे त्वेकोनाषष्टिः सार्धैर्यवै सहचतुर्भिः ५९।४।४ पञ्चकरे षट्षष्टिः श्रुतियवशरयूकाकृतलिक्षम्। ६६।४।५।४ षड्हस्तेद्वा सप्ततिर्ऋषियवशिखियूककृतलिक्षम् ।७२।७।३।४ सप्तकरेऽष्टासप्ततिरङ्ग यवश्च द्वयूकलिक्षाग्र्यम् ७८।६।२।१। नवहस्ते ऊननवतिर्द्वियवी शरयूकयुग्मलिक्षम् ।८९ २।५।२। दशहस्ते चतुरधिका नवतिर्यैवयुगलाकश्चिदंशाग्र्या ९४।२।०। एवं सिद्धे व्यासे तदर्धमास्फालयेत्क्रमेणज्याः। कुण्डप्रकाशिकायाम्—दीक्षितरामः षड्स्रनिर्माणे—

"वैकल्पिक पद्धयुगं निजगादानूद्यते तदस्माभिः।

जिनलवचतुरस्रक्षेत्रमध्यस्थसूत्रे जस्रनिधिलववृद्धे पार्श्वयुग्माधरोद्भवे, अनलव मिताङ्कौ पार्श्वयुग्माधरोद्भवौविति रसगुण योगोल्लक्षास्यात्षड्स्रम्। अष्टोनद्विशतांशकेऽन्तरगुणे क्षेत्रस्यमध्यस्थितान्तः सूत्रोभयतोभवर्धनभवाङ्कोर्ध्वाधरे चिह्नयेत्। तत्त्वांशेषु पुनः पुरोऽप्यधरतोऽङ्कद्वयंश वृद्धयाभ्रपद्वन्द्वाद्विद्विगुणैर्द्विपार्श्वगुणतस्तिस्रोः षड्स्रीरितम्। अनयोस्तु पक्षयोर्भुजवैषम्यं दोष एवेति, नचेत् चसुरस्रं विषमचतुर्भुजं क्वचित्कुण्डतां प्रपद्येत। अत्र भुजवैषम्यं दोषः। पार्श्वभुजौहि षड्ङ्गुलौ। द्वाविंशदङ्गुलान्तयोरन्तरालम्, अन्ये चत्वारोभुजा एकविंशत्यधिकाः। किञ्चानार्षविषमभुजानांक्षेत्राणां कुण्डस्वरूपत्वेऽनध्यवसाय एवं स्यात्।

अन्येनापि प्रकारेणक्षेत्रफलसम्पाद सम्भवात्। तथाहि प्राचीमध्यसूत्रमधरार्धयोरङ्गुलत्रयंवर्धये त्ततोवर्धितचिह्नाद्दक्षिणोत्तरतश्चतुरङ्गुलमानेन चतुरस्र पूर्वपरिधिरेखाङ्काभ्यां मत्स्यद्वयंकुर्या, देवं पश्चिमदिश्यपि

तथा दक्षिणोदक्सूत्र मङ्गुलत्रयमेक षष्ठांशसहितं वर्धयेत्, ततः षट्सूत्राणि पातयेदित्येवमपि क्षेत्रफलं सम्यदत्येव। किञ्च रामोक्ते षड़स्रकुण्डे—

"पश्चिमायां कोणपातात् कोणयोनिस्थापनस्यच,
न कुर्यात्कुण्डकोणेषु योनितान्तन्त्रवित्तमः।"

इत्यनेन निषेधात्कुण्डस्य पूर्वोक्ता व्याहन्येत। तथा च भगवशशिकृतान्त-दिक्स्थकुण्डेष्वियमधिमेखलमेव कुण्डमध्ये। यमदिशिशशिदिङ्मुखी निवेश्वा वरुणादिशीतर कुण्डऐन्द्रवक्त्रेति" स्ववचनविरोध एव तस्या-पद्येत। तेनाननुसंहितस्वग्रन्थपूर्वापर विरोधस्यास्य विषमभुजषड़स्रप्रति-पादकं वचन यत्किञ्चिदेतदिति राघवभट्टो बहुनाप्रबन्धेन प्रजगन्ते।

इति कुण्डकादम्बरी निबन्धे षड़स्रकुण्डविवरणं
नाम सप्तमोल्लासः ॥७॥



॥ अथ पद्मकुण्डम् ॥

त्रिपुरासारसमुच्चये,

दशांशेऽत्रविन्यस्य बाह्येऽशमेकं परिभ्राम्यतेनैव वृत्तं दलानाम् ।
बहिर्मध्यमेकर्णिकाश्चापि कुर्याद्भवेदष्टपत्रं ततः पद्मकुण्डम् ।

शारदायाम्—

"चतुरस्रीकृतं क्षेत्रं विभक्ताष्टादशांशतः ।
एकं भाग बहिर्न्यस्य भ्रामयेत्तेनवर्तुलम् ।
वृत्तानिकर्णिकादीनां बहिस्त्रीणि प्रकल्पयेत् ।
बहिस्त्रीणीत्यत्र बहिर्बहिरिति वीप्साक्षेत्रमध्यादितिशेषः ।
तेनक्षेत्रमध्याद्बहिर्बहिस्त्रीणि कर्णिकादीनाम् वृत्तानिसिद्धयति ।

अत्राष्टादशांशः १।२२।३ तदधिकव्यासार्धेन चरमवृत्तकल्पने भूयान् फल-ह्रासः । समुच्चयमते तु दशांशार ३।१।५ धिकव्यासार्धेन मण्डलेस्वल्पः ।
यत्तु शारदायाम्—

अष्टादशांशः १।१ इत्यभिप्रेतः ।
तद्वृद्धयानिष्पादितं वृत्तं सीमावृतमित्युच्यते ।
ततः परं तावदवृद्धयारचितं मण्डलान्तरं दलाग्रवृत्तम् ।
प्रकृतिक्षेत्रव्यासार्धेन रचितं मण्डलन्तु पृथगेवेतिमतम् ।
तत्रापि फले विसम्वाद एव,
यदपि पद्मक्षेत्रस्य सन्यस्यद्वादशांशं बहिः सुधीः ।
तन्मध्येविभजेदंशैस्त्रिभिः समविभागतः ।"

इति दिशाष्टाविंशत्यङ्गुलव्यासकं चरमवृत्तमितिकल्पनम्, तदपि तथैव। तदेवं फलविसम्वादिषु पूर्वाचार्य वचनेषु पद्मकुण्डमुक्तं कुण्डमण्डने।

"सौम्यदिशि पद्मकुण्डं प्रागग्रंतस्य विन्यासः।
इष्ट चतुरस्रमध्यमसूत्रं जिन२४ भागमस्यरविभागैः।
व्यासार्धेन परिलिखेन्मण्डल मथतस्यसूत्रार्धे।
एकेन चतुःषष्ठि छिदाविहीनेन पञ्चभिर्भागैः।
युक्तं भागद्वितय परिवर्ध्यंभ्रामयेदपरमपि वृत्तम्।

एकेन व्यासचतुर्विंशांशेनयुक्तं भागद्वितयं मध्यसूत्रार्धेऽपवर्ध्यापर वृतं भ्रामयेदितिसम्वधः। तत्र वर्धनीयतृतीयभागे पञ्चचतुः षष्ठ्यंशावर्जनीया, तेन वर्धनीयशरीरं ३।०।५।६४ सवर्णितं १८७ अङ्गुले२ यवाः ७ युकाः ३ तेन द्विगुणेन ५।६।६ संयुक्तमुपान्त्यं मध्यसूत्रं २४ जातम् २९।६।६ वृत्तद्वयान्तराले चत्वारि लिखेद्गुणान्तसंसक्तानि। पत्राग्राणि यथास्यावीथेरर्ध दलान्तरापतति। गुणान्ताः मध्यसूत्रद्वयस्याग्रभागाश्चत्वारः तत्संलग्नमूलानि चत्वारि पत्राग्राणियुग्मयुग्म सूत्रसम्पातेन सम्पाद्यानि। अथवा मध्यमसूत्र प्रान्तात्कोणान्तसूत्रसक्तानि। अष्टौपत्राग्राणि स्थपतिः शिल्पेन विरचयेदेवम्। अवशिष्टदलं वेददलमष्टदलन्तु वेति कामिके विकल्पः कथितः

"निष्पर्णे सरसिरुहे लुम्पेच्चरमं परिधिसूत्रम्।
अथ खातविशेषस्याधानाय त्रीणिमण्डलानि लिखेत्।
अन्तर्वृत्तव्यासार्धस्य चतुर्थांशदीर्घयोरज्ज्वा।
एकम्तदूर्द्ध्वमपरं व्यासार्धार्धं प्रमाणतयातस्मात्।
परतोनिजपादोनव्यासार्धायामया परिभ्रमयेत्।
प्रथममिहकर्णिकायै मध्यं केसरगणाय चरमन्तु।

दलमध्य व्यासार्धं रज्जुवृत्तं तु किसलयोर्द्ध्वभुवे ।
तदुपरिदलाग्रमण्डलमुक्तं प्राक्तत्रपत्रसूचीभिः ।
त्यक्तामपहायभुवं खनेत्परित्यज्यकर्णिका वृत्तम् ।
यावान्न्यासस्तावानुत्सेधो भवतिकर्णिकायास्तम् ।
अपहाय कर्णिकाभूरपि खननीयाथ केसरौ द्वौ द्वौ ।
प्रतिपत्रंसूक्ष्माग्रौ कर्तव्यं कर्णिकामिलन्मूलौ
दलमध्यदलोर्द्ध्वभुवावपि दलमूलोत्क्रमात्समुच्छ्रिते ।

तत्र विभागानपि गुणगणपरिवेषः । प्रकल्पयेच्छिल्पी । यावान्व्यास इति । अत्र कर्णिकापरिमाणत्वेनोपस्थितस्य षड़ंशस्यत्यागे बीजाभावादुच्चतापि तस्या स्तावती कल्प्यत इत्यभिप्रायः । वस्तुतस्तु—

"नेत्र वदाङ्गुलोपेता मिति शारदायाम्,

"चतुरङ्गुलाया लाभे द्वयङ्गुलमुच्चत्वं कुण्डान्तरे कथितम् ।

तथा च—

चतुरङ्गुले व्यासे यदि द्वयङ्गुलमुच्चत्वं तदा षड़ङ्गुले कियदित्यनुपातेन त्रिभागोच्चा कर्णिका सिद्धयति । तदुक्तं कामुके—

"उत्सेधश्च ततः कुर्यात्कर्णिकात्र्यंशमानत इति ।

अत्र कुण्डेनाभिस्थाने कर्णिकेवेति त्रैराशिक प्रसरः सम्भवत्येव । योनि कुण्डयोनिमब्जंकुण्डे नाभिश्च वर्जयेदिति शारदायाम्—

योनौ योनिं नकुर्वीत पद्मे पद्मं न कारयेत्" इति

सिद्धान्तशेखरे—

योन्याभाम्बुजकुण्डयोः क्रमेण योनिंनाभिञ्च न कुर्वीत चतुर्मुखेति, क्रियासारे च —

पद्मकुण्डे नाभिनिषेधात्। एवं विधकुण्डनिर्माणञ्च राघवभट्टेनापि सूत्रितम्।

"पद्मकुण्डे मध्यसूत्रं चतुर्विंशतिधाभजेत्।
भ्रमयेत् कर्णिकावृत्तं त्र्यंशवृत्तार्धमानतः।
षड्ंशवृत्तार्धमाने भ्रमिवृत्तेनकेसराः।
नवांशवृत्तार्धमाने वृत्तेः स्यात्पत्रमध्यभूः।
द्वादशांशात्तवृत्तार्धाद् वृत्तं पत्रोद्भवभूः स्मृता।
दलाग्राखान्तु वृत्तार्धं कृत्वापञ्चदशांशकैः।
मीनैः पञ्चभिरेकांश चतुः षष्ठ्यंशकैर्भ्रमात्।
वक्ष्यमाणप्रकारेण दलाग्राणि प्रकल्पयेत्।

कुण्डमण्डने—

एवं फलसम्वादस्तत्रोपारविम्बमध्यमसूत्रस्य २९।६।६ वर्गे ७७९।१ भगोऽग्नि निहिते तथा सहस्रैः पञ्चभिर्भक्ते, लब्धंफल मेकोनासप्तसतायत्रचतुष्कञ्च। ६९९।४ तस्मिन्नुपान्त्य मण्डलफल ४५२।३।४ तष्टोशिष्ट-२४७।०।४ मर्धताप्तोतम् १२३।४।३ योजितमुपान्त्यवृत्तक्षेत्रफले रसमुनीपवो ५७६।७।६ जाताः। इत्येकहस्तकुण्डे फलसम्वादीनि मण्डलानि मया कथितानि। तयैव दिशा द्विहस्तकुण्डादिषु स्वयंध्येयम्।

राघवभट्टस्तु—अन्त्यवृत्तफलम् ६९९।४। उपान्त्यवृत्त फलम् ४५२।३।४ तयोर्योगः फलतः ११५२ तदर्धं ५७६ इत्येवं क्रमेण फल सम्वादपाम्बभूव। फलतो न कश्चिद्विशेषः।

रामस्तु—क्षेत्रेऽन्तश्चतुरस्रके विततिविस्वंशेन वृत्तं कृतं व्यासार्धेन तु कर्णिका पुनरियद्वृद्धया भ्रमात्केसराः। तद्वृद्धादलमध्यभूः, पुनरियद्वृद्धा भ्रमेणोर्द्ध्वं भूक्षेत्र व्यासविनांशकस्य विशिखै रूनं कलांशैः पुनः। तत्सम्बद्धर्यदलाग्रकाणिरचयेत्क्षेत्रार्धमुज्कं विना स्यान्त्रिशल्लवविस्तृतीत्थमियतोद्विघ्नेनवृत्तं वहिः। स्वव्यासार्थमिहोच्चतामिह खनेत्यक्त्वान्तरा कर्णिकाम्. कुर्वन्केसरचिह्न मष्टदलकं यद्वा चतुर्भिर्दलैः। इयता षोड़शांशपञ्चकेन द्विघ्नेनविना त्रिंशल्लवविस्तृतवहिर्वृत्तंस्यादित्यभिदधातिस्म। तत्रैकादशाङ्गुलानिन्यूनानिभवन्तीति राघवभट्टः। सतु "महाजन वचन दूषणपापमनाः केवलमनुलिप्यमानः स्वमते क्षेत्रफलहानि मपश्यन् महता भ्रमाणेन परावभूवैतदिदं व्यक्तमुपरिष्टात्। चतुरस्रे योव्यासोयावतिहस्ते पुरामया कथितः। तावानेपोपान्त्ये वृत्ते पद्मानुकारिणि व्यासः। व्यासार्धचतुर्थांशास्तेषामिह सिद्धवत्रिगद्यन्ते। द्विकरे चतुरङ्गुलमृषियूका ढ्यवाधिकं चतुर्लिप्तम्। ४।१।७।४। त्रिकरे पञ्चाङ्गुल मथसार्धयवः पञ्चलिप्ता च।५।१।४।५ षेदकरेऽङ्गुलषट्क ६ पञ्चकरे तत्स पञ्चयवयुक्तम्। ६।५।५ षड्हस्ते सप्ताङ्गुलयवद्वयाङ्घ्रिउन सप्तयूकाश्च। ७।२।६।६ सप्तकरे सप्ताङ्गुलमथ सप्तयवाश्चतुर्यूकम् ।७।७।४ अष्टकरेऽष्टांगुल गुणयवयुक्तासप्तकानि ८।३।७ नवहस्तेऽङ्गुलनवकम् ९ दशकरपक्षेतत्सार्धकल्प ९।४ मित्येवम्।

ज्ञात्वातावद् वृद्धयारचयेद्वृत्तानिकर्णिकादीनाम्।
पत्राग्रसूत्रवृद्धावूनत्वं कल्पनीयमत्रेत्थम्।
कथितव्यासार्धचतुर्थांशं छेदैर्हते चतुःषष्ठ्या।
इषुभिर्वियोजयेदथशेषं परिकर्मविद्द्विपाटीतः।

व्यासचतुर्थांशः ३ चतुष्षष्ठ्याहतः १९२ पञ्चभिर्हीनः १८७।६४। अथ

चरमत्रिकोणस्य दत्वाग्राकारतासम्पत्तये शिल्पमुपन्यस्यति । अथ पन्नगवाग्र मण्डलपरिधौशक्तं त्रिकोणसूत्रंयत् । तद्विभजेच्चतुर्धा भागे भागे त्रिरङ्कयेत्तदनु । सूत्रत्रिभागवितते कर्कटकोटर्मिमीत कोणाग्रात् । मध्यमचिह्नाच्चोपरितत्रस्थानेनिखायदृढ़मेकाम् । अपरान्निवेश्यकोणे भ्रमयेद्वृत्तार्धमर्धसूत्रान्तम् । अन्तर्मुखीभ्रमिरियं त्रिकोणगर्भस्थभूमिमाक्रामेत् । अथ सूत्रापरभागोदधरीणे पूर्ववन्मितेदेशे । अन्तर्वृत्तासक्ते सूत्राग्रे च प्रयुज्य कोटियुगम् । भ्रमवेदपरं वृत्तस्यार्धं सूत्राधेचिह्नसंसक्तम् । एषावहिर्मुखीभ्रमिरनयाक्रान्ता त्रिकोण वहिरुर्वी । यावत्पूर्वं त्यक्तं तावत्प्राप्त ततस्त्रिकोणस्य । तुल्यं फलमिहजातं विमार्जयेदुभयमण्डलार्धज्याम् । एवं सर्वाणि सरोरुहदलपरिधीभवन्ति सूत्राणि । इति बहुभिर्निर्दिष्टः सविस्तर पद्मकुण्डविधिः । अत्र यथात्रिषऽधिकोन त्रिंशदङ्गुलपरिमाणं पद्मकुण्ड चरमवृत्तव्यासमाचक्षाणो वाजपेयीवभ्राम । तथा सपाद यव न्यून त्रिंशदङ्गुल प्रमाणकं तं कुवाणोराघवभट्टोऽपि प्रममादेत्युपवादयन्नाह—

अत्रेयमनुपपत्तिर्वृत्तद्वयमध्यभूमिरर्धेन ।
त्याज्यासैवार्धेनग्राह्येत्युक्तं न सम्भवति चैतत् ।
त्योज्यातावदधोमुखकोणत्रयगर्भितावहि र्भूमिः ।
संग्राह्याचोर्द्धमुख त्रिकोणभूमि स्तयोस्तुवैषम्यम् ।

प्रत्यक्षसिद्ध मथचोपपत्तिसिद्धं तथाहि यत्त्याज्यम् । क्षेत्रं तस्य भुजाभ्यां व्याप्त मवाञ्छित धनुर्यत्तु । संग्राह्यं तस्य भुजा वुदञ्चितेनाबलम्बितौ धनुषा । तस्मादञ्चदुदञ्चद्धनुः कृतः क्षेत्रफलभेदः । अधोमुख त्रिकोणभूमिभूताया ज्यातामतिक्रम्य वाद्ये चरमवृत्तपरिधिखण्डस्वरूपं धनुर्वर्तत इति प्राक्तत्रिकोणाधिकं त्याज्यं पर्यवस्यति । ऊर्द्धमुख त्रिकोणभूमिभूता तु याज्या तदुपरि त्रिकोणगर्भे उपान्त्यवृत्तपरिधिखण्डरूपन्धनुः प्रवि-

शतीति धनुर्न्यूनं प्राकृत त्रिकोणं संग्राह्यमिति धनुः फलद्वय मन्तरालं त्याज्य संग्राह्ययोरितिवैषम्य मिदमुप लक्षणम् । अधोमुख त्रिकोणानामष्टौ ज्याविततः विततत्तरबहिर्वृत्ताष्टमांश व्यापकत्वात् ऊद्धर्वमुखत्रिकोणाना मष्टौज्याः खर्वाः क्षुद्रोपान्त्य वृत्ताष्टमांशप्रतिबद्धत्वादिति भूमिभेदात्रिकोणक्षेत्रफलेऽपि भूयान् भेदः । यद्यपि समान भुजयोस्त्रिकोणयोर्मध्ये दीर्घभूमिकापेक्षया ह्रस्वभूमिकस्यलम्बोवर्धते, तथापि तेन लमवेनगुणनीयस्य भूम्यर्धस्य ह्रासात् फलह्रासोभवत्येतिसूक्ष्मगणितस्य नास्तीदानी मवसर इति प्रकृतमेवानुसरामः । एवमन्येषां कल्पानां फलविसम्वादादविसम्वादिनं कल्पं कल्पयितु मुपक्रमते ।

"तस्मात्सरसिजकुण्डे यदुपान्त्यं नामवृत्तमेतस्मात् ।
उपरिव्यासस्य चतुर्विंशांशै स्त्रिभिरथैकभागस्य ।
पञ्चभिरष्टमभागैरस्य त्रिभिरष्टमैवमुष्य तथा ।

भागैश्चतुर्भिरस्यतु पञ्चभिरष्टमलवै ३ ५।३।४।५ विंबर्ध्यंपुनः । वृत्तान्तरं परिलिखेत्तस्य व्यासः करायतेकुण्डे, यत्र युगयूका सप्तकलिक्षा वालाग्रयुगलसहितानि । हस्ताधिकानिसप्ताङ्गुलानि १।७।२।७।१।२ तन्त्रान्त्यपरिधिसक्तमुखम् । आसक्तभुजमुपान्त्ये परिधौव्यस्राष्टकं लिखेत्तच्च । पूर्ववदेवदलाग्रानुकारमाननीयमार्जयेदन्यत् । अत्रापि कर्णिकावृत्तकेसरवृत्तदलमध्यवृत्तानि । पूर्ववदवसेयानि ।

तत्र कर्णिकावृत्तस्य कर्णिकानिवेशनं केसर वृत्तस्य केसर कल्पनंप्रयोजनम् । दलमध्यवृत्तस्यतु नकिञ्चित् । नव खाते केसरभूमितो दलमध्यभूमिस्ततो दलोद्धर्वभूमिः किञ्चिदूच्छूनाकर्तव्येतिलाभ एव दलमध्यवृत्त कल्पनप्रयोजनम् । तच्चोक्तं ।क—"दलमध्यदलोर्ध्व मुखावपि दलमूल त्क्र-

मात्समुच्छ्रसिते इतीतिवाच्यम्, अप्रामाणिकत्वात्। यावान् कुण्डस्य-विस्तारः खननं तावदीरितमितिवचनसिद्धस्य खातघनफलस्य व्याकोप प्रसङ्गात्। नच खातफलसाम्यार्थं कर्णिकाकेसरवृत्तयोर्हस्ताधिकं खननमस्त्वतिवाच्यम्, अनध्यवसायप्रसङ्गात्। कियतानिम्नेन खात घनफल-सम्वाद इत्यनिश्चयात्। तस्माद्यदि पद्मेकुण्डे सर्वतोहस्तनिम्नं खननं तदा दलमध्यमण्डलविरचनवैयर्थ्यम्। तस्य कुण्डक्षेत्रस्वरूपनिर्माणे खाते चानुपयोगात्, अथ खाते कश्चिद्विशेष स्तदानध्यवसाय इति।

अत्रोच्यते—पद्मकुण्डस्य सर्वतो द्वादशाङ्गुलं पत्राग्रपर्यन्तं खननम् ६६ १२ द्वादशाधिक मूनसप्ततिशतं खातफलं सिद्धयति, ततोऽधस्तादुपान्त्यवृत्तपरिधिपर्यन्तम् द्वादशाङ्गुलं खननम्, तत्रो पान्त्यमण्डल-क्षेत्रफल साग्रयवत्रयाधिक द्वापञ्चाशदधिकंशतचतुष्टयं ४५२।३।१ तस्य-द्वादशभिर्गुणने लब्धं खातफलं ५४२४ चतुर्विंशत्यधिक चतुः पञ्चाशच्छ-तमङ्गुलानि किञ्चिदूनचत्वारिंशद्यवाश्च फलतः ५४२६ अङ्गुलानिसार्ध-यूकाद्वयोनानि ५४२८।५।४ तदधरीणस्याष्टादशाङ्गुलव्यासस्य वृत्तस्य-फलम् २५४।४ सार्धचतुः पञ्चाशदधिके शतद्वयं। तत्र पञ्चाङ्गुलं खनन-मिति पञ्चभिः क्षेत्रफलस्य गुणनेजातं फलं त्रिसप्तत्याधिका द्वादशशतो १२७३, अत्र १२७२।२।६ इति सूक्ष्मंगणनम्, तदधरीणस्य द्वादशाङ्गुल व्यासस्य वृत्तस्य क्षेत्रफलम् ११३।०।६ तस्य किञ्चिदून सप्तयवाधिकमेक मङ्गुलं खात मि १।६।७ ति तेन तस्यगुणने लब्ध खातफलं २११ एका-दशाधिक शतद्वयमिति सर्वयोगेन १३८२४। इति खातफलं लभ्यत इति न काचिदनुपपत्तिः।

परेतु—चतुर्विंशत्यङ्गुलमेवात्रसर्वतः खननम्, तत्र कर्णिकाकेसर-सन्निवेशात् परतोऽश त्रयाधिक व्यासार्धेन रेखालिखनीया। साच

कर्णिकादिवदद्दष्टार्थेवेत्याहुः। इतरे त्वष्टाचत्वारिंशदङ्गुलं कर्णिकाधस्तात् खातम्। ततो वापीखनन क्रमेण क्रमशः किञ्चिदुच्छ्रसितं कनककुसुमानुकारेणखननं तेनार्धं खातभूमेस्त्यक्त मर्धञ्चसंगृहीत मित्यत्रापि। दलमध्यमण्डलं रेखारुपमदृष्टान्यमेवेति वदन्ति।

"अत्रोपपत्ति रस्मिन्नुपान्त्यवृतेर्दलाग्र संसक्ताः।
या रेखादिग्दिशामष्टौ तासां प्रकल्पयेज्जीवाः।
येन प्रतिदलमेवत्रिकोणयुगलंसमुद्गकं भवति।"

एक मधोमुखमपरंचोर्ध्वमुखं भूस्तयोः साज्या। अङ्गुलनवकं यूकात्रितयाढ्यनवोऽथ षड्लिप्ताः। इदन्तु ज्यपरिमाणं पाटीक्रमादानेयम्। तथाहि भास्करः—

"त्रिद्व्यङ्काग्निनभश्चन्द्रैः १०३९२३ स्त्रिबाणाष्ट युगाष्टभिः ८४८५३ वेदाग्निबाणखाश्वैश्च ७०५३४ खखाभ्राभ्ररसैः। ६०००० क्रमात्। बाणेषुखाग्निबाणैश्च ५२०५५ द्विद्विनन्देषुसागरः ४५९२२। कुरामदशवेदैश्च ४१०३१ वृत्तव्यासे समाहते, खखखाभ्राकसंभक्तैः १२०००० लभ्यन्ते क्रमशोभुजाः। क्रमशः त्रिकोणादि नवकोणान्तक्रमेण तेनाष्टकोणे द्विद्विनन्देष्ट सागरागुणैकोलभ्यन्ते। स्पष्ट मेतदुपरिष्टादष्टास्रप्रकारणे। आवाधात्तस्यार्धं सार्धं चतुरङ्गुलं विलिप्ताः षट्। यूकास्तस्यावर्गो गोमूत्रिकया प्रगुण्यसंसाध्य। तस्य ज्यासूत्रस्य त्रिकोण द्वयभूमिभूततस्यार्धम्। ४।४।५।५ आवाधात्तस्यावर्ग गोमूत्रिकागणनप्रकारेण साधनीयम्। चतुर्धानिवेशितानामङ्गुल यवयूकालिप्ताणां ताभिः प्रत्येकं गुणनमथतुल्यजातीयानां संयोगश्चेति गोमूत्रिकागणनक्रमः कथित एवप्राक्। ऊर्द्ववाधर भावगतान् प्रथमान्तैर्निर्दिशामितानङ्कान्। चन्द्रदृशौखंबाणा दहनोऽग्नि २१।०।५ ३।३ रथाधरत्रिकोणभुजः १२ द्वादशवर्गस्तस्य श्रुतिवेदभुवो१४४

ऽथवर्गयोर्विवरम् । एक्द्विभुवः सप्तद्वौचत्वारः सायकाश्च । १२२।७।२।४।५ तन्मूलं ११।०।५।२।५ एकादश खं बाणादशौ शराश्चेति सह्यसौलम्बः । लम्बगुणं भूम्यर्धं पञ्चाशत्सप्तभूः खमङ्कानि ५०।७।१।०।६ अष्टानामधरमुख त्रिकोण भाजांफलं प्रदेशानाम् । संकलितमृषिखवेदा एकोगगनं रसाश्च ४०७।१।०।६ जायन्ते । उपरित्रिकोणलम्बो व्यासार्धे पूर्वलम्बशिष्टंयत् । चत्वार श्चत्वार षड्द्वाविति ४।४।६।२ तद्वत्तन्तुभूम्यर्धम् । चन्द्रदशौखं मुनयोरूपं पट्चेति । २१।०।७।१।६ तत्किलाष्टगुणम् । वसुरसविधवो मुनयोरूपं षट् चेति । १६८।७।१।६ सप्तसंयोगे । रसमुनिबाणाः शून्यंद्वौ चेति ५७६।०।२ फलस्य सम्वादः । एवं द्विकरादावपिफल मूह्यं सूक्ष्मया-दृष्टया । एवं समुद्गकतापन्न त्रिकोणयोः प्रत्येकं फलं साधितमतपरं तन्त्रे-णानयो फलं लाघवात् साधयति ।

वस्तुत इह भूम्यर्धं निगमाः श्रुतयश्चसायकाः सप्ता ४।४।५।७ लम्बद्वय संयोगोव्यासार्धं शरभुवः शराः शिखिनः । वेदाबाणश्चेति १५।५।३।४।५ व्यासार्धहते तदत्रभूम्यर्धे । लब्धंफल ७२ मष्टगुणफलं भवत्येकहस्त सम्व दि । एवं द्विहस्तादिफलं तदीयव्यासार्धानि च कथितदिशा । स्वयं प्रणिघातव्यानीति किमधिकेन ।

इति कुण्डकादम्बरी निबन्धे पद्मकुण्डविवरणं
नामाष्टमोल्लासः ॥८॥



॥ अथाष्टास्रकुण्डम् ॥

कुण्डमण्डने—

अष्टास्रमष्टतनुदिशितस्यैवं विरचनं प्रकृतिभूतम् ।
चतुरस्रंजिनभागैर्विभज्य तन्मध्यसूत्रमंशाभ्याम् ।
पादाद्याभ्यां प्राच्यां विवर्ध्य सम्पात मध्यमारभ्य ।
वर्धितभागावध्यारज्ज्वा परिलिख्य मण्डलं तत्र ।
अष्टौज्या दशभागैः सपादसप्ताष्टमांशपरिमिश्रैः ।
विनिपातयेद्यथा प्राक्सूत्राग्रेपतेन्नकोणाग्रभू ।
अष्टज्यापातेन–परिधिलोपेन चाष्टास्रसिद्धिः ।
प्राक्सूत्राग्रे कोणाग्रपाते तत्र योनिसन्निवेशः स्यात् ।
तथाच नकुर्यात् कुण्डकोणेषु योनिं ता तन्त्रवित्तमुः ।

इति निषेधव्याकोपः स्यात् । सपादसप्ताष्टमांशपरिमिश्रा दशभागाज्या भवतीत्यत्रोपपत्तिमुल्लिखति ।

"अत्रोपपत्तिरुक्ता वृत्ताष्टाज्यानिपातने पाठ्याम् । वृत्तक्षेत्रव्यासे द्विदस्रनन्देष्टसागरै ४५९२२ र्निहते । खखरवाभ्रार्क १२०००० विभक्ते लब्धं ज्या इति तदत्रयोव्यासः । एककरे सार्धाष्टाविंशत्यङ्गुलमतः सप्तत्यन्नाः । द्वेयुक्ते सप्तयवा दशाङ्गुलानीति सावशेषा ज्याः । व्यासः २८।४। ज्यामानं १०।७।२ ततः किमित्याकाङ्क्षायामाह—

फलसम्वादायत्विहकोणादि तृतीयकोणपर्यन्तम् ।
दीर्घैर्भुजैश्चतुर्भिश्चतुरस्रं कल्प्यमस्य पार्श्वेषु ।

चत्वारि च त्रिकोणान्यर्थाज्जातानि तत्र चतुरस्रे ।

बाहुः सपाद यव युतविंशत्यङ्गुल २०।१।२ मिहापिनिज पाट्याम । वृत्ताश्चतुरस्रविधावुदाहृत भास्कराचार्यैः ।

वृत्तक्षेत्रव्यासे द्विबाणवसुसागराष्टमिर्निहते ८४८५२। खखखाभ्रार्क १२०००० विभक्ते लभ्यन्तेज्या इति । तथाच भुजवर्गश्चतुरस्रस्य फलं शतचतुष्टयं षडधिकं कियत्साग्रम् । ४०६।२।१।४।४ ज्यैवत्रिकोणभुज इह १०।७।२ चतुरस्रभुजार्धभूमिराबाधा १०।०।५ चतुरङ्गुलसार्धयवोन्मितोऽत्रलम्बः । ४।१।४ तथा त्रिकोणफलम् । द्वयधिका चत्वारिंशोग्रा ४२।१।६।७।४ वेदैर्हते त्रिकोणफले १६८।७।३।२।४संयोजिते चतुर्भुजफलेन ४०६।२।१ ४ सहजात मङ्गमुनिबाणाः ५७६ इदंफल मासन्नं वेदितव्यम् । तेन ५७५।१।४।६।४ इति सूक्ष्मफलसिद्धयति । द्विकराद्यष्टास्राणाम्भुजाङ्गुलानि ब्रवीमिदस्रकरे । पञ्चदशाङ्गुलमपरं यवत्रयं १५।३ त्रिकरमानु कुण्डे तु । अष्टादश सप्तयवाधिकानि १८।७ वेदकर एकविंशत्याः अधिकाः सप्तयवा २१।७ शरकरे चतुर्विंशतिश्चसप्तयवाः २४।७ षड्ढस्ते षड्विंशतिरपरं षड्यव २६।६ मथर्षिहस्तमिते अष्टाविंशति ऋषयोयवा २८।७ वसुकरे यवोनविधुशिखिनः ३०।७ नवहस्ते द्वियवोनागुणाग्नयो ३२।६ दशकरे चतुस्त्रिंशत् ३४।४ सार्धा । तथाच तस्मिन्बाहौ ज्ञाते खखाभ्रखार्क १२०००० गुणे दस्राश्विगोशरार्णव ४५६२२ भक्ते व्यासाः स्वयाधियोनेयाः । ज्यास्वरूपेभुजे ज्ञाते विलोमविधिना व्यासाः साधयितुं शक्यन्ते । तथाहि व्यासे द्विदशनन्देषु सागरनिहते द्वादशायुते भक्ते ज्यासूत्रं लभ्यत इति प्रागभिहितम् । तत्र ज्यायांद्वादशायुत गुणितायां दस्राश्विगोशरार्णव भक्तायां व्यासोलब्धुं शक्यत एव, विलोमपरिकर्मणः पाटीसिद्धत्वात् । तत्र तन्त्ररोजे—

"तन्मध्यस्य चतुर्विंशमाने वाह्येऽपि पूर्ववत् ।
विधायचतुरस्रन्तु पूर्वकोणार्धमान तः ।
कोणादभित एवास्य कृत्वाचिह्नानि चाष्टवै ।
तेषु चिह्नेषु कृत्वाष्टसूत्राणि परितः शिवे ।

कुर्यादष्टास्रकं कुण्डमिति त्रिपुरासार समुच्चये—

क्षेत्रेचिप्त्वात्रवाह्ये दिशिदिशिमिहिर द्वन्द्वकांशेऽशमेकम् ।
कृत्वातेनाब्धिकोणं पुनरपि मतिमान् कोणतोऽर्धं गृहीत्वा ।

तत्कोणाभ्यां विदध्यादिहखलु परितस्तेन मानेन चिह्नान्यष्टास्रंस्यास्समन्तादपि च वितनुयादष्टसूत्रप्रयोगम् ।" शारदातिलके—

"पूर्वोक्तं विभजेत्क्षेत्रं चतुर्विंशति भागतः ।
एक भागं वहिर्न्यस्य चतुरस्रं प्रकल्पयेत् ।
अन्तःस्थचतुरस्रस्य कोणार्धार्धप्रमाणतः ।
ब्राह्मस्य चतुरस्रस्य कोणाभ्यां परिलाञ्छयेत् ।
दिशं प्रति यथान्याय मष्टौ सूत्राणिपातयेत् ।
अष्टास्रं कुण्डमेतद्धि तन्त्रविद्भिरुदीरितम् ।

चतुरस्रं प्रकृतिभूतं क्षेत्रं चतुर्विंशतिधाविभज्य तस्यैकमेकमंशं दिशिदिशिमध्यसूत्राग्रेषु वर्धयित्वा षड्विंशतिभागव्यासं वहिश्चतुरस्रं कृत्वा तस्यकोणोभय पार्श्वतोद्वयं द्वयं चिह्नं दद्यादित्यष्टौचिह्नानि संम्पद्यन्ते । वहिश्चतुरस्रकोणाच्चिह्नस्यान्तरालन्त्वन्तःस्थ चतुरस्रकर्णसूत्र चतुर्थांशः, स च लिच्चान्यूनसार्धाष्टाङ्गुलस्वरूपः, तत्र पुनरष्टौ सूत्राणि पातयेत् तत्र विदिक् सूत्राण्येव पातनीयानि, दिक्सूत्राणि वहिश्चतुरस्रपरिधि सूत्रशकलरूपाणि

पूर्वसिद्धान्येवेत्यष्टास्रसिद्धौ वाह्यष्टकभिन्नाः सर्वा अपिरेखाः परिमार्जनीया इति लिखितवचनानामर्थः ।

अत्र राघवभट्टः—अत्र त्रीणिक्षेत्राणि एकमायतचतुरस्रं तत्पार्श्वयोर्विषमचतुरस्र द्वयमिति तत्रायतस्यैकोभुजः ६।१।६४ सवर्णितः ५७७।।६४ द्वितीयोभुजः २६ तयोर्घाते लब्धं २३४।३।२ क्षेत्रफलं विषमचतुरस्रस्य तु भूः २६ मुखं ५७७।।६४ मुखवियुक्ताया भुजोऽर्धं लम्ब ८ ६३।१२८ मुख वियुक्तत्वर्द्धेन लम्बेन निघ्नंङ्कमुखैक्य खण्डमितिकृतेजातं क्षेत्रफलं १४८। ५।३ एवं द्वितीयस्यापि सर्वंमिलितं ५३१।६ तेन यवद्वयाधिक चतुश्चत्वारिंशदङ्गुलानि न्यूनानि, किञ्चाष्टानां भुजानां समतापि नास्ति, दिग्भुजाहि किञ्चिदधिकनवाङ्गुलस्वरूपाः । विदिग्भुजास्तु द्वादशाङ्गुल प्रमाणाः कर्णचतुर्थांशौ कोटिभुजौ तयोर्वर्ग ७२ योग १४४ मूलस्य कर्णस्यैव १२ विदिकसूत्रस्वरूपत्वात् । अथ क्षेत्रफलसम्वादि विषमभुजमपि कुण्डमितिचेत्, तथा सत्यष्टास्राण्यनेक प्रकाराणि स्यु रित्यनध्यवसायः । तथाहि षड्विंशत्यायाम वाह्यचतुरस्रे यवार्धाधिक सप्ताङ्गुलैः कोणपार्श्वतोलाञ्छिते सति तथा सप्तविंशत्यायाम वाह्यचतुरस्रे षड्यवाधिकाष्टांगुलेः पार्श्वतो लाञ्छिते सति तथाष्टाविंशत्यायाम वाह्यचतुरस्रे सार्धयवसहित दशाङ्गुलैः पार्श्वतो लाञ्छितेसति तथाविधाष्टसूत्र पातनेन रचितेषु कुण्डेषु क्षेत्रफल सम्वादो भवति, एवमन्येऽपि सहस्रशः प्रकाराः सन्तीति याज्ञिकानामनध्यवसायप्रसङ्गात् । क्षेत्रफलसम्वादि समभुजमेव कुण्डमिति सम्प्रदायविदः । तत्रानुगतः प्रकारः कथ्यते—

"अष्टास्रे मध्यसूत्रं तु चतुर्विंशतिधाभजेत् ।
एकसार्धांष्टमांशाढ्य मंशमेकं बहिन्र्यसेत् ।
चतुर्दिक्ष्वथतन्माना चतुरस्रान्तरं लिखेत् ।

षट्चत्वारिंशदेकांश चतुः षष्ठ्यंशसंयुतैः ।
सप्तांशै र्लाञ्छयेद्बाह्य चतुरस्रास्रिपार्श्वयोः ।
दिक्चष्टसूत्र सम्पाता दष्टास्रं समबाहुकम् ।

तत्रैक शस्याङ्गुलस्य चतुः षष्ठ्यंशस्य यूका रूपेणपरिणतस्य षट् चत्वारिंश-दंशाः पञ्चयवा षड्यूकाश्चेतिबहुना क्षेत्रोपपादन प्रयासेन निरवर्णयत् । तदेतदनूदितं कुण्डमण्डने—

"अन्ये तु सूत्रमध्येजिनभागेभागमेक मेकस्य ।
सार्धांष्टमांशसहितं विवर्धयेन्मध्यमाग्र सूत्रेषु ।
तद्व्यासं चतुरस्रान्तर साधेयं तदीयकर्णाग्रात् ।
पार्श्वद्वयेऽपि सप्तभिरंशैरेकस्य चाष्टभागस्य ।
पादोन षड्भिरंशै र्मत्स्यौ निष्पादयेत्तथान्यत्र ।
एवं स्युरष्टतिमय स्तिमेस्तिमौ पातयेद्गुणानष्टौ ।
चतुरस्रद्वयमाद्यं लुम्पेदष्टास्रमेव मवशिष्टम् ।
इत्येवं रचयन्तः फलतः पूर्वोक्ततुल्य एवात्र ।
क्षेत्रेफल मितरदिशोपपाद्यमितीह्यनुशासति तथाहि ।

एकं दीर्घं चतुर्दोर्विषम चतुर्बाहुनो परेक्षेत्रे । परिकल्प्यप्रथमे भुजयुगमष्टा-स्रस्यबाहु १०।७।४ परिमाणम् । कोटिद्वयमुपरि चतुर्भुज विष्कम्भायतं परिध्यायेत । भुजकोटिघातरूपं फलमिह वसु वारणाश्विनः साग्राः । २८८।०। विषमभुजे भूः कथिताकोटि २६।३ र्लम्बस्तु पञ्चसप्त च षट् । अङ्गुलयवयूका ७।५।६ मुखमष्टास्रस्यवर्णितो बाहुः १०।७।४ लम्बेनहतं कुमुखैक्यदलं १८।५।२ विषमेफलं चतुर्बाहौ १४४ तद्द्विगुणं २८८ दीर्घ चतुर्भुजस्य सार्धं फलेन २८८ संयुक्तम् । जातं रसर्पिबाणा ५७६ इति रीत्या द्वयादिहस्त फलमूह्यम् । अत्र राघवभट्टै—

भुजसाम्यमित्थं साधितम् । भुजस्थादसौ दिक्सूत्रस्वरूपः एक षोड़शांशन्यूना एकादश ११।।१।१६ सवर्णितः । १७५।१६ विदिक्सूत्र-स्वरूपाणां भुज.नान्तु परिमाणत्याज्यभूमिभूतयोः कोटिभुजयोर्वर्ग योजयित्वा तन्मूलमानीय संवादनीयम् । तथाहि स्याज्या कोण पार्श्व भूमिः ७४६।६४ सवर्णिता ४६४।६४ चतुर्णवत्याधिक चतुः शतं चतुःषष्ठयंशाः तत्कृति २४४०३६ तत्कृत्योर्योगः ४८८०७२ तन्मूलं ६६८।६४ मूल-शिष्टं ८६८।१३६७ इति ।

अत्र दिग्भुजविदिग्भुजयोः सार्धयवाधिक मन्तरं राघवभट्टमतेऽपि पतत्येवेतिसूक्ष्मदर्शिभिरवधेयम् । वृत्तेज्यां निपात्यकुण्डं निर्मातव्यमिति प्रागुक्ते पक्षेऽपि राघवभट्ट —

न वर्धनीयांशयोः पादाधिका वृद्धिरुक्ता ।
कुण्डेऽष्टास्रेमध्यसूत्रं चतुर्विंशतिधाभजेत् ।
एकत्रिदशमांशाढ्य द्वयंशवृद्धयातु वर्तुलम् ।
तन्मध्येदिक्चष्ट सूत्रदानादष्टास्रकं समभिति ।

एतन्मते २८।४।६ एतावद्व्यासं वृत्तं सिद्धयति । पूर्वोक्तन्तु यूकाषट्क हीनं सार्धाष्टाविंशति व्यासकं किञ्चित्फल घिसम्वादीति प्रागेवदर्शित प्रायम् । रामः—प्रकाशिकायां निजगाद अष्टास्रकुण्डनिर्माणे—

पद्मयुगं तद्यद्यपि सारद्यमनूद्यते तदप्यद्य । क्षेत्रव्यास जिनांशकेषु चतुरः ४ सम्वर्ध्यं साकंसुरांशे ३३ नैकस्य किलेन्दुना १ बहिरप्युष्यै तद्वितत्यावहेत् । वेदास्रान्यदुदार दिग्गुणयुग दिक्कोणमध्येहृता ष्टाङ्केष्विष्टगुणै-स्तृतीयमिलितैरष्टाम् कुण्डं भवेत् । एकस्य सुरां ३३ शेनेन्दुना साकं चतुरो ४ अंशात् सम्वर्ध्यबहिः अन्यद्वेदास्रि एतद्वितत्या आवहेदितिसम्व-

न्त्रः। तृतीयमिलितैरिति, अङ्का दङ्कादेकैकमंकमन्तराकृत्वा तृतीयेऽङ्के सूत्रंयोजनीयमितिक्रमः।

तथा दिक्सूत्र युग्ममथयचतुरस्रयुग्ममाद्यं तदत्रपरिमार्ज्यमशेषमेव। सम्पाततोऽन्तरगतश्च तथाष्टसूत्र्या रेखान्तरं त्वतिनयेदिति कुण्डरूपम्। अत्र अष्टसूत्र्याः सम्पातद्वयान्तराल रेखाप्यतिनेतव्यो, मार्जनीयेत्यर्थः। फल-सम्बाद्यपि तदिदं विषमभुजत्वादुपेक्ष्यमत एव। विषमभुजं चतुरस्रक्षेत्रं नक्वापि कुण्डतामयते।

राघवभट्टस्तु राममतखण्डनावसरे एवं विधेऽष्टास्रे योनिनिवेशन स्थानमेवनास्ति, सर्वत्र कोणलाभात्, कोणे च योनिनिषेधादित्याह, तदस-ङ्गतम् पश्चिमसूत्राग्रस्य पार्श्वयोः कृताभ्यां चिह्नाभ्यामारब्धयोरुदग्दक्षिणगा-मिनोः सूत्रयोः सम्पातस्थाने प्राक्सूत्रसंलग्ने योनिनिवेशस्थान सौलभ्यात्। नहि दिक्सूत्राग्रे कोणपातो रामेणोक्तः किन्त्वङ्केषु ते ते इष्टाअङ्का मध्यसूत्रा-ग्रे कोणसूत्राग्रयोस्तुल्यान्तराल स्थानगता एव, यदिच सूत्रसम्पात स्थान मप्यधोमुखः कोण एवेति तदपि न योनिन्यासस्थल मुचितमिति तदभि-प्रायः, तदा पद्मकुण्डे योनिनिवेशनस्थलं सर्वमतेऽप्यसमञ्जस मेवस्यादि-तिदिक।

इति कुण्डकादम्बरी निबन्धे अष्टास्रकुण्डविवरणं
नामनवमोल्लासः ॥६।



॥ अथ नवकुण्डीपक्षे नवमं कुण्डम् ॥

कुण्डमण्डने—

पूर्वेशानान्तरतो नवमं कुण्डे भवेच्चतुष्कोणम् ।
अथवा मण्डलमेवं नव सम्पाद्यानि कुण्डानि ।

अत्र प्राक्सूत्रकोणसूत्रयोः समान्तरालं नवकुण्डकरणी प्राक् सूत्रंसमं स्यादश्रुतत्वादिति न्यायात् । तथा च—

"विंशतिहस्तेऽपि मण्डपेवेदी ६।१६ षड्ढस्ता षोडशाङ्गुलाधिका स्तस्याः पादः १।१६ षोड़शाङ्गुलाधिकोहस्त स्तावदन्तरं त्यक्त्का कुण्डखातम्, तत्रयोनि कुण्ड प्रकृतिचतु·स्रवायव्यकोणावधि प्राक् कुण्डपश्चाद्भागप्रोतमष्टास्र प्रकृति चतुरस्रनैर्ऋत कोणान्तं सूत्रं हस्तादश १० वेदीं परितः पादं पादं वर्धयित्वा रचितस्य चतुरस्रस्य प्राक्परिधिसूत्रं ह्येतत । तथाच प्राक् कुण्डमध्यमसूत्रपश्चिमभागादैशानकुण्ड नैर्ऋतकोणिपर्यन्तं सूत्रं हस्ताः पञ्च ५ विंशत्युत्तरशतमङ्गुलं १२०। तत्र द्वाविंशति प्राक् कुण्डवामभागेन २२ द्वाविंशति ईशान कुण्ड दक्षिणभागेन २२ समेखलेनाक्रान्तानि । मध्येऽवशिष्टानि षट्सप्ततिरङ्गुलानि, तत्र चतुश्चत्वारिंशदङ्गुलानि ४४ नवमकुण्डेनाक्रान्तानि समेखलेन तत्राष्टाविंशति रवशिष्टानि, तेषांद्विधा विभक्ताना मर्धार्धमाचार्य कुण्डपार्श्वंगत मिति चतुर्दशाङ्गुलानि लभ्यन्ते चात्रचतुर्दशाङ्गुलमध्येनाचार्यस्योपवेशनं सम्भवति ।

अथ यद्यैशान कुण्डसंलग्नमाचार्य कुण्डंक्रियते तदासमं स्यादिति न्यायविरोधः । अष्टासूक्कुण्डस्य समेखलेनभागेन सार्धचतुर्विंशतिरङ्गुलानि

किञ्चिदधिकान्याक्रान्तानीति किञ्चिदधिक पञ्चविंशत्यङ्गुलमात्र माचार्य कुण्ड दक्षिणस्थानं लभ्येतेतिसम्बाधः। अथर्ववेदीना होत्रा दक्षिणभागे स्थापनीयस्य ब्रह्मण उपवेशनस्थलालाभश्च, होतृब्रह्मभ्यामग्नि परिक्रमण-करणानुपपत्तिश्चेति। किञ्च अथर्ववेदिरुत्तरवेमिदिस्थाने कुण्डखातं कृत्वा-तत्परितोरेखारूपेण महावेदिर्निर्मीयते, साच श्रोणिभागे चतुःशमीपरिमाणा। शमीच द्वादशाङ्गुलेति, तया महावेदिरेखया अङ्गलद्वयमाचार्य कुण्डस्याप्या-क्रान्तं स्यादिति सङ्करप्रसङ्ग इति

"वेदीपादान्तरं त्यक्त्वा कुण्डानि नव पञ्चवेति"

वचनादिना वेदीपादान्तरेण कुण्डखाते न सिद्धयति। अथवेदिकाया वहि-स्त्रिधा। क्षेत्रं विभज्यमध्येऽशे "इति शारदाकथितरीत्या वेद्या ६।१६ तृतीयांशाः २।५।२॥२।३ मतिक्रम्य कुण्डखातामितिमतमाश्रीयते। तदा-ग्नेयकोणादीशान कोणान्तं प्राक् कुण्डखात पश्चिमसूत्र मेकादश हस्तोद्वय-ङ्गुलं ५ यवाः पञ्चयवस्यैकस्तृतीयांश ११।२।५॥१।३ इति लभ्यते। तदर्धं त्रयस्त्रिंशदधिकशतमङ्गुलं द्वौयवौ पञ्चयूकाः साग्राः १३३।२।५।० लभ्यन्ते। तस्य समन्तराले नवमकुण्डम्, तत्र पूर्वैशानकुण्डयोरुदग्दक्षिणभागाभ्यामा-चार्य कुण्डेन चाष्टाशीतिरङ्गुला न्यववद्धानि, शेषः पादोनसप्तचत्वारिंशदङ्गु-लानि तदर्धविभागयोहस्तादपि न्यूनयोः पार्श्वद्वये नवम कुण्डस्यलाभाद्धो-तृब्रह्मणोरूपवेशनेऽप्यसौकर्य्यं किमुत स्वस्वरूपकर्मोपसंहारे श्रूयते चाथर्ववेदि-ब्रह्मकर्तृकंस्वासनाद्दक्षिणतस्तृणनिरसनम्, अथासनाद्दक्षिणस्यान्तृणं निरस्य-ति निरस्तः परावसुरितीति। तथाच प्रकृते ब्रह्मासनदक्षिणभागस्य। चा-र्यकर्तृक परिस्तरणावरुद्धत्वात्तत्र तृणनिरसनासम्भवः, विनियुक्तविनियोग-स्याशास्त्रीयत्वात्। तस्माद्वेदिकाया वहिः क्षेत्रं त्रिधाविभज्य तन्मध्यमां-शस्य मध्यमेऽशे सम.न्तरालतया कुण्डखातं कर्तव्यमिति शारदावचनार्थः।

अथवा नवकुण्डीपक्षे विंशति हस्ताधिकश्चतुर्विंशत्यष्टाविंशतिहस्तादिर्मण्डपः श्रेयानिति प्रतिभाति।

लिङ्गपुराणे महादान प्रकरणे—

"परितो नवकुण्डानि चतुरस्राणि कारयत्।"

तथा

"अथवा चतुरस्रञ्च योन्याकारमतः परम्।
अर्धचन्द्रं त्रिकोणञ्च वर्तुलं कुण्डमुत्तमम्।
षड़स्रं सर्वतोवापि तथान्यत्षड्रसन्निभम्।
अष्टास्रं सर्वभागेषु केवलं स्थण्डिलन्तुवेति।

अथवा सर्वतः अष्टासुदिक्षु क्रमाच्चतुरस्राद्यष्टास्रान्तं कारयेदिति सम्बन्धः। सर्वभागेषु केवलंस्थण्डिलमिति कल्पान्तरम्।

तत्र सद्योऽधिवासने कुण्डकरणाशक्तौ नवस्थण्डिलान्येव सम्पाद्य चातुर्होत्र-कर्मनिर्वर्तनीयमितिभावः। तथा तत्रैव

"स्त्रीणां कुण्डानि विप्रेन्द्र योन्याकाराणि कारयेत्"।

अत्रास्य वचनस्य महादानीय प्रकरणीयत्वात् स्त्रीकर्तृक तड़ागोत्सर्गादौ तत्सं-चारे मानाभावात तत्र च

"वेद्याश्च परितोगर्तारत्निमात्रास्त्रिमेखला"

इति मत्स्यपुराणोक्त गर्तानां प्रमाणं—

"चतुरस्र मादेशादन्य"दिति

कात्यायन परिभाषावलो चतुरस्रतैवोचितेत्याशयेन स्त्रीकर्तृकेऽपि तड़ागोत्सर्गे चतुरस्रमेव कुण्डमाचरन्ति। स्त्रीकर्तृकमहादाने तु योनिकुण्डमेव शास्त्रार्थो

नतु चतुरस्रम् । अथमात्स्ये महादानेषुलिङ्गपुराणवचनसञ्चारे मानाभावा-
ल्लैङ्ग महादानेष्वेव तस्य चरितार्थत्वान्मात्स्यकल्पवृक्षादिदाने परिभाषा-
प्राप्तं चतुरस्रमेव कुण्डंस्यादितिचेन्न ।

"कुर्यात्कुण्डानि चत्वारि चतुर्दिक्षु विचक्षणः ।
पञ्चमं कारयेत्कुण्ड मीशदिग्गोचरं द्विजे"ति

शारदीयवचनम् ।

"स्वमेखलायोनियुतानि तानिसम्पूर्णकुण्डानि सहासनानि ।
स्रुताम्रपात्रद्वय संयुतानि सयज्ञपात्राणि सविष्टराणि ।
हस्तप्रमाणानिति लाज्यधूपपुष्पोहाराणि सुशोभनानां"ति

मस्स्यपुराणे । ताम्रपात्रयोः प्रोक्षणी प्रणीतापात्रयोरिवाकारविशेषस्यो
नुपादाना चतुर्णां चतुरस्राणामेवकरण प्रसङ्गात् । तथाच

"यत्रोपदिश्यते कुण्डचतुष्कं तत्र कर्मणि ।
वेदास्रमर्धं चन्द्रञ्च वृत्तं पद्मनिभं तथा ।
कुर्यात्कुण्डानि चत्वारि प्राच्यादिषु विचक्षणः ।
पञ्चमं कारयेत् कुण्डमीशदिग्गोचरं द्विजे"ति

नारदीयवचनसञ्चारेण मात्स्ये महादानेषु कुण्डानामाकारभेदः पञ्चमंकुण्डं
च नसिद्धेयत्, अविरोधान्नारदीया परिभाषा तत्रापिसञ्चरतीति चेत् किम-
राध्यति तर्हि लैङ्गीभाषा । यत्तु महादानेषु सर्वाणि कुण्डानि चतुरस्राण्ये-
वेति दामोदर ठक्कुरवचनं तत्तावत्कुण्डाकार कथन प्रयासालस्य मूलक-
मेव । हेमाद्रि मदन रुपनारायण प्रतापरुद्रादिभि र्महादाने नानाकारकुण्ड-
कथनात् । तस्माच्चतुरग्निके एकाग्निके वा महादाने स्त्रीकर्तृके योनि-

कुण्डमेवोचितम् । यदि चैवम्—तद्रागतिष्ठादावपि स्त्रीणां चतुरस्रकुण्डाचारबाधः प्रसज्येत, तदा प्रसज्यताम्, किमत्रकुर्मः यत्र विपरीतार्थास्मृति नोपलभ्यते सएवाचारः प्रमाणम् । यथादाक्षिणात्यानां माहेनेम्बुकाद्याचारः प्राच्यानाम्बा होलकाद्याचार इति किमधिकेन । कुण्डमण्डने—नव वा चतुरस्राणि स्युः किम्बामण्डलानिकुण्डानि, अथवा पञ्चैवदिशांमुखेषु पूर्वेशकोणयोर्मध्ये च । पूर्वेशकोणयोर्मध्य इति पञ्चकुण्डी चेन्निवेश्या दिक्चन्तश्चैशपूर्वयोरिति पौरुषेयवचनानुसारा दभिहितम् ।

वस्तुतस्तु—

"विधाने पञ्चकुण्डानामीशाने पञ्चमं भवे"

दित्याम्नायरहस्ये । "दिक्षुवेदास्रवृत्तानि पञ्चमन्त्वीशगोचरे" इति ज्ञानरत्नावल्याम् । अत्र वृत्तपदेन वृत्त तदवयवघटित मूर्तिकान्यर्धचन्द्रवृत्तपद्मानिगृह्यन्ते । पञ्चमं कारयेत्कुण्डमीशदिग्गोचरं द्विजे"ति नारदीये चाभिधानाद्विरोधादनुपादेयमेतत् । आम्नायरहस्ये—

"कुण्डानि चतुरस्राणि वृत्तनानाकृतीनि च" ।

सर्वाणि चतुरस्राणि सर्वाणिवृत्तानि कथितयोन्यादिनानाकाराणि वेति त्रयः कल्पाः । सोमशम्भुः—

"शस्तानि तानि वृत्तानि चतुरस्राणिवाक्वचित् ।"

क्वचिन्नानाकार कुण्डासम्भवे एवं वेदास्राण्येव तानि स्यु र्वर्तुलान्यथवाक्वचिदिति व्याख्येयम् । आम्नायरहस्ये—

"नवपञ्चाथवैकम्वा कर्तव्यं लक्षणान्वितम् ।"

सोमशम्भुः—

"वेदी पादान्तरं त्यस्का कुण्डानि नव पञ्चवा ।"
(मूले सप्ततितमं पृष्ठं नास्तीति)

तत्रापि पुत्रकामं योनिकुण्डनिर्माणासमर्थं प्रति चतुरस्रंविधीयते, अन्यथा प्रयासातिशयसाध्याया योनेरननुष्ठान लक्षणमप्रामाण्यंस्यात् । छेद उच्चाटनम्, अत्र पुत्रकामकर्तव्ये कर्मणि विहितस्येकस्य योनिकुण्डस्य सामान्यविधि प्राप्तमाग्नेयमेव स्थानम्, तत्त्यागे बीजाभावात् । तदुक्तं कामिके—

"प्राच्यांस्तम्भे चतुष्कोणमग्नौ भागेभगाकृतिः ।"
चन्द्रार्धं मारणेयाम्ये द्वेषेकोणे त्रिकोणकम् ।

कोणे नैर्ऋत्याम् । तथा वारुण्यां शान्तिकेवृत्तं षड़स्यू च्चाटनेऽनिले । उदीच्यां पौष्टिके पद्मं रौद्र्यामष्टास्रि मुक्तिदम् । पिङ्गलामते—

"कुण्डं कुशेशयाकार मुदग्वैरस्य कर्मणि ।
षड़स्यू च्चाटने वायावर्धेन्दु मारणे यमे ।
वेदास्रं स्तम्भने प्राच्या माकर्षणेऽग्नौ भगाकृतिः ।
वारुण्यां शान्तिकेवृत्त मैशेत्वष्टास्रि मुक्तिदम् ।"

सिद्धान्तशेखरे—

योन्याख्य मुच्यते कुण्डमाग्नेय्यामुत्तराभुखम् ।
आज्ञासिद्धौ प्रतापेस्यादर्धचन्द्रमथोच्यते ।
याम्ये तन्मारणेशस्त मुत्तराभिमुखं सदा ।
नैर्ऋत्ये त्र्यस्रकुण्डं स्याद्विद्वेषे पूर्ववक्त्रकम् ।
वृत्तकुण्ड मथोवच्ये वारुण्यां शान्तिकेहितम् ।
षड़स्रमुच्यते कुण्डं वायावुच्चाटने पटु ।

पद्मकुण्डमथो वक्ष्ये सौम्ये तत्पुष्टिवर्धनम् ।
वक्ष्ये कुण्डमथोष्टास्रं मेशानेसर्वकामदम् ।

तदेतत्सर्वं संक्षिप्य निर्दिष्टं तत्तत्कामोपाधिना कल्प्यम् । योन्यादिकुण्डमेकम्वेति । नवम प्रथम तृतीय द्वितीय कुण्डानिसौम्यवदनानि । दक्षिणयोनीनि प्राङ्मुखेषुचान्येषु पश्चिमेयोनिः, यथा वेदीपृष्ठतो न षतति होतुरुत्तराभिमुखता वा सम्पद्यते तथाविधेयमितिवर्तुलार्थः । स्वायम्भुवे—

"प्रागग्नियाम्य कुण्डानां प्रोक्तायोनिरुदङ्मुखी ।
पूर्वाभिमुखाः स्मृताःशेषाः यथाशोभं व्यवस्थिताः ।

त्रैलोक्यसारे—

"दक्षिणस्था पूर्वयाम्ये जलस्थापश्चिमोत्तरे ।
नवमस्थामि कुण्डस्य योनिर्दक्षदलेस्थिता ।

जलस्था—वारुणस्था । सिद्धान्तशेखरे—

"इन्द्राग्नियमदिक्कुण्डयोनिः सौम्यमुखी स्थिता ।

सोमशम्भुः—

पूर्वाग्नि याम्यकुण्डानां योनिः स्यादुत्तरानना ।
पूर्वाननातु शेषाणा मैशानेऽन्यतरानना ।

ऐशाने—पूर्वैशानान्तरालकुण्डे । प्रागानना—उत्तरानना वा योनि रित्यर्थं इति सारिणीकारः । तत्रैशान पदस्य स्वार्थत्यागे मूलंचिन्त्यम् ।

इति कुण्डकादम्बरी निबन्धे नवकुण्डी प्रक्रिया
नामदशमोल्लासः ॥१०॥

नतु चतुरस्रम् । अथमात्स्ये महादानेषुलिङ्गपुराणवचनसञ्चारे मानाभावा-
न्लैङ्गे महादानेष्वेव तस्य चरितार्थत्वान्मात्स्यकल्पवृक्षादिदाने परिभाषा-
प्राप्तं चतुरस्रमेव कुण्डंस्यादितिचेन्न ।

"कुर्यात्कुडानि चत्वारि चतुर्दिक्षु विचक्षणः ।
पञ्चमं कारयेत्कुण्ड मीशदिग्गोचरं द्विजे"ति

शारदीयवचनम् ।

"स्वमेखलायोनियुतानि तानिसम्पूर्णकुण्डानि सहासनानि ।
स्रुताम्रपात्रद्वय संयुतानि सयज्ञपात्राणि सविष्टराणि ।
हस्तप्रमाणानिति लाज्यधूपपुष्पोहाराणि सुशोभनानि"ति

मत्स्यपुराणे । ताम्रपात्रयोः प्रोक्षणी प्रणीतापात्रयोरिवाकारविशेषस्यो
नुपादाना चतुर्णां चतुरस्राणामेवकरण प्रसङ्गात् । तथाच

"यत्रोपदिश्यते कुण्डचतुष्कं तत्र कर्मणि ।
वेदास्रमर्धं चन्द्रञ्च वृत्तं पद्मनिभं तथा ।
कुर्यात्कुण्डानि चत्वारि प्राच्यादिषु विचक्षणः ।
पञ्चमं कारयेत् कुण्डमीशदिग्गोचरं द्विजे"ति

नारदीयवचनसञ्चारेण मात्स्ये महादानेषु कुण्डानामाकारभेदः पञ्चमंकुण्डं
च नसिद्धेयत्, अविरोधान्नारदीया परिभाषा तत्रापिसञ्चरतीति चेत् किम-
राध्यति तर्हि लैङ्गीभाषा । यत्तु महादानेषु सर्वाणि कुण्डानि चतुरस्राण्ये-
वेति दामोदर ठक्कुरवचनं तत्तावत्कुण्डाकार कथन प्रयासालस्य मूलक-
मेव । हेमाद्रि मदन रुपनारायण प्रतापरुद्रादिभि र्महादाने नानाकारकुण्ड-
कथनात् । तस्माच्चतुरग्निके एकाग्निके वा महादाने स्त्रीकर्तृके योनि-

कुण्डमेवोचितम् । यदि चैवम्—तड़ागप्रतिष्ठादावपि स्त्रीणां चतुरस्रकुण्डाचारबाधः प्रसज्येत, तदा प्रसज्यताम्, किमत्रकुर्मः यत्र विपरीतार्थास्मृति नोपलभ्यते सएवाचारः प्रमाणम् । यथादाक्षिणात्यानां माहेनेम्बुकाद्याचारः प्राच्यानाम्वा होलकाद्याचार इति किमधिकेन । कुण्डमण्डने—नव वा चतुरस्राणि स्युः किन्त्वामण्डलानिकुण्डानि, अथवा पञ्चैवदिशांमुखेषु पूर्वेशकोणयोर्मध्ये च । पूर्वेशकोणयोर्मध्य इति पञ्चकुण्डी चेन्निवेश्या दिक्चन्तश्चैशपूर्वयोरिति पौरुषेयवचनानुसारा दभिहितम् ।

वस्तुतस्तु—

"विधाने पञ्चकुण्डानामीशाने पञ्चमं भवे"

दित्याम्नायरहस्ये । "दिक्षुवेदास्रवृत्तानि पञ्चमन्त्वीशगोचरे" इति ज्ञानरत्नावल्याम् । अत्र वृत्तपदेन वृत्त तदवयवघटित मूर्तिकान्यर्धचन्द्रवृत्तपद्मानिगृह्यन्ते । पञ्चमं कारयेत्कुण्डमीशदिग्गोचरं द्विजे"ति नारदीये चाभिधानाद्विरोधादनुपादेयमेतत् । आम्नायरहस्ये—

"कुण्डानि चतुरस्राणि वृत्तनानाकृतीनि च" ।

सर्वाणि चतुरस्राणि सर्वाणिवृत्तानि कथितयोन्यादिनानाकाराणि वेति त्रयः कल्पाः । सोमशम्भुः—

"शस्तानि तानि वृत्तानि चतुरस्राणिवाक्वचित् ।"

क्वचिन्नानाकार कुण्डासम्भवे एवं वेदास्राण्येव तानि स्युर्वर्तुलान्यथवाक्वचिदिति व्याख्येयम् । आम्नायरहस्ये—

"नवपञ्चाथवैकम्वा कर्तव्यं लक्षणान्वितम् ।"

सोमशम्भुः—

"वेदी पादान्तरं त्यक्त्वा कुण्डानि नव पञ्चवा ।"
(मूले सप्ततितमं पृष्ठं नास्तीति)

तत्रापि पुत्रकामं योनिकुण्डनिर्माणासमर्थं प्रति चतुरस्रंविधीयते, अन्यथा प्रयासातिशयसाध्याया योनेरननुष्ठान लक्षणमप्रामाण्यंस्यात् । छेद उच्चाटनम्, अत्र पुत्रकामकर्तव्ये कर्मणि विहितस्येकस्य योनिकुण्डस्य सामान्यविधि प्राप्तमाग्नेयमेव स्थानम्, तस्त्यागे बीजाभावात् । तदुक्तं कामिके—

"प्राच्यांस्तम्भे चतुष्कोणमग्नौ भागेभगाकृतिः ।"
चन्द्रार्धं मारणेयाम्ये द्वेषेकोणे त्रिकोणकम् ।

कोणे नैर्ऋत्याम् । तथा वारुण्यां शान्तिकेवृत्तं षड़स्यू च्चाटनेऽनिले । उदीच्यां पौष्टिके पद्मं रौद्र्यामष्टास्रि मुक्तिदम् । पिङ्गलामते—

"कुण्डं कुशेशयाकार मुदग्वैरश्य कर्मणि ।
षड़स्यू च्चाटने वायावर्धेन्दु मारणे यमे ।
वेदास्रं स्तम्भने प्राच्या माकर्षणेऽग्नौ भगाकृतिः ।
वारुण्यां शान्तिकेवृत्त मैशेत्वष्टास्रि मुक्तिदम् ।"

सिद्धान्तशेखरे—

योन्याख्य मुच्यते कुण्डमाग्नेय्यामुत्तरामुखम् ।
आज्ञासिद्धौ प्रतापेस्यादर्धचन्द्रमथोच्यते ।
याम्ये तन्मारणेशस्त मुत्तराभिमुखं सदा ।
नैर्ऋत्ये त्र्यस्रकुण्डं स्याद्विद्वेषे पूर्ववत्क्रकम् ।
वृत्तकुण्ड मथोवच्ये वारुण्यां शान्तिकेहितम् ।
षड़स्रमुच्यते कुण्डं वायावुच्चाटने पटु ।

पद्मकुण्डमथो वक्ष्ये सौम्ये तत्पुष्टिवर्धनम् ।
वक्ष्ये कुण्डमथोष्टास्रं मैशानेसर्वकामदम् ।

तदेतत्सर्वं संक्षिप्य निर्दिष्टं तत्तत्कामोपाधिना कल्प्यम् । योन्यादिकुण्डमेकम्वेति । नवम प्रथम तृतीय द्वितीय कुण्डानिसौम्यवदनानि । दक्षिणयोनीनि प्राङ्मुखेषुचान्येषु पश्चिमेयोनिः, यथा वेदीपृष्ठतो न पतति होतुरुत्तराभिमुखता वा सम्पद्यते तथाविधेयमितिवर्तुलार्थः । स्वायम्भुवे—

"प्रागग्नियाम्य कुण्डानां प्रोक्तायोनिरुदङ्मुखी ।
पूर्वाभिमुखाः स्मृताःशेषाः यथाशोभं व्यवस्थिताः ।

त्रैलोक्यसारे—

"दक्षिणस्था पूर्वयाम्ये जलस्थापश्चिमोत्तरे ।
नवमस्यापि कुण्डस्य योनिर्दक्षदलेस्थिता ।

जलस्था—वारुणस्था । सिद्धान्तशेखरे—

"इन्द्राग्नियमदिक्कुण्डयोनिः सौम्यमुखी स्थिता ।

सोमशम्भुः—

पूर्वाग्नि याम्यकुण्डानां योनिः स्यादुत्तरानना ।
पूर्वाननातु शेषाणा मैशानेऽन्यतरानना ।

ऐशाने—पूर्वैशानान्तरालकुण्डे । प्रागानना—उत्तरानना वा योनि रित्यर्थं इति सारिणीकारः । तत्रैशान पदस्य स्वार्थत्यागे मूलंचिन्त्यम् ।

इति कुण्डकादम्बरी निबन्धे नवकुण्डी प्रक्रिया
नामदशमोल्लासः ॥१०॥

॥ अथ दशमकुण्डीपक्षे दशमं कुण्डम् ॥

त्रिपुरासार समुच्चये नवकुण्डीविधावेव षड्मृष्टासूस्थाने पञ्चासू-सप्तासू योनिनिर्माणमितिपक्षो दर्शितः। पण्डिताः केचिदाहुः—वायव्ये पञ्चकोणं दिशिमदनरिपोः सप्तकोणञ्चकुण्डमिति। परेतु डाकिनी भूत निग्रहादिकामनया क्रियमाणे कर्मण्येकमेव पञ्चासूं सप्तासूञ्चविधीयते। तत्रदिगाकोङ्चायां नागभट्टवचनं प्रवर्तत इत्याहुः।

तत्र पञ्चसूं तन्त्रराजे—

तन्मध्यसप्तमांशेन ब्रह्मसूत्रं विकाशयेत्।
मानेन परितो भ्रान्त्या कृत्वा वृत्तं तथा ततः।
तत्रांशमानात्तद्वृत्ते कृत्वाचिह्नानि तत्रवै।
पातयेत्पञ्चसूत्राणि तत्स्यात्सप्तासू कुण्डकम्।
मानेनमध्यमावधि वर्धिताग्रावधिना तत्त्र्यंशमानात्।

चतुर्धाविभक्तस्य मध्यसूत्रस्य त्रिभिरंशैः कल्पितान्मानात्पादोनान्मध्यसूत्रा-दिति यावत्। प्रतापमार्तण्डेस्मृतिः—

"सप्तमांशं वहिर्न्यस्य कृत्वा वृत्तमिहभ्रमात्।
चतुर्थभागन्यूनेन पूर्वक्षेत्रेण सम्मितैः।
धनुर्ज्या कृतिभिः पञ्च सूत्रैः पञ्चासू कुण्डकम्।
होमे प्रशस्यते भूत डाकिनीग्रहनिग्रहे।"

सारसमुच्चये—

हयां(७) शेऽत्र भागं बहिर्न्यस्य वृत्तं परिभ्राम्य भूयोयुगां ४शीकृतेऽशैः । त्रिभिः षष्टदैर्घ्यं भवेत्पञ्चसूत्र प्रयोगादिदं तेनपञ्चासूकुण्डम् ।"

चतुरस्रस्य सप्तमभागेनाग्रतोवर्धयित्वा वृत्त निष्पाद्य तस्यैव चतुर्भागैः षड्दैर्घ्यं प्रमाय लाञ्छयित्वा लाञ्छनाल्लाञ्छने पञ्चसूत्राणि पातयेत् । षट्टं कोणयोरन्तरालमिति व्याख्यातारः । कुण्डमण्डने—

"काम्ये कर्मणिकुत्रचिदन्ये कुण्डे शरास्रसप्तास्रे ।
पञ्चास्रविधाविष्टं चतुरस्रं जिनलवैर्विभज्य पुनः ।
प्राचीसूत्रं भागैस्त्रिभिरेकस्य द्विवह्नि ३२ भागस्य ।
भागैश्चपञ्चदशभि १५ र्विंवर्ध्य मध्यादियावदभिवृद्धि ।
रज्ज्वावृत्तं घटयेद्व्यासशरांश त्रयेणतत्रज्याः ।
पञ्चविनिपातयेत्पाक्सूत्राग्रे नहिपतेद्यथाकोणः ।"

इति सिद्धे पञ्चास्रे लुम्पेवृत्तस्य सकलमपि परिधिम् । अत्र वृत्तव्यासः—

अङ्गुलानि त्रिंशत् ३० एकस्यांशस्य द्वात्रिंशद्भाविभक्तस्य त्रिंशद्भागाः ३०।३२ त्रिंशदङ्गुलानि सार्धसप्तयवा इति यावत् । ३०।७।४ तस्य शरभागाः ६।१।४ त्रिगुणाः १८।४।४ इदं ज्यामानम् । प्राचानमते त्वष्टादशपूर्णान्येव ज्याप्रमाणमिति भेदः । उपपत्तिरत्र पाठ्यां सूचित कल्पाति भास्कराचार्यैः । वृत्ते पञ्चज्याविधिमधिकृत्य तथाहिमण्डल व्यासे। वेदाग्नि पञ्चखाश्वै ७०५३४ र्निहते खखखाभ्र १२०००० तरणि भिर्भुक्ते लभ्यन्तेज्या इति तत्किञ्चिन्न्यूनं प्रजायते यदपि तदपि स्वल्पान्तरमिति शरभागत्रयमिता गृहीताज्या ।

अत्र व्यासः—३०।७।४ वेदाग्नि पञ्चखाश्वैर्निहतः २१८२१७४।४

द्वादशायुतभक्ते तस्मिन्लब्धम् १८ अष्टादशाङ्गुलानि १ एकोयवः। किञ्चिन्न्यूनाश्चतस्रो यूका ४ इयं ज्याव्यास पञ्चमांशत्रय परिमित १८।४।४ ज्यातः किञ्चिन्न्यूना भवतीति प्रणिधेयम्। जीवासु तावतीषु प्रथमाया मूलमग्रमन्त्यायाः मिलतीत्यनुभवसिद्धम्। तस्मात् पाठ्युक्तमेव न ग्राह्यम्।

अत्र तन्त्रराजादिमते व्यासः। ३०।६।७ सप्तमांश षट्काधिकानि त्रिंशदङ्गुलानि ३०।६।६।७ इति यावत्। ज्या स्तु अङ्गुलानि १८। कुण्डमण्डन मते व्यासः—३०।७।४ समुत्थोज्या १८।४।४ पाटी क्रमेण तत्र व्यासे ३०।७।६ लब्धा ज्या १८।१।४ इति परस्पर विप्रतिषेधोवेदितव्यः। तत्र फलसम्वादाय सामान्यकरण सूत्रम्—पञ्चास्रं सप्तास्रं षड़स्र मष्टासूमेषु कुण्डेषु। वृत्तफले कार्मुकफलतक्षण शेषः फलं भवति। तत्र ३०।७।६ एतावद्व्यासस्य वृत्तस्यफलं तावत्। ७५३।५।६ पादोनयवषट्काधिक त्रिपञ्चाशदधिका सप्तशती। तत्र कार्मुक फलानयनाय श्रीधरसूत्रद्वयमनुवदति।

"ज्याव्यासयोर्वियोगं योगेनाहत्य तस्य मूलेन।
व्यवकलितोऽथ द्वाभ्यां भक्तोव्यास शरो भवति।
जीवाशरैकादलहतशरस्यवर्गं दशाहतं नवभिः।
विभजेदवाप्त मूलं प्रजायते कार्मुकस्य फलम्।

प्रकृतेज्या—१८ ४।४ व्यासः ३०।७।४ तयोर्वियोगः १२।३ योगे ४६।४ नाहतः ६१२।४।४ तस्यमूलं २४।६ तेन व्यासो ३०।७।४ व्यवकलितः ६।१।४ अर्धितः ३।०।६।४ अत्रशरः, एवं शरेसिद्धे जीवा १८।४।४ शर ३।०।६ तयोरैक्यम् २१।५।२ तद्दलम् १०।६।५ तद्धृतः शरः ३३।५ तस्य वर्गः ११३०।५ दशाहतः ११३०६।२ तस्य नवमोभागः १२५६।२

तन्मूलम् ३५।३।२।४ इदं धनुःफलं पञ्चगुणम् १७७।०।४।४ वृत्तफले ७५३।५।६ तष्टं शेषः ५७६।५।१।४ एवं पञ्चासूफल सम्वादोवेदितव्यः। अष्टादशाङ्गुलमात्रे प्राचीनमतसिद्धे भुजे तु वृत्त भुजयोः परिमाणहान्या फलस्यापि काचन हानि वोद्धव्या।

रामस्तु—व्यासदलं व्यासजिनांशेषु पञ्चदशभागाः, विंशत्यंशस्यैकस्य नवांशोश्चेति पूर्वं सममाह—प्रकृति चतुरस्रव्यासस्यजिनांशाः पञ्चदश एकस्यजिनांशस्य विंशतिधा विभक्तस्य नवभागाश्चेति वृत्तव्यासस्यार्द्धं तथाच ३०।१८ इदं सम्पूर्णं वृत्तव्यास इति रामवाजपेयि मतम्।

अथ सप्तास्रं तस्मिन्वृत्तव्यासो द्विवर्जितोत्रिंशत्।
चतुरस्रक्षेत्रस्य श्रुतिदृग्भागा २४ स्तथैक
भागस्य द्वात्रिंशद्भागेषु ग्रहेन्दवस्तावतश्च विष्कम्भात्।
वाणशरखाश्विवाणैश्छिहताद्य द्वादशायुतैर्लब्धम्।
ताः सप्तज्याः फलतो व्यासार्द्धं स्वाष्टमांश परिहीनम्।
अत्रापि धनुः तच्चणशेषं वृत्तफलमेव भवति फलम्।

सप्तास्रारम्भक वृत्तव्यासः। प्रकृति चतुरस्रस्य चतुर्विंशतितमा अष्टाविंशतिर्भागाः अङ्गुलानि २८ द्वात्रिंशद्धा विभक्तस्य चैकांशस्य उनविंशतिर्भागाः तेन २८।।१९।३२ इति व्यासशरीरं तस्मिन्वृत्तव्यासे ५२०५५ एतदङ्केन निहते द्वादशायुते १२०००० भक्तेयंल्लभ्यते तावदङ्गुल परिमाणाः सप्तज्या भवन्ति ताभिर्घटिते सप्तास्रक्षेत्रे सप्तानां धनुषां फलानि तष्ट्वा शेषं फलम् प्रकृति चतुरस्रफलेन सम्वादयेदिति संक्षेपार्थः।

तन्त्रराजे—

तन्मध्य दशमांशेन विकाश्य ब्रह्मसूत्रकम्।
तेन मानेन संभ्रान्त्या कृत्वावृत्तं तथाततः।

तच्चतुः षष्ठिभागेषु त्रयस्त्रिंशा शमानतः ।
वृत्तेनिधायचिह्नानि सप्तसूत्राणि पातयेत् ।

तत्सप्तास्रं भवेत्कुण्ड मित्यादि सारसमुच्चये क्षेत्रव्यासेदशांशे वहिरिह विनिधायैकमंशंस्ववृत्तं मानेनानेनकृत्वा पुनरपिचतुःषष्ठिभागीकृतेऽत्र । पट्टायामप्रमाणंदृढ़मतिरमुना सत्तृकैस्त्रिंशदंशैः कुर्यात्सप्तास्रकुण्डं भवतिहितदिदं सप्तसूत्रप्रयोगात् । अत्र चतुरस्रक्षेत्रे चतुःषष्ठिभागे त्रयस्त्रिंशद्भागमितेनानुनाप्रमाणेनपट्टायामप्रमाणं कोणद्वयान्तरालदैर्घ्यप्रमाणं कुर्य्यादिति सम्बन्धः । अत्र २८।८।१० इति वृत्तव्यासः किञ्चिदधिक चतुरस्रव्यासार्द्धं प्रमाणाच ज्या । सावृत्तव्यासार्द्धमितया खाष्टमांश हीनया कुण्डमण्डनोक्तया ज्ययासह खल्पान्तरैवेति किमत्राभिनिवेशेन । नहियाज्ञिकेकर्मणि कुत्राप्यनयोः कुण्डयोर्विनियोगोदृश्यते । प्रतापरुद्रीये प्रतापमार्त्तण्डे स्मृतिः —

दशमांशेवहिर्न्यस्य कृत्वावृत्त मिहभ्रमात् ।
भङ्क्त्वाक्षेत्र चतुः षष्ठयातद्भागे स्त्रिंशतात्रिभिः ।
सम्भाय वृत्तंतत्र स्यात् सप्तास्रंसूत्रसप्तकात् ।
अभिचारोपशान्त्यर्थे होमेकुण्डमिदं स्मृतम् ।
अत्र धनुःफलतच्चापावशिष्टं वृत्तफलं स्वयमूहनीयम् ॥

इति कुण्डकादम्बरीनिबन्धे काम्यकुण्डविवरणं नामैकादशोल्लासः ॥११॥

वत्से कादम्बरि तवपरंलोक मासादयन्त्या ।
गङ्गा गङ्गाधर इति पितृद्वन्द्वमासीत्सहायः ॥
हेतोः कस्मादपिहि पितरौदूरतस्त्यक्तवत्या-
दीर्घः पन्थाः कथमितरथा लङ्घितोऽभूद्भवत्या ॥

के ये केऽपि स्वसुरान्वयेतर पितुर्वंशेच येकेचन ॥
त्वं तेषां सलिलस्य साधनमसीत्याशा पितृणामभूत् ।
पूर्वेषामुदकप्रसेकविषयां निश्शेषयन्त्या कथाम् ॥
हा कादम्बरि किन्त्वयैव सकलः पीतोनिवापाञ्जलिः ॥

कुण्डमण्डने निरवोचम्—

यद्यपि खातं बहुभिर्मेखलया सह परैस्तु तां मुक्त्वा ।
यावान् व्यासस्तावन्निम्न निरगादि विद्यते द्वैतम् ॥

किंखातफलं मेखलया सह किंनाम मेखलांत्यक्त्वा ॥
तत्रास्माकं चरमः पक्षः क्षोदक्षमो भाति ॥

मेखलान्तरालफलेनसहहस्त घनफलकं खातमितिवदन्तो रामवांजपेयिप्रभृतियउदाहरन्ति वचनानि मोहचूडोचरे—

"हस्तमात्रं खनेच्चर्यं गुद्धर्वं मेखलया सह ।"

मेखलया सह हस्तमात्रं खातस्योद्धर्वाधरपरिमाण मित्यर्थः । हस्तमात्रमिति खातव्यदेश कर्मणो विशेषणमित्येके । खननक्रिया विशेषणमित्य-

परे। प्रतिष्ठासारसंग्रहे—

पञ्चत्रिमेखलोच्छ्रायं ज्ञात्वाशेषमधः खने"

दिति। विश्वकर्मा—

"व्यासस्तस्यकरः प्रोक्तो निम्नं तिथ्याङ्गुलेन तु।"

अत्र तिथ्यङ्गुल निम्नत्वं नवाङ्गुलोच्च मेखलाभिप्रायेण। उन्नतासा नवाङ्गुलै"रिति विश्वकर्मणैवाभिधानात्। अग्निपुराणे—

"तिर्यक् सूत्रसमं खातमूर्द्ध्वं च मेखलया सह।"

सिद्धान्तशेखरे—

"खातं कुण्डप्रमाणं स्यादूर्द्ध्वं च मेखलया सह।"

एतानि वचनानि मेखलया सहैव खातस्यनिम्नतां कण्ठतः प्रतिपादयन्ति। पदार्थादर्शकृत्प्रभृनयस्तु हस्तनिम्नखातवादिनाः। तदुदाहृतानि वचनानि यथा—शारदायाम्—

"यावान्कुण्डस्यविस्तारः खननं तावदीरितम्।"

कुण्डानां यादृशं रूपं मेखलानाञ्च तादृशम्

त्रिपुरा सारसमुच्चये—

यावन्मानः कुण्डविस्तार उक्तस्तावत् खातस्यापिमानं प्रदिष्टम्।

कुण्डाकारं पण्डितोयादृशं यत्तादृग्रूपं मेखलाया विदध्यात्।"

प्रपञ्चसारे—

"विंशतिश्चतुरधिकोभिरङ्गुलीभिः सूत्रेणाप्यथ परिसृत्य भूमि भागम्।
ताभिश्च प्रखनतु तावतीभिरंश"मिति। दिव्यसारस्वते प्रयोगसारे च—

"चतुरस्रं चतुः कोष्ठं सूत्रैः कृत्वा यथा पुरा।
हस्तमानेन तन्मध्ये तावन्निम्नावतं खनेदि"ति।"

वायवीय संहितायाम्—

"कुण्डं विस्तारवन्निम्नमिति।
गणेश्वर परामर्शिण्याम्—

"चतुर्विंशाङ्गुलायामं तावत्खात समन्वितमिति।

दक्षिणामूर्ति संहितायाम्—

"चतुर्विंशति संख्याभिरङ्गुलीभिः सुविस्तृतम्।
खातञ्चरचयेत्कुण्ड"मित्यादि।

एतानि वचनानि खननेहस्तमात्रतामाहुः। खननन्त्वपसारित पार्थिवभागस्य वायुभागस्य केवलस्यावस्थानम्। नहि गगनादौ निरवयवे हस्तादि परिमाण सम्भवः। हस्तपरिमाणञ्च द्विविधम्। चतुर्विंशत्यङ्गुलस्य वर्गो घनश्चेति, तत्र क्षेत्रव्यवहारे वर्गस्वरूप एव हस्तः सम्बध्यते। खात व्यवहारे तु घनरूप एव, नह्यंपरिभागमात्रे पार्श्वमात्रे वा यवादिमिते खाते हस्तेन खात क्षेत्रमिति व्यवहरन्ति। तथा च—यावान्कुण्डस्यविस्तारो वर्गहस्त स्तावद्घनहस्तकं खननमिति शारदावाक्या देरर्थोऽध्यवसीयते। नच पञ्चदशाङ्गुल मात्रस्यखातस्य नवाङ्गुलोन्नत मेखलान्तराल वायुना सह घनहस्तसम्बन्धोयुज्यते, मेखलान्तराले पार्थिवभागापसारणाभावेन खातत्वाभावात् अन्यथा मेखलोपरितन तुच्छ वायुना सहाधिकाधिक परि-

माण प्रसङ्गात्। हन्तैवम्

"यावान् कुण्डस्य विस्तार"

इत्यादे र्यावद्वर्गहस्तकं कुण्डक्षेत्रं तावद्घनहस्तकं खातमित्यर्थः पर्य्यवस्यति। नचैतत् सम्भवति, द्विहस्तकुण्डे द्विगुणित वर्गहस्तकं क्षेत्रमिति घनहस्तद्वयपरिमितिया एव भूमेः खननप्रसङ्गात्। तथाच चतुस्त्रिंशदङ्गुलनिम्नं खतं न सिद्धयेत्, घनहस्तद्वयाधिकभूमि संग्रहप्रसङ्गात्। किञ्चिन्न्यूनैकत्रिंशदङ्गुलानां घन एवहि घनहस्तद्वयम्, तस्मादेतेषां वचनानामयमर्थः यावान्–यावद्वर्गहस्तकः कुण्डविस्तारस्तावदेव खननम्, तावद्वर्गहस्तकमेव खतोपरिक्षेत्रम्। तेन खाततिर्यङ्मान परतयैवैतानि वचनानि व्याख्येयानि, गत्यन्तराभावात्। ऊर्द्ध्वाधर परिमाणाकाङ्क्षयान्तु निम्नंतिथ्यङ्गुलेनस्विति पञ्चत्रिमेखलोत्सेधं ज्ञात्वा शेषमधः खनेदिति वचनमुपतिष्ठते, तेषा मनन्यगतिकत्वेनोर्द्ध्वाधर परिमाणमात्र प्रापकत्वात्। अथ यवमात्र मङ्गुलमात्रं वोपर्य्युपरि उत्कीर्य पञ्चदशाङ्गुलनिम्नमेकं मध्येपार्श्वतो वा बिलं निर्मीयेतैतावतैव तिर्यक् प्रमाण प्रापक मूर्द्ध्वाधरपरिमाणप्रापकं वचनमुपपन्नं स्यादित्याकाङ्क्षायां—

"व्यासस्तस्यकरः प्रोक्तो निम्नं तिथ्यङ्गुलेन"त्विति

विश्वकर्मवचनमुपतिष्ठते। तस्य खातस्य व्यास उपरितनंक्षेत्रं करः, स एव करस्तिथ्यङ्गुलेन गुणितः। करक्षेत्रफलं पञ्चदशभिर्गुणितं निम्नस्य खात फलं भवतीत्यर्थः। नन्वेवम् खातस्य घनहस्तसम्बन्धो न स्यादित्याकाङ्क्षाया मूर्द्ध्वं मेखलया सहे"तिवचन मुपतिष्ठते। परितः पार्श्वद्वय पर्यवष्टब्ध तुच्छवायुभाग एव खातम्। अपवरक गर्भेऽपि खातत्वमिष्टमेव पारिभाषिकम्। तथाच मेखलान्तरालेन सह भवत्येव खातस्य घन-

हस्तसम्बन्ध इति भावः। तदेकमूलक मेव "तावन्निम्नायतं खने"दित्यादि प्रयोगसारादिवचनम्।

तस्माद्धस्तनिम्नं खातं कुत्रापि नास्त्येव, प्रापकाभावात्। किन्तु पञ्चदशाङ्गुलनिम्नमेवेति परे प्रत्यवतिष्ठन्ते। तत्र कुण्डमण्डनम्—

"ऊर्द्ध्वं व मेखलयासह यदि पञ्चदशांशमात्र खातस्य आयासतुल्यतास्या त्तदापतेद्घनफलस्य वैषम्यम्। कण्ठोहि जिनांशमितो रविभागो-वा तयैव मेदिन्याम्। सान्तरयामेखलयो खातफलं भूयसाभिवर्धेत। कुण्डभुवि खातरूपं नानुगतं लभ्यते तथाहि नव द्वादश षड्डितिविकल्पा बहवस्तिष्ठन्ति मेखलोत्सेधे। तस्माच्छारदया यत्कथितं कुण्डायतं भुवः खननम्। तदुपरि तु मेखलाभूवीत्युपपन्न एवसिद्धान्तः। नन्विदंद्वयमपिदूषणं मलग्नकं वचनेन, पञ्चदशभागमात्रे खाते बोधिते घनफलवैषम्येण तदपवादासम्भवात्।

"पञ्चत्रिमेखलोत्सेधं ज्ञात्वा शेष मधः खने"

दितिवचनेनाननुगतायो एव खाताधरसामायाः क्रत्वङ्गत्वमिधानान्न द्वितीयोऽपिदोषः। शारदावचनञ्च न चतुर्विंशत्यङ्गुलनिम्नता बोधकमित्यभिहितमेव प्राक् तस्माद्धस्तुनिम्न खातविधायकत्वचनाभावात् सर्वत्र पञ्चदशाङ्गुलादिकमेव खातमितिचेत्, उच्यते—

"तामिश्च प्रखनतुः तावतीभि"रिति
"तावन्निम्नायतं खने"दिति

च विधिः श्रूयते। तदेकवाक्यतापन्नान्येव च शारदादीनां सिद्धार्थकवाक्यानि। तथाच हस्तनिम्नहस्तायत खनन करणिकया भावनया क्रतूपकारं भावयेदिति वाक्यार्थः। तत्र यदि मेखलया सह हस्तनिम्नं खातं

विवक्षितं, तथासति तस्य करणत्वेन भावनायामन्वयोऽनुपपन्नः, तस्य मेखलान्तरालांशे स्वतः सिद्धत्वेन पुरुषप्रवृत्तिस्वरूपार्थभावनासाध्यत्वाभावेन फलजनने तदव्यापारत्वरूपायाः कारणतायाः असम्भवात्। अर्थं भावना साध्यं क्रत्वादिकमेवहि फलकरणम्, भावनासहकारिभाट्टाः करणमिति व्यवहरन्ति, यागेनस्वर्गं भावयेदिति च यजेतेतिवाक्यं विवृण्वते। तथाच हस्तायतहस्त निम्नभूभागोद्धरणेन क्रतूपकारं भावये दित्याकारक एव तावन्निम्नायतं खनेदित्यादि वाक्याद्वाक्यार्थबोधः। निम्नायति सामान्येन चतसृषु दिक्षु ऊर्द्ध्वाधरभागे च यद्धस्तादिपरिमाणकं भूशकलं तदुद्धरे दित्येव प्रतीयत इति षड्भागतुल्यपरिमाणक भूखण्डोद्धरणेन कुण्डोपकारकं क्रतूपकारकं वा भावयेदित्यन्वयबोधः। तेन द्विहस्तादि कुण्डेषु न न्यूनपरिमाणक खननसिद्ध प्रसङ्गः। एवञ्च हस्तनिम्नखातस्यविधिवोध्यतया तद्विपरीतार्थक न्यूनपरिमाणबोधकवाक्यानां विषयभेदः कल्पनीयः। श्रुतिद्वैधन्तु यत्रस्या त्तत्रधर्मा बुभौस्मृतौ। स्मृतिद्वैधेतु विषयः कल्पनीयः पृथक पृथगिति न्यायात्। तस्मात्पञ्चाशदादि होमेऽरत्न्यादि कुण्डे च मेखलयासह हस्तमात्रं खातम्, अन्यत्रहस्तनिम्नमिति पदार्थादर्शमतानुयायिनः। ये पुनराहुः खातं प्रधानमितराणि मेखलादीनि।

अङ्गानीति न तेषामुपपन्नं नापिशास्त्रवद्वचनम्। शास्त्राणि योगिनीहृदयादीन्यङ्गंगदन्ति खातादि। हेमाद्रिणा निबन्धे लिखितं खातेन रहितमपि कुण्डम्। खातस्य प्राधान्ये खातफलद्विगुणता द्विहस्ते स्यात्। तद्धनमूलं व्यासोमवेत्प्रधानेहि कार्यसन्धानम्। एवं सति कात्यायनशुल्वे यज्ञपदाच्चूयारज्जुः। दशकरणीत्युक्तं तद्विरुध्यते तेन खातमप्यङ्गम्। किम्वाङ्गान्तर मारादुपकारक मत्र मेखला प्रभृति। खातन्तु सन्निपत्योपकारकाङ्गं मखेषु कुण्डस्य। गौतमीयतन्त्रे—

"ततः कुण्डं विरचयेल्लक्षणं तस्यमे शृणु ।
पूर्वापरायतं सूत्रं हस्तमात्रं प्रसार्य तु ।
तस्याग्रयोर्मस्य युगं दद्यात्स्पष्टं यथाभवेत् ।
द्विभागीकृत्य तत्सूत्रं पातयेद्दक्षिणोत्तरम् ।
तदग्रयोर्मस्य युगं कुर्यात्स्पष्टं यथा भवेत् ।
चतुर्दिक्षु चतुः सूत्रं पातयेत्तत् प्रमाणतः ।
कोणसूत्रद्वयं दद्यात प्रमाणं तेन लक्षयेत् ।
चतुरस्रं भवेत्कुण्डं सर्व लक्षण लक्षितम् ।
अनेन जनयेत्सर्वं कुण्डानि मनुवित्तम ।

इति चतुरस्र प्रकृतिकानि कुण्डान्युक्त्वा,

"ततः कुण्डं खनेन्मन्त्रीयथा शास्त्रविधानतः ।"

इति कुण्डोद्देशेन खातविधानात् । क्षेत्रमेव प्रधानं कुण्डपदार्थमित्यध्यव सीयते, तदङ्गं तु खातम् । तथाच–योगिनीहृदये खातं कुण्डायतेस्तुल्य मङ्गत्वं तस्य कीर्त्यते । सन्निपत्योपकारेण मेखलादेर्विशिष्यते । सन्नि-पत्योपकारेण होमफलं हविरग्निसंयोगं प्रत्यधिकरण कारकविधया दृष्टद्वा-राजनकत्वेन यदि च खातं प्रधानं स्यात्तदाद्विगुणितैकहस्त खातफल मूलं द्विहस्तकरणीस्यात् तथाच—पदं तिर्यङ्मानी त्रिरदापार्श्वमानी तस्याच्चूणा रज्जुर्दशकरणीतिशुल्वसूत्रं विरुद्धयते । तिर्यङ्मानी–कोटिः, पार्श्वमानी–भुजः, च्यूयातत्करणसूत्रम्, दशकरणी–दशपदक्षेत्र ब्रह्मसूत्रम् । ननु शुल्व-सूत्रं चयनविषयम्, नतु कुण्डविषयक मिति चेन्न । शुल्वसूत्र समानार्थ-कस्य चतुस्त्रिशाङ्गुलं सूत्रं तिलदादश कोणकम्, द्विहस्तकुंण्ड विधित्पूर्वक-त्परिसूत्रये—

"दित्यादेः कुण्डप्रकरण पठितस्य यामलचनादेर्दर्शनात्कर्णसूत्रप्रमाणेन द्विहस्तं कुण्डमुद्धरेत्। सर्वकुण्डेषुसर्वत्र वर्धयेद्विधिनामुने"ति

गौतमीय तन्त्राच्च—खातघनमूल क्षेत्र वर्गमूलयो र्न्यायसाम्येऽपि वचनेन क्षेत्र वर्गमूलमेव करणीतिसिद्धयति। वस्तुतः खातस्य प्राधान्याभावाच्चद्वै-गुण्ये न्याय एव नास्तीति किमधिकेन, एतेन द्विहस्तकुण्डे द्विहस्तमितैव करणीति प्लपतां मत मपास्तमितिदिक्।

इति कुण्डकादम्बरीनिबन्धे खातविवरणं नाम-
द्वादशोल्लासः ॥१२॥

अथ कण्ठः

तत्र कुण्डमण्डने—

कण्ठस्तुकुण्ड परिमितो व्यासजिनांशोन्मितो भवति यत्तु ।
व्यासद्वादशभागः कण्ठोभवतीति तन्न बहुविमतेः ।

शारदातिलके—

मेखलानां भवेदन्तः परितोनेमिरङ्गुलात् ।
एकहस्तस्य कुण्डस्य वर्धयेत्तं क्रमात्सुधीः ।
दशहस्तान्त मन्येषा मधीङ्गुलवशात्पृथक् ।

त्रिपुरासार समुच्चये—

"कुण्डस्यैककरस्य चारुपरितोनेमिर्भवत्यङ्गुलेनैकेनैव ततो विलोचन करादारभ्य सम्वर्धयेत । कुण्डादिकरकुण्डकावधिबुधः प्रत्येक मर्धाङ्गुलम् । तद्बाह्येखलु मेखत्र त्रितयकं कुर्याद्यथोक्तक्रमात् महाकपिल पञ्चरात्रे—

"चतुर्विंशति भागेनकण्ठो वैपरिकीर्तितः ।
तेन नेमिः कण्ठ इति पर्यायौ सिद्धयतः ।

आष्ठ इत्यपिकण्ठस्यनाम क्षेत्रार्कांशेन तस्यौष्ठ इति कामिक वाक्यात् । सोमशम्भुः—

बहिरेकाङ्गुलः कण्ठो द्वयङ्गुलः क्वचिदागमे । अयञ्च द्वयंश कण्ठकल्पः साम्प्रदायिकानामनभिमतो बहुतन्त्रविमतत्वादिति राघवभट्टादयो वदन्ति ।

अत्र द्विहस्तादिकुण्डे यदर्धाङ्गुलवशा द्वर्धनमुक्तम्, तस्य स्व स्व व्यास-चतुर्विंशांशः सर्वत्र कुण्डेकण्ड इत्यत्रैव पर्यवसानम् । द्विहस्तकुण्डे त्वर्धाङ्गुलवृद्धिः, स्थूलरीत्या तु एकमङ्गुलं त्रयोयवाः, द्वेयूके, चतस्रो लिक्षा इत्यादि १।३।२।४ द्विकर कुण्डकण्ठोऽवसेयः । तदुक्तं कालोत्तरे—खाताद्वाह्येऽङ्गुलः कण्ठः सर्वकुण्डेष्वियंविधिः । चतुर्विंशतिस्तंभागमङ्गुलं परिकल्पये"दिति । इयं खात कण्ठनिर्माणे मेखलाविधाने चोपयोगिनी परिभाषाक्षेत्रस्य चतुर्विंशोभागोऽङ्गुलमिति कण्ठनिर्माणोपयुक्तन्तु यवोऽष्टगुणितोऽङ्गुलमिति प्रागभिहित मिति न विरोध इति तद्व्याख्यातारः । पिङ्गलामते—

खातादेकाङ्गुलं त्यक्त्वा मेखलानां स्थितिर्भवेत् ।
अन्यत्रापि-कण्ठोऽष्टमयवमात्रः स्यात् कुण्डे तु करसम्मिते ।

सिद्धान्तशेखरे—

"कुण्डे हस्तमिते कण्ठं कुर्यादेकाङ्गुलं ततः ।
एवं क्षेत्रचतुर्विंशांशे कण्ठे बहुतत्र सम्वादोवेदितव्यः ।

अत्राहुः—द्वादशाङ्गुलोच्च मेखलापक्षे कण्ठो नास्ति, अन्यथा षण्णवत्यङ्गुला साम्यात्तन्मानैः कुण्डकल्पनमिति तन्त्रराजवचनसिद्धाया द्वादशाङ्गुलोच्च मेखलावप्रेण सह चतुर्विंशत्यङ्गुल खातस्य तावदायतस्य तावन्मित द्वितीयमेखला वप्रसहितस्य कुण्डगर्भस्य षण्णवत्यङ्गुलायामताया विवाद प्रसङ्गात् ।

उभयतः कण्ठाङ्गुलाभ्या मष्टानवत्यङ्गुलायतता पत्तेः । अतएव तन्त्रराजे कण्ठेनोक्तः इदमपि च कुण्डस्य चतुर्विंशत्यङ्गुलखाते प्रमाणम् । मेखला सह तथात्वे कुण्डगर्भस्य षण्णवत्यङ्गुला मतताानुपपत्तेः । नच

षण्णवत्यङ्गुलात्मनेति कादिमतवचनं परिधिसूत्रे श्रुतुर्मिः षण्णवत्यङ्गुल परिमाण सम्पत्तिपरम्। कादिमतस्यैव–

"तत्समान्येवजायन्ते, षण्णवत्यङ्गुलात्मने"ति

वचनान्तरात् क्षेत्रस्य चतुरस्रस्य सम सूत्रं चतुगुणम्। योन्यादिसर्वकुण्डानां पर्यन्तेषु नियोजयेत्। चतुरस्रषमं तच्चेच्छुभं योन्यादि कुण्डकम्। इति सिद्धान्तशेखरवचनाच्चावसीयत इति वाच्यम्।

तन्त्रराजवचनस्य कुण्डगर्भं षण्णवत्यङ्गुल परिमाण तात्पर्यानवबोधेन सिद्धान्तशेखरवचन प्रवृत्ते रुक्तत्वादत्यन्तविसम्वादाच्च।

तथाहि—"अर्धचन्द्रेऽष्टानवतिरङ्गुलानि त्रयोयवाश्च ९८।३ वृत्तार्ध परिधिना सह ज्यापरिधिः सिद्धयति। त्र्यस्रेनवाधिकं शत १०९ मङ्गुलानि त्रयोयवाः ३ वृत्तपञ्चाशीति ८५ रङ्गुलानि किञ्चिदधिकानि। षड़स्रेऽष्टाशीतिरङ्गुलानि ८८।४ चत्वारो यवाः साग्राः। अष्टास्रे सप्ताशीतिरङ्गुलानि चत्वारोयवाश्च ८७।४। पद्मकुण्डे आबाधा ४।४।५।७ लम्ब ४।४।६।२ वर्गयोगमूलभूत कर्णप्रमाणानि दलाग्रसूत्राणि यूकान्यून पञ्चयवाधिकानि षड़ङ्गुलानि ६।४।७ तत्षोड़शगुणितं जातम् १०३।६ षड्यवाधिक त्र्युत्तरशतमङ्गुलानि तावन्मितः परिधिरिति योनिकुण्डेऽपीषदूव्यभिचार इति दर्शितमेव प्राक्। तस्मात् कुण्डव्यास चतुर्विंशत्यंश स्वरूप पारिमाणिकाङ्गुलानि षण्णवतिः कण्ठरहितस्य द्वादशांशोच्च मेखलावप्रस्य चतुर्विंशत्यंश खातस्य कुण्डस्य गर्भ इत्येव तन्त्रराजवचनार्थः। कण्ठ प्रतिपादकवचनानि त्वन्याद्दशमेखला पराणांतिचन्द्रिकाकृत्प्रभृतयः।

इति कुण्डकादम्बरी निबन्धे कण्ठविवरणं
नाम त्रयोदशोल्लासः ॥१३॥

अथ मेखलाः

कुण्डमण्डने—

"तिस्रः पञ्चच मुख्या मध्येद्वे अवरसंज्ञकाचैका ।
कुण्डेषु मेखलास्तास्वेकाचेद् व्यासतुर्योच्चा ।
तावद्व्यासाष्टा षष्ठलवेनोच्छ्रिताच विस्तीर्णा ।

लक्षणसंग्रहेतु—

मुख्यास्तु पञ्चताः प्रोक्तामध्यमास्तिस्र एव तु ।
द्वे स्यातामधमेपक्षे एकासात्वधमाधमेतिकल्पोक्तः ।
सपक्षो बहूनामसम्मतेरनुपादेयः ।

तथाहि—क्रियासारे—

नाभियोनि समायुक्त श्रेष्ठं कुण्डं त्रिमेखलम् ।
कुण्डं द्विमेखलं मध्यं नीचंस्यादेक मेखलम् ।

अत्र त्रिमेखलस्योत्तमत्वे कैमुतिकन्यायायात्पञ्च मेखलस्याप्युत्तमस्व मवसेयम् । सोमशम्भु स्तु—

त्रिमेखलं द्विजे कुण्डं क्षत्रियस्य द्विमेखलम् ।
मेखलेका तु वैश्यस्ये"ति व्यवतस्थे ।

शारदायाम्—

कुण्डानां मेखलास्तिस्र इति पञ्चानामप्युपलक्षकम् ।
एक मेखलापक्षेतु तन्मानमुक्तं पिङ्गलामते ।
एकाषड़ङ्गुलोत्सेधविस्तारा मेखलो मता ।

महाकपिल पञ्चरात्रे—

सा चतुर्थांश विस्तारा मेखलकाथवास्मृता ।

सिद्धान्तशेखरे—

कुण्डानां मेखलां कुर्यादेकाश्चेत्षड्भिरङ्गुलैः ।

लक्षणसंग्रहेतु—

चतुरङ्गुलविस्तारा स्याद्यत्रैकैव मेखला ।

कामिके—

"स्याद्वेदत्वंशमानतः" ।

मेखलापृथुलोच्छ्रायाः कुण्डाकारा तु मेखला ।

सर्वेषान्तु प्रकर्तव्या मेखलैकाग्रलाघवा' दिति चतुरङ्गुलविस्तीर्णा षडुन्नता मेखला कथितेतिविशेषः । तस्यैव कामिकवचनस्य चतुर्थांशेन वा पृथुलत्वोच्छ्रायौ षष्ठांशेन वा पृथुलत्वोच्छ्राया वित्यर्थे लक्षणसंग्रहैक वाक्यतया सिद्धे । यद्वा षष्ठलवेनोच्छ्रिता च विस्तीर्णेति कुण्डमण्डन वाक्यप्रसवो वेदितव्यः । मेखलाद्वयपक्षे कुण्डमण्डमे—

यदि तु द्विमेखलमिदं चतुरुच्चासप्तविस्तृता प्रथमा ।
त्रिविभागोच्चा तदुपरि चतुरंशेनायता द्वितीया स्यात् ।

तन्त्रे—षष्ठांशेनाष्टमांशेनद्विमेखलाद्वितयं विदुः । षष्ठांशश्चत्वार्यङ्गुलानि, तावदुच्चाप्रथमा भूमिभूतामेखला, तदुपरि अष्टमांशेन त्रिभिरङ्गुलै रुन्नताद्वितीयमेखला, तत्र प्रथमायाः सप्ताङ्गुलो द्वितीयायाश्चतुरङ्गुलो विस्तार औचित्यात्सिद्धयति । तत्र द्वैतं दर्शयति कुण्डमण्डने—

गर्भपरिधि संलग्नां प्रथमायाः कन्यये दितराम् ।
अथवा प्रान्ते परिधौ निपञ्जयेदेवमेव सर्वत्र ॥
अत्र प्रथमपक्षे क्रणठसन्निहितोवप्रः सप्ताङ्गुलोच्छ्रितः ।

द्वितीयपक्षेतु—चतुरङ्गुलोच्चस्तदुत्तरमेखला पृष्ठवप्रः सप्ताङ्गुलोच्छ्रित इति विशेषः । एवं त्रिमेखलादि पक्षे नवाद्यङ्गुलोच्चत्वं गर्भवप्रस्य पृष्ठवप्रस्य वेति द्वैतमिदमुपन्यस्तं भवति । तत्र पूर्वं पूर्वं गर्भपरिधि संलग्नैव द्वितीयादि रुत्तरोत्तरमेखलेतिपक्ष सिद्धान्तसिद्धः । अन्यथा तन्त्रराजोक्तायाः कुण्डगर्भस्य षण्णवत्यङ्गुला मतायां अनुपपत्तेः ।

प्रधान मेखलोत्सेधमुक्तमत्रनवाङ्गुलम् ।
तद्वाह्य मेखलोत्सेधं पञ्चाङ्गुलमितिस्मृतम् ।
तद्वाह्य मेखलोत्सेध मङ्गुलद्वितय क्रमात् ।

चतुस्त्रिद्वयङ्गुलो व्यासो मेखलात्रितयस्यत्विति त्रिमेखल कुण्डविषयक क्रियासार वचने—

प्रथमोऽध्यङ्गुलो ग्रामा उन्नता सा नवाङ्गुलैः ।
मध्यातु त्र्यङ्गुलावाह्ये तृतीयातु समाङ्गुलै"रिति ।

लक्षणसंग्रह वचने च—

वाह्यपद श्रवणस्यान्यथानुपपत्तेच्च ।

तथा—एवं सप्तांशोच्छ्रिति रुपरितनी तदधरा पुनस्त्र्यंशा ।
परिणमतीतित्र्यंशात्र्यंशोन्नता ।

तथा—यदि तु त्रिमेखलं कुण्डमिष्यतेतर्हि—
प्रथमा द्विभागतुङ्गा नवभागैरायतातद्वूर्वा तु ।

त्रिभागोच्चा सप्तायता तदुपरिस्थिता चतुर्भागाः ।
आयामे तुङ्गत्वेऽप्येवं प्रथमा नवांशिका भवति ।
पञ्चोत्सेधा मध्याद्विभागतुङ्गात्ततोऽप्यधरा ।
नवांशिका—नवांशोन्नता ।

शारदातिलके—

कुण्डानां मेखलास्तिस्रो मुष्टिमात्रे तु ताः क्रमात् ।
उत्सेधायामतोज्ञेया द्वयेकार्धाङ्गुल विस्तृताः ।
अरत्निमात्रे कुण्डेतु तास्त्रिद्व्येकाङ्गुलोन्मिताः ।
एकहस्तमितेकुण्डे वेदाग्निनयनाङ्गुलाः ।

सारसमुच्चये—

तिस्रः कुण्डेमेखलेद्वे यद्वाचकाम्मेखलाम्वा प्रकुर्यात् ।
कुर्याद्ध्रुवं मेखलायागजौष्ठाकारां योनिञ्चापिहोतुर्दिशीति ।
मुष्टिमात्रे तु तां मेखलां द्वयङ्गुलैकाङ्गुलार्धाङ्गुलोत्सेधता वा क्रमात् ।
रत्निमात्रेतु तास्त्र्यङ्गुलद्वयङ्गुलैकाङ्गुलोत्सेधता वा भवेयुः पुनः ।
युगाग्निपक्ष नेत्रङ्गुलोत्सेधतारा: स्युरेताः क्रमाद्धस्तमात्रे तु कुण्डे ।

तारो—विस्तारः । युगानि—सत्यादीनि । अग्निपक्ष—अग्निः । अत्र सर्वत्र प्रकृतिभूतैक हस्तचतुरस्रे चतुस्त्रिद्वयङ्गुल परिमाणक मेखलानामुपदेशादन्यासु विकृतिषु षष्ठांशेनाष्टमांशेन द्वादशांशेन क्रमान्मेखला त्रयमतिदेशात् सिद्धयति । प्रकृतिवद्विकृतिरितिन्यायात् । तथा च सोमशम्भुः—

कुण्डानां यश्चतुर्विंशोभागः सोऽङ्गुलसंज्ञकः ।
विभज्यानेन कर्तव्या मेखला कण्ठनाभयः ।

पञ्चरात्रे—

कुण्ड षष्ठांशिकात्राद्या द्वितीयाष्टां शिकास्मृता ।
तृतीयद्वादशांशादिति स्वस्त्यरत्नि कुण्डयोस्तु—

शारदायाम्, सारसमुच्चये च—

यन्मेखला परिमाणविशेषाभिधानं तदतिस्थूलं प्रमाण मनुसृत्य । सूक्ष्म-प्रकारेणतु एकविंशत्यङ्गुलात्मक मुष्टिमिते कुण्डे सार्ध त्र्यंगुला प्रथमा, सपञ्चयवद्वयङ्गुलामध्या, पादोनद्वयङ्गुला तृतीयेति सिद्धयति । षोड़शांशवि-युक्तः शारदायामरत्निरित्याभिहित स्तन्मिते कुण्डे पादोनचतुरङ्गुला प्रथमा, साधषड्यवाधिक द्वयङ्गुलामध्या, यवो नद्वयङ्गुलातृतीयेति गणनीया । अथ-मेखलावचनप्रकारः । कण्ठसीमानमारभ्य प्रथमानवाङ्गुलायता । द्व्य-ङ्गुलोच्चा तदुपरि गर्भपरिधिसंलग्ना त्र्यङ्गुलोच्चा सप्ताङ्गुलविस्तीर्णा द्वितीया, तदुपरि तथैव चतुरङ्गुलोच्चातथैवायता च तृतीयामेखला । तेन वेदाग्निन यनाङ्गुलत्वमर्थादुपपद्यते । तथाच तन्त्रम्—

या या तु मेखला पूर्वा सा सा भूमिरुदाहृतेति । एवञ्च प्रथमा गर्भवप्रे नवाङ्गुलोच्चावहिश्चतुरङ्गुलोच्चा मध्यमा तु गर्भेपञ्चाङ्गुलेन वहि-स्त्र्यङ्गुलेनोच्चा । तृतीय तु गर्भे वहिश्चद्वयङ्गुलोच्चा सिद्धयति, वहिः परि-माणाभिप्रायेणैव कोणरामयमाङ्गुलैरितिवचन मुपपादनीयम् । नतु तदनु-रोधेन गर्भपरिधावेव प्रथमा चतुरङ्गुलोच्चा, द्वितीया त्र्यङ्गुलोच्चा, तृतीया द्व्यङ्गुलोच्चैकैकाङ्गुलान्तरालेन चतुरङ्गुलायतोच्चा मेखलात्रयघट-नमिति कस्यचिन्मतमादरणीयम् । या यातु मेखला पूर्वा सासाभूमिरुदा-हृतेतिवचनविरोधादितिदिक् ।

यत्तु—व्यासे चतुर्विंशतिधाविभाजितेतिस्रश्चतुस्त्रीक्षण भागवि-

स्तृताः। समं ततः कण्ठ वहिस्तु मेखला नवर्णवामांशक तुंगतामिता।
इति कस्यचिदार्षवचनं तन्मूलाभावादुपेक्षयम्। कुण्डमण्डने—

अथवा प्रथमाद्वादशभागायति रुच्छ्रिता चतुर्भागैः।
तदुपरि चतुरुच्छ्राया वसुदीर्घा मेखला तृतीया तु।
चतुरुच्छ्राय व्यासायामेति द्वादशोच्छ्रिता प्रथमा।
अष्टोच्छ्रिता द्वितीया चतुरुत्सेधाधरेति परिणमति।

प्रपञ्चसारे—

सत्त्वपूर्वकगुणान्विताः क्रमाद्द्वादशाष्ट चतुरङ्गुलोच्छ्रिताः।
सर्वतोऽङ्गुल चतुष्कविस्तृता मेखलाः सकलसिद्धिदामताः।

अत्राङ्गुल चतुष्कविस्तृतास्तिस्रो मेखला इति लाभाय सत्त्वप्रभृति गुणत्रयस्य सम्बन्धस्तासु दर्शितः। अयञ्च द्वादशाङ्गुलोच्च मेखलाकल्पः काम्यः सकलसिद्धिदा इति श्रवणादिति साम्प्रदायिकाः। वसिष्ठसंहितायाम्—

प्रथमामेखला तत्र द्वादशाङ्गुलविस्तृता।
चतुर्भिरङ्गुलैस्तस्या उन्नतिश्च समन्ततः।
तस्याश्चोपरिवप्रः स्याच्चतुरङ्गुलमुच्छ्रितः।
अष्टाभिरङ्गुलैः सम्यग्विस्तीर्णश्च समन्ततः।
तस्योपरि पुनः कार्योवप्रः सोऽपि तृतीयकः।
चतुरङ्गुलविस्तीर्ण उन्नतश्च तथाविधः॥
यदि नाम पञ्चाचस्तर्हीत्थ मत्स्य वचनं स्यात्।
विंशत्यंशव्यासाद्विद्वलवोच्चामेखला प्रथमभूमिः।

तदुपरितृतिः १८ व्यासान्त्रिभागतुङ्गा ततस्तिथिव्यासा १५। चतुरुच्चा

तदुपरि शर ५ तुङ्गारुद्रा ११ यता तुरीयास्यात् । तदुपरि षड्शतुङ्गा तावद्व्यासा च पञ्चमी भवति । एवं विंशतिभागोत्सेधाद्यमेखला भवति । कण्ठसन्निहित वप्र भागे विंशत्यङ्गुल उत्सेधः, मूलप्रदेशे च विंशत्यङ्गुलो विस्तारो बोध्यः । सिद्धान्तशेखरे—

षड्बाणाब्धिवह्निनेत्रमिताः स्युः पञ्चमेखलाः ।

संग्रहे—

मेखला पञ्चवाक्कार्याः षड्बाणाब्धित्रिपक्षकैः ।

रामस्तु—

व्यासमितेन्यूनं निजगाद मेखलोच्चत्वम् ।
तत्र प्रमाणविरहो बहुतन्त्रविरोध दोषश्च ।

अत्र कुण्डस्य समेखलस्य प्रकृतिभूतस्यैकहस्तस्ययत्फल तस्यैव समेखले द्विहस्तकुण्डादौ द्वैगुण्यादि विधेयम् तच्च मेखलावृद्धिम्विना न सम्भवतीत्याशयेन त्रिपुरासार समुच्चये—

करद्वन्द्वमात्रे रसाम्भोधिवद्द्वयङ्गुलोत्सेधता वा भवेयुः क्रमात्ताः । वेदकरेऽस्मिन् सिन्धूर ८ तर्का ६ द्वयङ्गुल तारोत्सेधयुताः स्युः । षट्कर-मात्रेऽस्मिन् दशकुंभ्य ८ ङ्गा ६ ङ्गुलतारोत्सेध समेताः । भास्कर १२ पञ्चदश गजा ८ ङ्गुलतारोत्सेधसमाः स्यु रिमावसुहस्ते । शारदातिलके—

कुण्डे द्विहस्तेताज्ञेयो रस वेदगुणाङ्गैः । ६।४।३ चतुर्हस्ते तु कुण्डे ता वसु ८ तर्क ६ युगा ४ ङ्गुलाः । कुण्डेरसकरे ताः स्युर्दशाष्ट-र्त्वङ्गुलान्विताः । वसुहस्तमिते कुण्ठे भानुपङ्क्तयष्टकाङ्गुलाः । दश हस्तमिते कुण्डे मनु १४ भानु १२ दशाङ्गुलाः । विस्तारोत्सेधतोज्ञेया

मेखलाः सर्वतो दुधैः। इदं द्विहस्तादि मेखला प्रमाणं स्थूलम्। परमार्थतस्तु—

शराःशरा द्वे प्रथमा चत्वारि द्वौच मध्यमा।
द्वेषट् पञ्चान्तिमेत्येवं द्विहस्तेमेखलाः क्रमात् ॥

प्रथममेखलायाः पञ्चाङ्गुलानि, पञ्चयवा द्वेयूके, मध्यमायाश्चत्वार्यङ्गुलानि द्वौ द्वौ यवौ, चरमाया द्वे अङ्गुले, यवाः षट्, पञ्च यूका इत्येवमग्रेऽप्यवधेयम्। कुण्डव्यासस्य षष्टेनाष्टमेन द्वादशेन च भागेन यथाक्रममेखला कर्तव्येत्यत्रतात्पर्यम्। चतुर्हस्तमधिकृत्य वसु ८ तर्क ६ युगा ४ ङ्गुलत्वम् वदता शारदाकृता सूचितमेतत्। एवं समहस्तेषु विषमहस्तेषु च फलसम्बादिन्यो मेखलाः स्वयाबुद्धया समुत्प्रेक्षणीया इति। शारदायाम्—कुण्डानां यादृशंरूपं मेखलायाश्च तादृशमिति मेखलायाः कुण्डाकारत्वेऽपि चतुरस्रस्वरूपं नहीयत इति पदार्थादर्शः। तस्यायमाशयः—अन्येषु कुण्डेष्वपि चतुश्चत्वारिंशदङ्गुल व्यासस्य चतुरस्रस्य समेखलस्य कुण्डस्य क्षेत्रफलं सम्बदत्येव, तेन तथाप्रयतनीयम्। तथा—चतुरस्रैकहस्तत्रिमेखल कुण्डस्य फलं १६३६ षट्त्रिंशदधिकोनविंशतिशती त्रिमेखलैकहस्त कुण्डान्तरेषु समेयादिति। तत्र योनिकुण्डे रचनाप्रकारः—चतुर्विंशत्यङ्गुलेन षड्विंशत्यङ्गुलेन चतुस्त्रिंशदङ्गुलेन चत्वारिंशदङ्गुलेन, चतुश्चत्वारिंशदङ्गुलेन च पञ्च चतुरस्राण्युत्तरोत्तर क्षेत्रगर्भित पूर्व पूर्वाणिनिर्मातव्यानि। ततोब्रह्मसूत्रं वधयित्वा तत्तच्चतुरस्रात्सपोद प्राय पञ्चांशैः परिभाय पञ्चसु स्थानेषु लाञ्छनानि विधेयानि, तत्र तत्र लाञ्छने तत्तच्चतुरस्रतिर्यक् सूत्रान्तद्वयावष्टम्भेन सूत्राणांद्वयं द्वयं पातनीयम्। श्रोणिगतक्षुद्रकोष्ठकदशके च स्वस्व करणार्धप्रमाणेनभ्रमणेन च दशवृत्तार्धानि परिलिखनीयानि। तेन योनिपञ्चकं निष्पद्यते। तत्र सर्वगर्भेखातं बहिः कण्ठस्तद्बहिश्चतुरङ्गुल

व्यासा तद्बहिस्त्र्यङ्गुलातद्बहिर्द्व्यङ्गुला मेखलेति। कण्ठ मेखलादीनां योन्याकारकत्वं क्षेत्रफलसम्वादश्चोपपद्यते।

अत्र योनिकण्ड त्रिकोणकुण्ड षड्स्रार्धचन्द्राष्टाः, तेषु प्रकृतिभूत चतुरस्र चतुर्विंशांशरूपेणाङ्गुलेनैव दशगुणितेन खात परिधेः सान्तरातृतीय मेखलाप्रान्तसीमा, अन्यत्रतु वृत्तचतुर्विंशांशस्वरूपेणाङ्गुलेनेति कुण्ड-मण्डले यदवोचम्—

"तत्तत्कुण्ड व्यासान् विभजे चतुरधिकविंशतिधा।
तेनांशेनाङ्गुलविधि मादध्यात्कुण्डमेखलयोः।
इष्टकरे चतुरस्रे समेखले क्षेत्रगंफलं यावत्।
तावद्वृत्ते कुण्डे पद्मे च यथान्वियात्तथा कुर्यात्।
प्राकृत माश्रित्याङ्गुलमेकद्वि चतुस्त्रिकोणकुण्डेषु।
अष्टषड्स्रे च फलं न व्यभिचरतीति बोध्यमति सूक्ष्मम्।
ये पुनरस्रविरहितेकुण्डे षड्राःनुकारिवृत्तनिभे।
तत्फलसम्वादाया व्यासाङ्गुलमेव कण्ठमेखलयोः।
इति तन्त्र महानस्य प्राकृतजनस्य प्रमादोऽभूत्।

तथाहि—एकास्रे योनिकुण्डे खातक्षेत्रावष्टकक्षुद्र चतुरस्रयोः। श्रोणिभागस्थितयोः कर्णसूत्र, मेकसप्तदशांशन्यूनाः सप्तदश १७।१।१७ सवर्णनेकृते २२८।१७ समेखलस्य तस्य श्रोणिकोष्ठद्वयकर्णे सूत्रं नवांशाधिका एकत्रिंशत् ३१।१।९ सवर्णनेकृते २८०।९ तथाच श्रोणिभागेखात वृत्तार्धमेखला वृत्तार्धयोरन्तराले चतुर्दशांङ्गुलानि साग्राणि पतन्तीति क्व-प्राकृतेनाङ्गुलेन तुल्यान्तरतानिर्वाहः। उपरित्रिकोणभागेऽपि खातत्र्यस्र-योर्दशाङ्गुलं श्रोणिद्वयान्तरालमिति, सत्यम्, परन्तु यथाक्रम मुपरिभागे स्वल्पं स्वल्पमन्तरालमिति व्यभिचारः। यदितु खातत्रिकोण भुजस्य

मूलाग्रयो र्दशाङ्गुलान्तरालेन चिह्नद्वयं कृत्वा यथेष्टवर्धिते ब्रह्मसूत्रे चिह्नद्वयस्पर्शि मेखलात्रिकोण भुजसूत्रं पात्येत, तदा महतीलम्बताफल वैषम्यश्चेति। एवं त्रिकोणकुण्डेऽपि मेखलाखातयोः प्राकृताङ्गुलेनैवान्तरालकल्पनमिति न सम्भवत्येव, तथाहि—त्रिकोण क्षेत्रनिर्माण प्रकारः। पूर्ववत्पञ्चचतुरस्राणि निर्माय स्वकीय स्वकीय सार्धप्राय द्वादशांशवृद्धया पञ्च श्रोणिसूत्राणि वर्द्धयित्वा तावत्परिमाणक भुजसूत्रद्विकानां योगेन पञ्चत्रिकोणानि, तेषु क्रमेणखातकण्ठमेखलत्रयाणि घटनीयानीति। तत्र च खातत्रिकोण चरममेखलात्रिकोणयोः श्रोणिसूत्र मध्यभागयोर्दशाङ्गुलमन्तरालमिति वाढ़म्, भुजयोरन्तराले तु महान् व्यभिचारः।

एवं द्विकोणं कुण्डमर्धचन्द्राकृति तस्या या करणी १६।३।२० तत्र प्राकृतंदशाङ्गुलंवर्धयित्वा २६।३।२० एतावत्याकरण्या पञ्चमं वृत्तार्द्धं घटनीयम्। तद्गर्भे च प्राकृताङ्गुलक्रमेणैवचत्वारि मण्डलाधानि ज्यासूत्रञ्च ३८।६।२० तदवष्टम्भेन दशाङ्गुलादि पार्श्वभुजद्वय सहकारेणदीर्घं चतुरस्राणि घटनीयानि चत्वारि, तेषु च यथा क्रम कण्ठमेखलादि निर्माण मिति पक्षो न शोभते। तथासतिहि कुण्डोपरितन मेखलारम्भक चतुर्भुजक्षेत्रपार्श्वभुजयोराजवेन वृत्तार्धाकारत्वाभावात्।

"कुण्डानां यादृशं रूपं मेखलानाञ्च तादृश"मिति

विधि विरोधः। तेन हि विधिना ज्यासूत्रपर्यन्तं वृत्ताकारता मेखलायाः प्रत्याय्यते, फलाविसम्वादश्चभूयान्। तथाहि—

अत्रो परितन चतुर्भुजेदशघ्नी ज्याफलं ३८।६।२० इयं ज्या सा दशघ्नीत्र्यशीत्यधिकं शतत्रयम् ३८३ वृत्तार्धफलन्तु—तत्र वृत्तार्धं २६।३।२० तद्विद्वगुणं ५८।६।२०। ५८।२।३।१।५ इति यावत्। तस्यवर्गः—

किञ्चिदूनं चतुस्त्रिंशच्छतम् ३३९९ तस्मिन् भनवाग्निनिघ्ने पञ्चसहस्रषष्ठे च लब्धं सप्तत्यधिकमासन्नं षड्विंशतिशतम्, तदर्धितं पञ्चत्रिंशदधिकानि त्रयोदशशतानि १३३५ तान्युपरि चतुस्रफलेन युक्तानि। जातमष्टाधिकं शप्तदशशतमिति न्यूनता अपेक्ष्यते हि षट्त्रिंशदधिकोन विंशतिशतम् १९३६, तस्मात् पूर्वोक्तन्यायेन पञ्चचतुरस्राणि निर्माय तानि चतुर्विंशतिधाविभज्य तत्तदूनविंशतिभागैः साग्रैः पञ्चवृत्तार्धानिनिर्माय पञ्चज्यासूत्राणि पातनीयानि, तेषु खातकण्ठमेखला त्रयाण्युपपाद्या नीत्येवार्धचन्द्र-घटनप्रक्रिया, तत्र खातस्यचरममेखला परिधेश्च योनिनिवेश भागेऽपि दशाङ्गुल मन्तरंनास्ति, किम्पुनः पार्श्वाग्रभागेषु। यथाक्रम मेवान्तराललब्धेः प्रमाणसिद्धत्वात्।

एवं षड़स्रकुण्डे वृत्तक्षेत्रव्यासः २९।७।८। २९।६।२ इति यावत्। ततो लब्धाज्या १४।७।२ एवं चतुश्चत्वारिंशदङ्गुल चतुरस्रप्रकृतिकेन मेखलावृत्त व्यासेन पादाधिक षट्यवा चतुः पञ्चाशदङ्गुलस्वरूपेण लब्धा व्यासार्धमिताज्या व्यासः ५४।६।२ तदर्ध २७।३।१ सैव ज्या तत्र खातज्यामेखला ज्ययोरन्तराल लम्बो विवेचनीयः। तत्र प्रथमं खातवृत्त मेखलावृत्तयोरन्तरालं २५ तदर्धं सार्धद्वादश १२।४ इदं कर्णसूत्रम् कोटिस्तु उपरिज्यायां २७।३।१ मधरीणज्या १४।७।२ तच्चतुर्गुणावशिष्टस्या १२।३।७ धैं ६।२।७।४, तत्रकर्णकोटिवर्गान्तरालमूलं भुजः ११ सएवलम्ब इति प्राकृत दशाङ्गुलान्तरालत्व मनुपपन्नमेव। एव मष्टास्रेऽपि खातमेखलयो रन्तरालमधिक मवसेयमिति ममवराकस्यानन्यपरिशोधिते मार्गे प्राथमिकः पदन्यासः कण्टकविशोधनादिना सहृदयैरनुक्रमनीयः। एवं विधे विषये गणिते परिकर्म बाहुल्योद्दुरूहता दोषोराघवभट्टेनैवस्वपरिश्रममधिकृत्य परिहृतः।

नोपयोग इहमत्कृतेश्रमे केवलाममविदान्तु यद्यपि । आगमञ्च-
गणितञ्चवेत्ति यस्तुष्य तु प्रियगुणः सकश्चनेति ।

इति कुण्डकादम्बरी निवन्धे मेखलाविवरणं
नाम चतुर्दशोल्लासः ॥१३।



अथ योनिः

त्रिपुरासारसमुच्चये—

मुष्टिमात्रे रसा ६ म्भोधि ४ नेत्रा २ ङ्गुला यामगा, वोन्नति र्योनि रुक्तावुधैरित्युपक्रम्य योन्यालक्षणमेतद्यद्गदितं रत्निमात्र कुण्डस्य, कुण्डस्यमयेनोक्तं तदेवखलुहस्त मात्रस्य। इति हस्तमात्रेऽपि कुण्डे षड़ङ्गुलायता चतुरङ्गुलविस्तारोद्दयङ्गुलोन्नता योनि रितिमयस्यविश्वकर्मणोमतमादर्शितं शारदातिलके—

होतुरग्रे योनिरासा मुपर्यश्वत्थपत्रवत्।
मुष्ट्यरत्न्येक हस्तानां कुण्डानां योनिरीरिता।
षट् चतुर्द्वयङ्गुलायामविस्तारोन्नतिशालिनी।
एकाङ्गुलन्तु योन्यग्रं कुर्यादीषदधोमुखम्।

एवञ्च हस्तमात्रे आयामविस्तारोन्नतिकथनेनान्येष्वपि कुण्डेषु चतुर्थांशेनायामः षष्ठांशेन विस्तारो द्वादशांशेनोन्नतिरिति योनि परिमाणमुक्तं भवति। तुर्य षष्ठ द्वादशांशैर्योनिकुण्डायते भवेत्। आयातावि-स्तृता तुङ्गाजिनांशेन तदग्राकॅमिति तन्त्रान्तरसम्वादात्। इदन्तु योनि परिमाणं षड्ङ्गुलैकमेखल कुण्डपक्षे योजनीय मौचित्यात्। तथाहि—कुण्डमण्डने—

तत्तत्कुण्डाकाराज्जिमांयनिरुक्त मेखलास्तासाम्।
उपरिप्रागुक्तदिशि स्वाग्रे योनिं दधीत कुण्डेषु।
अपहाय योनिकुण्डं योनिर्जायेत सर्व कुण्डेषु।
अश्वत्थ पल्लवाकृति रथवागजजिह्वया तुल्या।

चतुरंशायति रर्कविभागोच्चालम्बिता षडंशेन ।
एकाङ्गुलाग्रभागाभवेत्षडंशैकमेखले कुण्डे ।

यत्तु—क्वचित्षष्ठेनायति विस्तृती"

इति वचनम्, तद्यदि समूलं तदा चतुरङ्गुलैक मेखलकुण्डपरमित्याह—

चतुरङ्गुलेक मेखलकुण्डे षड्भागदीर्घता युक्ता ।
पूर्ववदुन्नत्यग्राविस्तारविधौ भवे श्चतुर्भागा ।

षड्भागः षष्ठोभागः । चत्वार्यङ्गुलानि, चतुर्भागा चतुरङ्गुला । स्वायम्भुवे मेखलामध्यतो योनिकुण्डार्धा त्र्यंशविस्तृता । सिद्धान्तशेखरे—

दीर्घार्कपर्वभिर्योनि विस्तरेणाष्टकाङ्गुला ।
उन्नतिर्द्वयङ्गुलेनास्या इति ।

नारदीये तु—

कुण्डत्र्यंशेन विस्तारो योनेरुच्छ्रा तोऽगुलम् ।
कुण्डार्धेनदीर्घादिति योन्युन्नतिरेकाङ्गुलाप्युक्ता ।

तथा क्रियासारेऽपि । दैर्घ्यात्सूर्याङ्गुलायोनि स्त्र्यंशोनाविस्तारेणतु । एकाङ्गुलोच्छ्रिताऽष्टाङ्गुलेति अष्टाङ्गुलोविस्तारो मूल प्रदेशऽग्रेतु यथाक्रम सङ्कोचादश्वत्थ पत्राकारत्वं सर्वत्रैवाष्टाङ्गुलविस्तारत्वेतु गजजिह्व ाकारत्व मप्यस्याः तथाचोक्तम्, अश्वत्थपत्रवद्योनि र्गजौष्ठ प्रतिमाथवेति एकाङ्गुलमात्रस्य सकोचान्न्युब्जत्वाच्च गजौष्ठाकारत्व मवसेयम् । अयञ्च नवाङ्गुलोत्सेध त्रिमेखल कुण्डविषयको योनिविधिरिति प्रतीयते । यदि तु सप्तांशोच्चायत द्वि मेखलकुण्डकल्प स्तदा तदधिकृत्य कुण्डमण्डने—

"कथित द्वि मेखले सा सप्तांशैर्व्यायता ततो व्यासः ।
त्रैराशिकविधिनास्याः सिद्धः पञ्चाधिकाश्चतुर्भागाः ।

यदि आयामाङ्गुलेषु षट्सु चतुरङ्गुलाव्यास स्तदा सप्तसु कियत्यनुपातेन पञ्चयवाधिकमङ्गुल चतुष्कमिहव्यासः सिद्धयतीत्यर्थः । तथा—

अथ योनिःपूर्वोक्तं त्रिमेखल कुण्डमधिकृत्य ।
कुण्डायतिदीर्घा कुण्डतृतीयांशविस्तृता मध्ये ।
दैर्घ्य समानाभ्युन्नति रंशेनाग्रेण सेय मोष्ठवती ।
अर्काङ्गुलोच्छ्रिता योनिं विदध्यात्तावदायता"मिति

योनिः स्याद्द्वादशाङ्गुला । उत्सेधायामतः तुल्येति च दर्शनाद्दैर्घ्यसमानोन्नति रत्राभिहिता । अत्र योनिमध्ये किञ्चिन्निम्न माचरन्ति, "मध्येत्वाज्य धृतिस्तये"ति वचनसम्वादात् । अन्येतु—

षट् चतुर्द्वयङ्गुलायामविस्तारोन्नतिशालिनी ।

शारदावाक्येऽपि त्रयाणामपि प्रमाणानां समुच्चयो विवक्षितस्तेन द्वादश लभ्यन्ते । द्वादशानाञ्चायाम विस्तारोत्सेधेषु त्रिष्वपि समन्वयः । एतत्प्रतिपादकमेवद्वादशांशस्वरूपत्वाद्योनिः स्याद्द्वादशाङ्गुला । उत्सेधायामत स्तुल्येति । अर्काङ्गुलोच्छ्रिता योनिं विदध्यात्तावदायतामितिवचनम् । तथा नवाङ्गुल त्रिमेखले कुण्डेमेखलानामुपरि त्र्यङ्गुलोच्चा, मूलेच यश्चिममेखलापृष्ठभागे द्वयङ्गुलायामास्थलावधि द्वादशाङ्गुलोच्चा, एकाङ्गुल कुण्ड प्रविष्टौष्ठीयोनिः सिद्धयति । नालन्तु पश्चिममेखलाप्रदेशाङ्गुलद्वय सान्तरालं योनिपृष्ठे निवेशनीयम् । एवञ्च मृदारब्धे कुण्डे द्वादशाङ्गुलान्येव योनेरायाम विस्तारोच्चत्वानि यानितु तृतीयांशविस्तार द्वयङ्गुलैकाङ्गुलोन्नत

योनि बोधकानि वचनानि तानिताम्रादिघटित सञ्चारि कुण्डपराणीत्याहुः । परेतु कुण्डानां योनिरीरिता इति शारदावचनस्य तन्त्रान्तरे इति शेषः । षट्चतुद्वयङ्गुलायामविस्तारोन्नति शालिनीतिवचनन्तु द्वादशाङ्गुल धातुमय चरकुण्डपरम् श्रूयतेच हस्तार्द्धमितं कुण्डशतार्द्धं च तथा षष्ठयां कुण्डं सप्ताङ्गुलं स्मृतम् । शतहोमेऽर्द्धहस्तं स्यात्सहस्रे हस्तमात्रकमिति विश्वकर्मणा पूर्वोक्तलक्षणैर्युक्तं कुण्डं तालप्रमाणकम् ।

उक्तंचरार्च्चनेचैव नस्थिरे च चतुर्मुख ।
कुण्डमत्रोक्तमार्गेण निर्माथाथ सलक्षणम् ।

क्षत्रियोऽपि समृद्धोवा शूद्रास्ताम्रेण बन्धयेत्, इति क्रियासारेणच भिधानादितियुक्तमुत्पश्यन्ति अत्र साम्प्रदायिकाः कुण्डार्द्धमितंयोनि विस्तारं नाद्रियन्तेऽन्यथाऽनुपपन्न प्रमाणाभावात् द्वादशोच्चतान्तुनालेन सहानुमन्यन्ते, स्वरूपेणतु द्वयङ्गुलोन्नताङ्गुलमात्रोन्नता वा योनिर्न्नाले नतु विल्वफल क्राथलेपवशाद्दृढ़पोतेन कुम्भसम्पातैकतापन्नेन द्वादशाङ्गुल दीर्घेण पश्चिममेखलातोऽङ्गुलद्वय व्यवहिते नोत्तम्भितामूले द्वादशाङ्गुलोच्चा भवत्यग्रेत्वावर्जन क्रमेण मेखलामधि तिष्ठतीत्यभ्युपगच्छन्ति, तथा द्वादशभागोत्तुङ्गत्रिमखलेपूर्वं कथित कुण्डेषु दशवाद्वादशभागाविस्तारः स्यात्त्रयोदशोच्चत्वम् । पञ्चदश दैर्घ्यमेवं योनिः कन्प्या । इदन्तु सर्वं पौरुषेय वचनादेवावधारितमिति मन्तव्यम् ।

अथ पञ्च मेखलके—

एकाधिक विंशतिलव तुङ्गा पञ्चदशभाग विस्तीर्णा ।
त्रैराशिक सिद्धास्या द्योनिदीर्घा च पञ्चविंशत्या ।
इदमप्यौचित्य त्रैराशिका दिभिः—पुरुषविशेषैरुत्प्रेक्षित मेव ।

तथा कण्ठेयोने रेकांशकोभवेच्चोनि मेखलासैव ।
ओष्ठः कण्ठो योनेर्मानान्तर्भूत एव निर्दिष्टः ।

वायवीय संहितायाम्—

अग्रेण कुण्डदाभिमुखीं किञ्चिदुत्सृष्ट मेखलाम् ।
कुम्भद्वयसमायुक्ता मश्वत्थदल सन्निभाम् ।

योनिं कुर्यादिति पूर्वेणाभिसम्बन्धः किञ्चिदधोभागे परिस्तरणार्थ मुत्सृष्टमेखलां कुम्भद्वयेन वृत्तार्द्धद्वयेन मूलदेशे संपृक्ता मतएवाश्वत्थ पत्राकृतिमित्यर्थः ।

ईषत्कुण्ड प्रविष्टाग्रा जिर्नाश कृत मेखला ।
मेखलार्थं पृथग्भूमिर्न्नग्राह्या वाह्यतः प्रिये ।

योनिक्षेत्रे तु साकार्येतिलक्षणसंग्रहवचनेन योनिक्षेत्रान्तर्गता एकाङ्गुलविस्तारा तावन्निम्नाच मेखलालभ्यते, तत्तुल्यन्यायात्कण्ठोपि क्षेत्रान्तर्गतएव ।

शारदातिलके । स्थलादारभ्य नालंस्याद्योन्यामध्ये सरन्ध्रकम् । स्थलादारभ्येत्यनेन चरममेखलापरिधि संलग्नंयोन्याःनालं कुर्यादितिगम्यते स्यादित्यत्रहि धात्वर्थो नविवक्षितः, किन्तु लिङर्थःप्रवर्त्तनाविषयोऽर्थभावनैव औदुम्बरोयूपो भवतीत्यादौ यूपमौदुम्बरं भावयेदित्यन्वय बोधाकारमप्युपपद्यन्तेभाट्टाः । तथाच स्यादिस्याख्यात प्रतिपाद्यार्थभावनास्वरूप नालकरणक क्रियाविशेषणं सरन्ध्रकमितिमध्ये मध्यममेखायां परिस्तरणार्थं मवकाशं स्थापयित्वा नालंकर्त्तव्यमितिवाक्यार्थः । एवञ्च चरममेखलामारभ्य योनिपर्यन्तो भूमिर्मृदापूरणीयेतिसिद्धयति, सरन्ध्रकमिति नालविशेषणं वद-

न्नोभ्रान्ताएव नालत्वेनैव वित्तरलाभादिति राघवभट्टः। सरन्ध्रकमिति फलतो योनिविशेषणम् तेन योनिमध्ये आज्यधृतिनामकं विलंकार्यं सच्छिद्रामध्यमोन्नतेतिवशिष्ठ संहितासम्वादादित्यपरे, तन्त्रराजे—

बहिस्थमेखलामध्यो दारब्धनिजनालकम्।
वितस्तिमात्रकं तत्स्यादिति।

वितस्तिद्वादशाङ्गुलं बहिस्थ मेखलायास्तिर्यङ्मान मध्यप्रदेशस्यशिंवितस्तिमात्रं स्थलादारभ्यैवनाल विधेयमित्यतोवाक्याल्लभ्यते, इदञ्च नालंयोनि कुम्भद्वय संपातसङ्कचिते पश्चिमभागेनिवेशनीयम्—योन्याः पश्चिमतो नालमायामे चतुरङ्गुलम्। त्रिद्वयेकाङ्गुल विस्तारं क्रमान्न्यूनाग्रमिष्यत इति वचनबलात्, अत्रमूले त्र्यङ्गुलेन मध्ये द्वयङ्गुलेनाग्रे त्वेकाङ्गुलेन विस्तीर्णमतएव क्रमान्न्यूनाग्रं चतुरङ्गुलायतं नालमित्यर्थः।

एतच्चतुरङ्गुल षड्ङ्गुलादि स्वल्पमेखलापक्षेघटते नान्यत्र तत्रापि षड्ङ्गुल मेखलोपरिद्वयङ्गुलोच्चा योनिरित्यष्टा वङ्गुलानि सम्पद्यन्ते। नालन्तु चतुरङ्गुलं चतुरङ्गुल चतुरस्रपीठोपरीत्यष्टाङ्गुलोच्चत्वम्, तथायोनि पश्चिमेकुम्भद्वय सम्पातस्थाने प्रोताग्रंनालं सिद्धयति।

तथाच प्रपञ्चसारे—

योनिः स्यात्पश्चिमायामथदिशिचतुरस्रस्थलारब्धनालेत्याचार्य चरणाः। एतद्विवृण्वते, मेखलात्रयाद्बहिश्चतुरस्रं चतुरङ्गुलायो मविस्तारं पीठंकृत्वा तत्रनालं स्थाप्यमिति पद्मपादाचार्याः। द्वादशाङ्गुलोच्च मेखलापक्षेतु स्थलादारभ्य वितस्तिमात्रंनालं तद्योनिमूलाधः प्रदेशे निवेशनीयम्, तत्र त्रिधाविभक्ते क्रमात्रिद्वेकाङ्गुल विस्तीर्णत्वं प्रयोगसारोक्तमत्वेति नवाङ्गुलोच्च मेखलापक्षे त्वेकादशाङ्गुलोर्ध्वं पञ्चमेखापक्षे पञ्चविंशत्यङ्गुलो-

च्चं नालमोचित्यात्सिद्धयतीत्यवधेयम्। तन्त्रराजटीकायां—मनोरमायान्तु वहिस्थ मेखलामध्यादारब्ध निजनालकमितिवचन व्याख्यानावसरे वहिस्थमेखलामध्यादिति तन्मध्यगत चतुरस्रपीठादित्यर्थ इति विवृतम्। तन्मते द्वादशाङ्गुलोच्च मेखलापक्षे वहिर्मेखला चतुरङ्गुला तदुपरि चतुरङ्गुलपीठन्तदुपरि चतुरङ्गुलनालमिति वितस्तिमात्र मुच्चत्वं सिद्धयति, तच्चनालं योनेरधःप्रदेशे विष्कम्भविधया योजनीयमिति पर्य्यवस्यति।

परेतु—अस्तियोनिमध्ये आज्यधृतिन्नभिविवरं तच्च योनिपश्चिमसम्पातस्थानात्पश्चाङ्गुल प्राचिभागे कर्त्तव्यम्। तत्रैवनालविवरं योजनीयम्। तथाहि—नालंतावच्चतुरलोच्च पीठोपरिद्वादशाङ्गुलोच्चमिति षोड़शाङ्गुलानि, योनिस्तु नवाङ्गुलोच्च मेखलोपरि द्विभागोच्चेत्येकादशाङ्गुलोच्च तयोरन्तरनालस्य पञ्चाङ्गुलानि तावच्च प्रागभिमुखमुग्नाग्रं नालमाज्यधृतिस्पर्शि सम्भवत्येव, अतएव योन्यामध्ये सरन्ध्रकमिति शारदावाक्यम्। योनिमध्यरन्ध्रेण संहतं संयुक्तंनालमित्यर्थैकतया व्याख्येयमित्याहुः। कुण्डमण्डने—

रामस्तु मेखलानामाधिक्य ह्रासतो नयोनिमानस्य मेदंमेने।
किन्तु व्यासार्द्धेनायता तृतीयेन भागेन।
व्यासस्यच विस्तीर्णा परिधनैक भागेन।
एकांशेनतु कुण्डं प्रविशन्ती न्युब्जसूचिनौष्ठेन।
सविवरमध्यावृत्तद्वय सस्पोतेन संकुचन्मूला।
आभूमेर्विवरवता नालेनसमेति योनिरित्याह।

तथाच रामस्यसूत्रं कुण्डव्यासदलायताऽथवितताऽयंशेन तुङ्गा चतुर्विंशांशेनच तावता परिधिना योनिः समन्ताद्यता। तावन्मान निजाग्रकेणविशती कुण्डान्तरेऽन्तर्विलो मध्येवृत्तदलद्वयेनरुचिरा चाश्वत्थपत्राकृतिः।

अत्रौष्ठं योनेरेकाङ्गुलमेव, शारदातिलके—

एकैकाङ्गुलतो योनिं कुण्डेष्वन्येषुवर्द्धयेत् ।
यवद्वय क्रमेणैव योन्यग्रमपिवर्द्धयेत् ।

तेन द्विहस्त एकषड्ङ्गुलमेखले कुण्डे सप्तायतो पञ्चविस्तृताऽष्यूनता योनिः सिद्धयत्येव मत्यथात्राप्यवसेयम् । इदञ्चगणितोपट्टून्प्रति स्थूलदृष्टया निर्दिष्टम् । सूक्ष्मदृष्टयातु षष्ठांशद्वय न्यूनानि षड्ङ्गुलानि व्यासः सार्द्धमष्टाङ्गुलभायामः एकषष्ठांशन्यून षड्ङ्गुलत्रयमुन्नति द्विंहस्तकुण्डयोनेरिति बोध्यम् । तत्र योन्यग्रमपि स्वतृतीयांशाधिक यवत्रयाढ्य मेकाङ्गुलमिति राघवभट्टः । एतेन एकैकेनाङ्गुलेनामलनिशितमतिर्वर्द्धयेदन्य कुण्डेष्वेवं योनिञ्च नाभिखलु यवयव युगलेनेहयोन्यास्तथौष्ठम् । कुर्यान्न भिञ्चवृत्ताकृतिमपि यदिवा कुण्डरूपानुरूपं योन्याकारेऽत्रयोनिं सरसिजसदृशे नोविदध्याच्च नाभिमिति समुच्चयवचनमपि व्याख्यातम् । अत्र यानि कुण्डे योनिनिषेधेन प्राग्गिनयाग्यकुण्डानां प्रोक्तायोनिरुदङ्मुखीत्यादिवचनं वृत्तचतुरस्रान्यतरस्वरूप नवकुण्डीक्षे योजनीयमिति संक्षेपः ।

इति कुण्डकादम्बरी निबन्धे योनिस्वरूपनिरूपणनाम
पञ्चदशोल्लासः ॥१५॥



अथ नाभिः

शारदायाम्—

कुण्डानां कल्पयेदन्तर्नाभिं सम्बुजसन्निभम् ।
तत्तत्कुण्डानुरूपं वा मानमस्यनिगद्यते ।
मुष्टयरत्न्येकहस्तानां नाभिरुत्सेधतोऽतः ।
नेत्रवेदाङ्गुलोपेता कुण्डेष्वन्येषु वर्द्धयेत् ।
यवद्वय क्रमेणैव नाभिं पृथगुदीरधीः ।
योनि कुण्डे योनिमञ्जकुण्डेनाभिञ्चवर्ज्जयेत् ।
नाभि क्षेत्रं त्रिधाभित्वा मध्ये कुर्वीतकर्णिकाम् ।
बहिरंश द्वयेनाष्टौ पत्राणिपरिकल्पयेत् ।
नाभि शब्दः पुंस्यपि साधुः ज्ञातये क्षत्रियेः
नाभिः प्राण्यङ्गेतु द्वयोरसाविति कोषात् ।

उत्सेध उच्चत्वं तारोविस्तारः नेत्रेति तेन प्रकृतिभूत चतुरस्रव्यास षष्ठांशेनविस्तारः द्वादशांशेनोन्नतिरितिलभ्यते, यवद्वयेतिस्थूलमुक्तम् । वस्तुतस्तु द्विहस्तकुण्डे षष्ठांशन्यून मङ्गुलत्रयमुच्चत्वं त्र्यंशन्यून मङ्गुलषट्कं विस्तारो गणितसिद्धः । नाभौपद्मनिर्माणमाह, नाभिक्षेत्रमिति तृतीयांशाधिके नैकाङ्गुलेनव्यासेन मध्ये कर्णिकावृत्तं ततस्तृतीयांश द्वयाधिकाभ्यांद्वाभ्यामङ्गुलाभ्यां कल्पितव्यासकं दलमूलवृत्तं ततः चतुरङ्गुलव्यासकं दलवृत्तं तृतीयं ततः सपादाङ्गुलपञ्चकव्यासवृत्तनिर्माय तत्र दलाग्राणि वचनीयानीतिक्रमेण नाभिपद्मनिर्मातव्यम् । तेन चतुरङ्गुलक्षेत्रफलं तत्रोपद्यते । एवं नाभेर्योन्याकारतापक्षे चतुरङ्गुल चतुरस्रक्षेत्रस्य पञ्चमांशंकिञ्चिदधिक

मध्ये बर्द्धयित्वोपरि त्रिकोण निर्मातव्यमेव मेवान्येष्वपिकुण्डेषु फलसम्बादि तत्तदाकारनिर्माण मुचितम्। सर्वत्र चतुरस्रएवनाभिरित्ययि वदन्ति। गौतमीयतन्त्रे—

कुण्डमध्ये भवेन्नाभिः पद्मं वा चतुरस्रकम्।
द्वयङ्गुलेनोन्नतिं तत्तु चतुरङ्गुलविस्तृतम्।

अत्र यदि चतुरस्रकमिति तत्तत्कुण्डाकारोपलक्षकम् तदा कुण्डान्तरे चतुरस्रनाभिनिर्माणन्निर्मूलमेव। त्रिपुरासार समुच्चयेतु पञ्चमांश विस्तृतोऽपि नाभिरितिमतमुक्तम्। कुण्डस्येकहस्तमात्रस्य योनिं प्रादुर्भूताध्यङ्गुलायामतारां। व्यासष्यंशैकांशकोत्सेधयुक्ता मेवंवोधिच्माजपत्रानुरुपाम्। नेत्र २ भूता ५ ङ्गुलोत्सेध तारान्वितां नाभिमंशद्वये तद्वलान्यष्टच। व्यासवह्ययशतांशेन तत्कर्णिकां मध्यभागे विदध्यादुबुधः कुण्डत इति। कुण्डमण्डने—

नांभिर्मध्ये कुण्डे विनिवेश्या पद्मकुण्डमपहाय।
सा पद्मसन्निभा वा तत्तत्कुण्डानुरूप रूपो वा।
व्यासषड़ंशेनास्या विस्तारोद्वादशेन तुङ्गत्वम्।
एवंस्याङ्गं कुण्डंनिर्दोषं मखविधौ शुभं भवति।

रामोऽपि—

कुण्डार्कांशस्तुङ्गायतां द्विनिघ्नः सव्यासोस्याधीमता कल्पनीय इति पद्मकुण्डनाभिस्थानीयायाः कर्णिकाया व्यासार्द्धपरिमित मेवोच्चत्वम्। तथाच कामिके—

उत्सेधश्च ततः कुर्यात्कर्णिकार्द्धांशमानत इति। एवं साङ्गमिति

साङ्गमण्डपोयेतं साङ्गं कुण्डंचेत्तदा निर्दोषतया शुभमितरथा मण्डपाङ्गस्य कुण्डाङ्गस्य वा वैगुण्येनाशुभमिति। क्रियासारे—

अनुक्तसाधनैः कल्पो यदिवाकुटिलाकृतिः।
मानाधिकोऽथवान्यूनो मण्डपःकर्त्तृनाशनः।

हयशीर्ष पञ्चरात्रे—

"अतः परं प्रवक्ष्यामि ध्वजारोपण मुत्तमम्।
यत्कृत्वा पुरुषः सम्यक् समस्तफलमश्नुते।
यातुधाना गुह्यकाश्च कूष्माण्डाः खेचरास्तथा।
चिन्तयन्त्यसुरश्रेष्ठा ध्वजहीनं सुरालयम्।
ध्वजेनरहिते ब्रह्मन् मण्डपेतु वृथाभवेत्।
पूजाहोमादिकं सर्वं जपाद्यंयत्कृतं बुधैः।
रज्जुकेन विना यद्वत्क्षेत्रं नश्यतिक्षेत्रिणः।
ध्वजंविना देवगृहं तथानश्यति सर्वथा।"

पञ्चरात्रे—,

आख्यातसाधनैर्युक्तः सरलः सममानकः।
मनोज्ञो मण्डपोयोऽसौ कर्मकर्तुः शुभावहः।

वेदिमधिकृत्य क्रियासारे—

"वक्रपार्श्वा क्लिन्नमध्या परुषादग्शोभना।
मानहीनाधिका या सा कर्तुः कर्मविनाशिनी।

अत्र क्लेदः पारुष्यञ्च वर्ज्यम्। विश्वकर्मा—

खातेऽधिके भवेद्रोगो हीनेधेनु धनक्षयः।

वक्रकुण्डे तु सन्तापो मरणं छिन्नमेखले ।
मेखलारहिते शोकोऽभ्यधिकेवित्तसंक्षयः ।

अभ्यधिके—अभ्यधिकमेखले ।

भार्याविनाशनं कुण्ड मुक्तं योन्याविनाकृतम् ।
अपत्यध्वंसनं प्रोक्तं कुण्डं यत्कण्ठवर्जितम् ।

आगमान्तरे—

मानाधिके भवेन्मृत्युर्मानहीने दरिद्रता ।

क्रियासारे—

न्यूनाधिक प्रमाणंयत्कण्ठजर्जर मेखलम् ।
शृङ्गाररहितं यच्च यच्च यजमानविनाशकृत् ।
शृङ्गोरो—मेखलाद्यारादुपकारकाङ्गम् ।

वशिष्ठ संहितायाम्—

अनेकदोषदं कुण्डं यदि न्यूनाधिकम्भवेत् ।
तस्मात्सम्यक् परीक्ष्यैवं कर्तव्यं शुभमिच्छता ।

सिद्धान्तशेखरे—

मानहीने महाव्याधि रधिकेशत्रुवर्धनम् ।
योनिहीनेत्वपस्मारो वाग्दण्डः कण्ठवर्जिते ।

जयद्रथयामले—

"सूत्राधिके सहृद्द्वेषो मानहीने दरिद्रता ।
वाग्रोधः कण्ठहीनेस्यादसिद्धिर्न्यूनखातके ।

अधिके चासुरोभागो मानेनाधिकमेखले ।
व्याधयः सम्प्रवर्तन्ते विभागोस्यादपस्मृतिः ।
उच्चाटः स्फुटतो छिद्रसंकुले वाच्यताभवेदिति ।

क्रियासारे—

दिग्देशकुण्डानिर्मुक्तो योऽनलो लौकिकोहि सः ।
तस्माद्दिग्देश कुण्डानि संग्राह्यान्युक्त लक्षणैः ।
कुण्डमेवंविधंनस्यात् स्थण्डिलं वा समाश्रयेत् ।
एकस्थण्डिल पक्षे मण्डपनियमो नास्ति ।

वायवीयसंहितायां–मण्डपादयुक्त्वा—

"कृत्वा पूर्वोदितं सर्वं विना वा मण्डपादिकम् ।
मण्डलं पूर्ववत्कृत्वा स्थण्डिलं च विशेषतः"

इत्यभिधानाद्वेदिगत सर्वतोभद्र मण्डलाभावेऽपि स्थण्डिलं विधेयमिति विशेषत इत्येनेनसूचितम् । स्थण्डिललक्षणमुक्तं शारदायाम्—

"नित्यं नैमित्तिकं होमं स्थण्डिले वा समाचरेत् ।
हस्तमात्रं च तत्कुर्याद्वालुकाभिः सुशोभनम् ।
अङ्गुलोत्सेध संयुक्तं चतुरस्रं समन्ततः ।

सारसमुच्चये—

"नित्यनैमित्तिके च प्रविरलमतयः प्राहुः रेकेऽधिकोणम् । कुण्डं हस्तप्रमाणं स्मरगृह सदृशं चापिवृत्तं प्रशस्तम् । षट्कोणञ्चार्धदोषाकर सदृशमुत स्थण्डिलं रत्निमात्रायामं स्वाङ्गुष्ठ पूर्वोन्नतमथसुसमं निर्मितं वालुकाभिः । चतुष्कोणमन्यदङ्गुलोत्सेधमेके बुधाहस्तविस्तारयुक्तं तदाहुः ।

तन्त्रान्तरे—

सुमेखलं स्थण्डिलन्तु प्रशस्तं यज्ञ कर्मणि ।
कण्ठन्तु वर्जयेत्तत्र खाते कण्ठः प्रकीर्तितः ।

बौधायनः—

"कुण्डवन्मेखलां कृत्वा योनिं कृत्वा ततः परम् ।
बौधायनमते प्रोक्तं स्थण्डिलं चतुरस्रकम् ।

नारदीये—

पीठवद्वर्तयेत्कुण्डं सप्रमाणमगर्तकम् ।
एवञ्च केवलं स्थण्डिलमित्येकः कल्पः ।
मेखलादियुक्तं तदित्यपरः ।

स्थण्डिलोत्सेधमकृत्वा प्रकृतस्थल एव मेखलाद्यवष्टब्धमखातं कुण्डक्षेत्रमितितृतीयःपक्षः । अनयैवोपपत्त्याक्षेत्रस्य प्राधान्यमुपपादितं प्राक् । मन्त्रसंग्रहे—

न्यूनसंख्योदितेकुण्डेऽधिको होमो विधीयते ।
अनुक्तकुण्डे न्यूनस्तु नाधिके शस्यते क्वचित् ।

एवञ्च हस्तमिते कुण्डे सार्धलक्षादेर्द्विलक्षादेरपि वा होमो न विरुध्यते । विरुध्यते द्विहस्तादा वेकलक्षादिर्होम इति सिद्धं भवति ।

कुण्डमण्डने—इति गणितैरुपपन्नं बहुविबुधनिबन्धसार मुद्धृत्य, गोकुलनाथेन मया विद्यानिधिनन्दनेन यो लिखितः । ग्रन्थेन तेन भगवाननादिनिधनः प्रधानपुरुषः । प्रीतः परिपुष्णातु प्रीतिं मम पादपद्मयोर्निजयोः । हन्त भगवन्कारणकारुण्यनिधे !

प्रसरति विषयेषु येषुरागः ।
परिणमते विरतेषु तेषु शोकः ।
त्वयिरुचिरुचिता नितान्तकान्ते
रुचि परिपाक शुचौ मनोचरोऽसि ॥

दृष्टादृष्टिं सुखयति गुणैः कीर्तिता कर्णयुग्मम् ।
प्रीणातिस्म प्रथयति सदा स्वान्तवृत्तौ प्रमोदम् ।
सैवेदानीं स्मृति मुपगता शिष्यमाणेन नाम्ना ।
निर्दिष्टा वो दहति दुहिता हन्त कादम्बरी माम् ॥

इति महामहोपाध्याय षट्तर्क पञ्चानन
श्री गोकुलनाथशर्मविरचिते कुण्डकादम्बरी नाम निबन्धे
नाभिविवरणं नाम षोड़शोल्लासो ग्रन्थश्च
परिपूर्ण इति शिवम् ॥१६॥

निखिदलमधुपाऽऽघ्र क्षोणिभिः शाकवर्षे ।
गतवति हिमधाम्नि क्षीणताश्वोर्ज एतत् ॥
निखिलमिह विभाव्य व्यालिखद्द्राक् प्रमोदा-
दधिसुरधुनि पुस्तं श्रीभवेशो द्विजेशः ॥

विलत विबुध बासा यानिशं जह्नुजायाः ।
शिशिर तरजलौघैः पावनैः संविरेजे ॥
परिदलितदलोद्या न्मालतीमञ्जुलाया-
मिह पुरि कृतवासो विल्वपञ्चान्वयोऽसौ ॥

शुद्धिपत्रम्

पृ०	पं०	अशुद्ध	शुद्ध
३	१७	कतृप्तं	कल्पृप्तं
४	१४	शालस्य	शालय
५	५	मात्राङ्गुलि	मात्राङ्गुल
६	१	ऊद्ध्	ऊद्ध्वं
६	४	स्गार्टकर्मण	स्मार्त्तकर्मणि
७	८	त्रीप्यपि	त्रीण्यपि
७	२२	वृहा	गृह
८	१२	शङ्कुग्र	शङ्कवग्र
९	४	द्वोदण्डौशूरमा	द्वौदण्डौसूक्ष्मा
९	२१	स्थलद	स्थलाद
१३	५	माग्रम्	भाग्रम्
१५	१८	काष्ठ	काष्ठा
१६	५	५	१
२५	१६	घं	घ्यं
३७	१।१९	$\frac{५}{९}\frac{६}{९}$ २।	$\frac{५}{९}\frac{६}{९}$ ।
४८	४	५७।६	५७६
५३	१४	४७ ४३	४७।८३
५३	१५	४४ ८३	४४।८३
५३	१५	अशीत्या	त्र्यशीत्या
५५	३	१२३ १२७	१३३।१२७
५६	१८	३०।५।२५	३०।६।२५
५८	३	$\frac{१}{३}\frac{३}{८}$ $\frac{१}{३}\frac{३}{८}$	१३८२४०
६०	१५	।।१२।१।	१२।१।।
६०	१७	६०।५।	६०।५।।

६०	२०	२०।१।३।५	२०१।।३।५
६५	६	।११।४।१।१ ५।।	११।४।१।१।।५।।
६५	१२	यवान्धि	यवाब्धि
६५	१४	यवान्धि	यवाब्धि
६६	२०	लस्वश्कु	लवश्च
६८	८	१६७।६	१६।७।६
७०	२०	२४।१०	२४०।१०
७१	३	३६।२७	३६२७
७३	१६	वेदसि	वेदशरा
७६	८	२२७४ १३४	२२७४।१३४
८१	६	५४३।२४	५४३।२।४
८१	१४	५१५	५१।५
८१	१६	७१४।४	७२।४।४
८२	४	४६०।।७।६	४६०७।८
८७	१०	४६।३।३।४	४।६।३।३।४
१०३	१४	पाठ्याम्	षाट्याम्
१०३	१५	नन्देष्ट	नन्देषु

★★

कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालय

कामेश्वर नगर, दरभंगा

विक्रेतव्य पुस्तकें

क्र. सं०	लेखक का नाम	सम्पादक का नाम	मूल्य
१,	म०म० महेश ठाकुर संस्कृत ग्रन्थमाला		
	(क) न्यायरत्नाकर	सम्पादक श्री उमेश मिश्र	७। ,,
	(ख) कालिदास साहित्य	डॉ० आद्या प्रसाद मिश्र	५। ,,
	(ग) कालिदासयोरुपकाणां समुच्चय	म० म० उमेश मिश्र	५। ,,
२.	विद्यापति संस्कृत ग्रन्थावली प्रथम भाग	१. सम्पादक डां. जयमन्त मिश्र	७५।रु०
	(क) (विभागसार एवं शैवसर्वस्वसार)	२. डॉ. इन्द्रकान्त झा	
	(ख) विद्यापति संस्कृत ग्रन्थावली, द्वितीयभाग (शैवसर्वस्वसार प्रमाण भूतपुराणसंग्रह एवं दान वाक्यावली)	१. डॉ. जयमन्तमिश्र -२. आनन्द झा	७५। ,,
३.	मीमांसा श्लोकवार्तिक (हि० अनु०)	विद्यावाचस्पति दुर्गाधर झा	१५०। ,,
४.	ध्वनिकल्लोलिनी	ले. अनु. श्री आनन्द झा	
५.	शशिनाथ निबन्धावली	ले. विद्यावाचस्पति शशिनाथ झा स. विद्यावाचस्पति श्री रामचन्द्र मिश्र	३०। ,,
६.	समासशक्तिदीपिका	ले. महावैयाकरण दीनवन्धु झा	५। ,,
७.	विज्ञानं समाजश्च	ले. डॉ० सरयू प्रसाद गुप्त	२५। ,,
८.	मेघदूतम् (जगद्धरीयरसदीपिनी व्याख्योपेत)	स. प० श्री हृषीकेश झा	१२। ,,
९.	उपसृष्ट धात्वर्थ संग्रह --	ले. दीनबन्धु झा स. डॉ. शशिनाथ झा	६। ,,
१०,	गोकुलनाथ ग्रन्थावली		
	(क) रसमहार्णव:	१. सं० प० श्री धर्मनाथ शा २. प० श्री कुमुदनाथ मिश्र	६। ,,
	(ख) प्रत्यक्षालोकमंगलविचार तर्कतत्वञ्च	१. सं. प० श्री धर्मनाथ झा २. प० श्री कुमूदनाथ मिश्र	२०। ,,
	(ग) मासमीमांसा	प. श्री धर्मनाथ झा	६। ,,

(घ) अनुमिति दीधिति विद्योत	१. प. श्री धर्मनाथ झा २. प० श्री रामसेवक झा	७। ,,
(ङ) गोकुलनाथ ग्रन्थगुच्छ (दिक्कालनिपणम् रूढ़िव्याख्या रहस्यम्, मिथ्यात्व निरूपणम्)	१. प० श्री धर्मनाथ झा २. प० श्री रामसेवक झा	७। ,,
११. सुभाषितावली (सानुवाद)	प० श्री उपेन्द्र झा	१२। ,,
१२. निग्रमावली एवं पाठ्य ग्रन्थावली	प्रकाशक का. सिं. द. सं. वि. वि. दरभङ्गा	७। ,,
१३. रघुवंश महाकाव्यम् (मूलमात्रम्)	सं. वि. वा. श्री रामचन्द्रमिश्र	४। ,,
१४. हरविजयम् (प्रथम सर्ग) सटीक	सं. ,,	१। ,,
१५. मेघदूतम् (मूलमात्रम्)	,, ,,	५०। पै
१६. मिथिला माहात्म्य	सं. अनु० प० श्री धर्मनाथ झा	५। रु.
१७. अभिनन्दनमाला	सं. प० श्री रामचन्द्र मिश्र	६। ,'
१८, छन्दोगानां विवाहपद्धति	सं. अनु० प० श्री तेजनाथ झा	५। ,,
१९. मिथिला का इतिहास	ले० डॉ. रामप्रकाश शर्मा	७५। ,,
२०. स्मृति साहस्री	ले० रमाकर	१५। ,,
२१. लौकिक न्याय रत्नाकर	सं. प० श्री रामचन्द्र मिश्र	४५। ,,
२२. म० म० वाचस्पतिग्रन्धावली (क) कृत्यप्रदीप:	सं. १. प० श्री जयमन्तमिश्र २. श्री धर्मनाथ झा	२४। ,,

विशेष–प्रकाशन की कीमत 'कुलसचिव' कामेश्वर सिंह दरभंगा संस्कृत बिश्वविद्यालय कामेश्वर नगर दरभंगा के पदनाम से स्टेट बैंक आफ इण्डिया का बैंक ड्राफ्ट पहले ही प्रेषणीय है। आदेश के बाद प्रफोरमा देयक भेजा जायगा।

अथवा

आधी राशि अग्रिम भेजकर किसी बैंक के माध्यम से भी मंगवाया जा सकता है।

२ प्रामाणिक थोक ग्राहक को २५ /. कमीशन दी जाती है।

प्राप्ति स्थान :—

प्रकाशन बिभाग

कामेश्वरसिंह दरभंगा संस्कृत बिश्वविद्यालय
कामेश्वर नगर, दरभंगा (बिहार)